# 4 Shrimaddevibhagavatamahapurane Chaturthah Skandhah

# ૪ શ્રીમદ્દેવીભાગવતમહાપુરાણે ચતુર્થઃ સ્કન્ધઃ

## Document Information


Text title : Devi Bhagavata Mahapurana Skandha 04

File name : devIbhAgavatam04.itx

Category : purana, devI, devii, devibhagavatam

Location : doc_purana

Transliterated by : Vishwas Bhide, satsangdhara.net

Proofread by : Vishwas Bhide, satsangdhara.net

Latest update : March 30, 2024

Send corrections to : sanskrit at cheerful dot c om



This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**


Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 31, 2024

*sanskritdocuments.org*

# 4 Shrimaddevibhagavatamahapurane Chaturthah Skandhah

# ૪ શ્રીમદ્દેવીભાગવતમહાપુરાણે ચતુર્થઃ સ્કન્ધઃ

## ૪.૧ પ્રથમોઽધ્યાયઃ । જનમેજયપ્રશ્નાઃ ।

જનમેજય ઉવાચ ।
વાસવેય મુનિશ્રેષ્ઠ સર્વજ્ઞાનનિધેઽનઘ ।
પ્રષ્ટુમિચ્છામ્યહં સ્વામિન્નસ્માકં કુલવર્ધન ॥ ૧॥

શૂરસેનસુતઃ શ્રીમાન્વસુદેવઃ પ્રતાપવાન્ ।
શ્રુતં મયા હરિર્યસ્ય પુત્રભાવમવાપ્તવાન્ ॥ ૨॥

દેવાનામપિ પૂજ્યોઽભૂન્નામ્ના ચાનકદુન્દુભિઃ ।
કારાગારે કથં બદ્ધઃ કંસસ્ય ધર્મતત્પરઃ ॥ ૩॥

દેવક્યા ભાર્યયા સાર્ધં કિમાગઃ કૃતવાનસૌ ।
દેવક્યા બાલષટ્કસ્ય વિનાશશ્ચ કૃતઃ પુનઃ ॥ ૪॥

તેન કંસેન કસ્માદ્વૈ યયાતિકુલજેન ચ ।
કારાગારે કથં જન્મ વાસુદેવસ્ય વૈ હરેઃ ॥ ૫॥

ગોકુલે ચ કથં નીતો ભગવાન્સાત્વતાં પતિઃ ।
ગતો જન્માન્તરં કસ્માત્પિતરૌ નિગડે સ્થિતૌ ॥ ૬॥

દેવકીવસુદેવૌ ચ કૃષ્ણસ્યામિતતેજસઃ ।
કથં ન મોચિતૌ વૃદ્ધૌ પિતરૌ હરિણામુના ॥ ૭॥

જગત્કર્તું સમર્થેન સ્થિતેન જનકોદરે ।
પ્રાક્તનં કિં તયોઃ કર્મ દુર્વિજ્ઞેયં મહાત્મભિઃ ॥ ૮॥

જન્મ વૈ વાસુદેવસ્ય યત્રાસીત્પરમાત્મનઃ ।
કે તે પુત્રાશ્ચ કા બાલા યા કંસેન વિપોથિતા ॥ ૯॥

શિલાયાં નિર્ગતા વ્યોમ્નિ જાતા ત્વષ્ટભુજા પુનઃ ।
ગાર્હસ્થ્યઞ્ચ હરેર્બ્રૂહિ બહુભાર્યસ્ય ચાનઘ ॥ ૧૦॥

કાર્યાણિ તત્ર તાન્યેવ દેહત્યાગં ચ તસ્ય વૈ ।
કિંવદન્ત્યા શ્રુતં યત્તન્મનો મોહયતીવ મે ॥ ૧૧॥

ચરિતં વાસુદેવસ્ય ત્વમાખ્યાહિ યથાતથમ્ ।
નરનારાયણૌ દેવૌ પુરાણાવૃષિસત્તમૌ ॥ ૧૨॥

ધર્મપુત્રૌ મહાત્માનૌ તપશ્ચેરતુરુત્તમમ્ ।
યૌ મુની બહુવર્ષાણિ પુણ્યે બદરિકાશ્રમે ॥ ૧૩॥

નિરાહારૌ જિતાત્માનૌ નિઃસ્પૃહૌ જિતષડ્ગુણૌ ।
વિષ્ણોરંશૌ જગત્સ્થેમ્ને તપશ્ચેરતુરુત્તમમ્ ॥ ૧૪॥

તયોરંશાવતારૌ હિ જિષ્ણુકૃષ્ણૌ મહાબલૌ ।
પ્રસિદ્ધૌ મુનિભિઃ પ્રોક્તૌ સર્વજ્ઞૈર્નારદાદિભિઃ ॥ ૧૫॥

વિદ્યમાનશરીરૌ તૌ કથં દેહાન્તરં ગતૌ ।
નરનારાયણૌ દેવૌ પુનઃ કૃષ્ણાર્જુનૌ કથમ્ ॥ ૧૬॥

યૌ ચક્રતુસ્તપશ્ચોગ્રં મુક્ત્યર્થં મુનિસત્તમૌ ।
તૌ કથં પ્રાપતુર્દેહૌ પ્રાપ્તયોગૌ મહાતપૌ ॥ ૧૭॥

શૂદ્રઃ સ્વધર્મનિષ્ઠસ્તુ દેહાન્તે ક્ષત્રિયસ્તુ સઃ ।
શુભાચારો મૃતો યો વૈ સ શૂદ્રો બ્રાહ્મણો ભવેત્ ॥ ૧૮॥

બ્રાહ્મણો નિઃસ્પૃહઃ શાન્તો ભવરોગાદ્વિમુચ્યતે ।
વિપરીતમિદં ભાતિ નરનારાયણૌ ચ તૌ ॥ ૧૯॥

તપસા શોષિતાત્માનૌ ક્ષત્રિયૌ તૌ બભૂવતુઃ ।
કેન તૌ કર્મણા શાન્તૌ જાતૌ શાપેન વા પુનઃ ॥ ૨૦॥

બ્રાહ્મણૌ ક્ષત્રિયૌ જાતૌ કારણં તન્મુને વદ ।
યાદવાનાં વિનાશશ્ચ બ્રહ્મશાપાદિતિ શ્રુતઃ ॥ ૨૧॥

કૃષ્ણસ્યાપિ હિ ગાન્ધાર્યાઃ શાપેનૈવ કુલક્ષયઃ ।
પ્રદ્યુમ્નહરણં ચૈવ શમ્બરેણ કથં કૃતમ્ ॥ ૨૨॥

વર્તમાને વાસુદેવે દેવદેવે જનાર્દને ।
પુત્રસ્ય સૂતિકાગેહાદ્ધરણં ચાતિદુર્ઘટમ્ ॥ ૨૩॥

દ્વારકાદુર્ગમધ્યાદ્વૈ હરિવેશ્માદ્દુરત્યયાત્ ।
ન જ્ઞાતં વાસુદેવેન તત્કથં દિવ્યચક્ષુષા ॥ ૨૪॥

સન્દેહોઽયં મહાન્બ્રહ્મન્નિસન્દેહં કુરુ પ્રભો ।
યત્પત્ન્યો વાસુદેવસ્ય દસ્યુભિર્લુણ્ઠિતા હૃતાઃ ॥ ૨૫॥

સ્વર્ગતે દેવદેવે તુ તત્કથં મુનિસત્તમ ।
સંશયો જાયતે બ્રહ્મંશ્ચિત્તાન્દોલનકારકઃ ॥ ૨૬॥

વિષ્ણોરંશઃ સમુદ્ભૂતઃ શૌરિર્ભૂભારહારકૃત્ ।
સ કથં મથુરારાજ્યં ભયાત્ત્યક્ત્વા જનાર્દનઃ ॥ ૨૭॥

દ્વારવત્યાં ગતઃ સાધો સસૈન્યઃ સસુહૃદ્ગણઃ ।
અવતારો હરેઃ પ્રોક્તો ભૂભારહરણાય વૈ ॥ ૨૮॥

પાપાત્મનાં વિનાશાય ધર્મસંસ્થાપનાય ચ ।
તત્કથં વાસુદેવેન ચૌરાસ્તે ન નિપાતિતાઃ ॥ ૨૯॥

યૈર્હૃતા વાસુદેવસ્ય પત્ન્યઃ સંલુણ્ઠિતાશ્ચ તાઃ ।
સ્તેનાસ્તે કિં ન વિજ્ઞાતાઃ સર્વજ્ઞેન સતા પુનઃ ॥ ૩૦॥

ભીષ્મદ્રોણવધઃ કામં ભૂભારહરણે મતઃ ।
અર્ચિતાશ્ચ મહાત્માનઃ પાણ્ડવા ધર્મતત્પરાઃ ॥ ૩૧॥

કૃષ્ણભક્તાઃ સદાચારા યુધિષ્ઠિરપુરોગમાઃ ।
તે કૃત્વા રાજસૂયઞ્ચ યજ્ઞરાજં વિધાનતઃ ॥ ૩૨॥

દક્ષિણા વિવિધા દત્ત્વા બ્રાહ્મણેભ્યોઽતિભાવતઃ ।
પાણ્ડુપુત્રાસ્તુ દેવાંશા વાસુદેવાશ્રિતા મુને ॥ ૩૩॥

ઘોરં દુઃખં કથં પ્રાપ્તાઃ ક્વ ગતં સુકૃતઞ્ચ તત્ ।
કિં તત્પાપં મહારૌદ્રં યેન તે પીડિતાઃ સદા ॥ ૩૪॥

દ્રૌપદી ચ મહાભાગા વેદીમધ્યાત્સમુત્થિતા ।
રમાંશજા ચ સાધ્વી ચ કૃષ્ણભક્તિયુતા તથા ॥ ૩૫॥

સા કથં દુઃખમતુલં પ્રાપ ઘોરં પુનઃ પુનઃ ।
દુઃશાસનેન સા કેશે ગૃહીતા પીડિતા ભૃશમ્ ॥ ૩૬॥

રજસ્વલા સભાયાં તુ નીતા ભીતૈકવાસસા ।
વિરાટનગરે દાસી જાતા મત્સ્યસ્ય સા પુનઃ ॥ ૩૭॥

ધર્ષિતા કીચકેનાથ રુદતી કુરરી યથા ।

હૃતા જયદ્રથેનાથ ક્રન્દમાનાતિદુઃખિતા ॥ ૩૮॥

મોચિતા પાણ્ડવૈઃ પશ્ચાદ્બલવદ્ભિર્મહાત્મભિઃ ।
પૂર્વજન્મકૃતં પાપં કિં તદ્યેન ચ પીડિતાઃ ॥ ૩૯॥

દુઃખાન્યનેકાન્યાપ્તાસ્તે કથયાદ્ય મહામતે ।
રાજસૂયં ક્રતુવરં કૃત્વા તે મમ પૂર્વજાઃ ॥ ૪૦॥

દુઃખં મહત્તરં પ્રાપ્તાઃ પૂર્વજન્મકૃતેન વૈ ।
દેવાંશાનાં કથં તેષાં સંશયોઽયં મહાન્હિ મે ॥ ૪૧॥

સદાચારૈસ્તુ કૌન્તેયૈર્ભીષ્મદ્રોણાદયો હતાઃ ।
છલેન ધનલાભાર્થં જાનાનૈર્નશ્વરં જગત્ ॥ ૪૨॥

પ્રેરિતા વાસુદેવેન પાપે ઘોરે મહાત્મના ।
કુલં ક્ષયિતવન્તસ્તે હરિણા પરમાત્મના ॥ ૪૩॥

વરં ભિક્ષાટનં સાધોર્નીવારૈર્જીવનં વરમ્ ।
યોધાન્ન હત્વા લોભેન શિલ્પેન જીવનં વરમ્ ॥ ૪૪॥

વિચ્છિન્નસ્તુ ત્વયા વંશો રક્ષિતો મુનિસત્તમ ।
સમુત્પાદ્ય સુતાનાશુ ગોલકાચ્છત્રુનાશનાન્ ॥ ૪૫॥

સોઽલ્પેનૈવ તુ કાલેન વિરાટતનયાસુતઃ ।
તાપસસ્ય ગલે સર્પં ન્યસ્તવાન્કથમદ્ભુતમ્ ॥ ૪૬॥

નકોઽપિ બ્રાહ્મણં દ્વેષ્ટિ ક્ષત્રિયસ્ય કુલોદ્ભવઃ ।
તાપસં મૌનસંયુક્તં પિત્રા કિં તત્કૃતં મુને ॥ ૪૭॥

એતૈરન્યૈશ્ચ સન્દેહૈર્વિકલં મે મનોઽધુના ।
સ્થિરં કુરુ પિતઃ સાધો સર્વજ્ઞોઽસિ દયાનિધે ॥ ૪૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે જનમેજયપ્રશ્નાઃ પ્રથમોઽધ્યાયઃ ॥ ૪.૧॥

## ૪.૨ દ્વિતીયોઽધ્યાયઃ । કર્મણો જન્માદિકારણત્વનિરૂપણમ્ ।

સૂત ઉવાચ ।
એવં પૃષ્ટઃ પુરાણજ્ઞો વ્યાસઃ સત્યવતીસુતઃ ।
પરીક્ષિતસુતં શાન્તં તતો વૈ જનમેજયમ્ ॥ ૧॥

ઉવાચ સંશયચ્છેત્તૃ વાક્યં વાક્યવિશારદઃ ।
વ્યાસ ઉવાચ ।
રાજન્ કિમેતદ્વક્તવ્યં કર્મણાં ગહના ગતિઃ ॥ ૨॥

દુર્જ્ઞેયા કિલ દેવાનાં માનવાનાં ચ કા કથા ।
યદા સમુત્થિતં ચૈતદ્બ્રહ્માણ્ડં ત્રિગુણાત્મકમ્ ॥ ૩॥

કર્મણૈવ સમુત્પત્તિઃ સર્વેષાં નાત્ર સંશયઃ ।
અનાદિનિધના જીવાઃ કર્મબીજસમુદ્ભવાઃ ॥ ૪॥

નાનાયોનિષુ જાયન્તે મ્રિયન્તે ચ પુનઃ પુનઃ ।
કર્મણા રહિતો દેહસંયોગો ન કદાચન ॥ ૫॥

શુભાશુભૈસ્તથા મિશ્રૈઃ કર્મભિર્વેષ્ટિતં ત્વિદમ્ ।
ત્રિવિધાનિ હિ તાન્યાહુર્બુધાસ્તત્ત્વવિદશ્ચ યે ॥ ૬॥

સઞ્ચિતાનિ ભવિષ્યન્તિ પ્રારબ્ધાનિ તથા પુનઃ ।
વર્તમાનાનિ દેહેઽસ્મિંસ્ત્રૈવિધ્યં કર્મણાં કિલ ॥ ૭॥

બ્રહ્માદીનાં ચ સર્વેષાં તદ્વશત્વં નરાધિપ ।
સુખં દુઃખં જરામૃત્યુહર્ષશોકાદયસ્તથા ॥ ૮॥

કામક્રોધૌ ચ લોભશ્ચ સર્વે દેહગતા ગુણાઃ ।
દૈવાધીનાશ્ચ સર્વેષાં પ્રભવન્તિ નરાધિપ ॥ ૯॥

રાગદ્વેષાદયો ભાવાઃ સ્વર્ગેઽપિ પ્રભવન્તિ હિ ।
દેવાનાં માનવાનાઞ્ચ તિરશ્ચાં ચ તથા પુનઃ ॥ ૧૦॥

વિકારાઃ સર્વ એવૈતે દેહેન સહ સઙ્ગતાઃ ।
પૂર્વવૈરાનુયોગેન સ્નેહયોગેન વૈ પુનઃ ॥ ૧૧॥

ઉત્પત્તિઃ સર્વજન્તૂનાં વિના કર્મ ન વિદ્યતે ।
કર્મણા ભ્રમતે સૂર્યઃ શશાઙ્કઃ ક્ષયરોગવાન્ ॥ ૧૨॥

કપાલી ચ તથા રુદ્રઃ કર્મણૈવ ન સંશયઃ ।
અનાદિનિધનં ચૈતત્કારણં કર્મ વિદ્યતે ॥ ૧૩॥

તેનેહ શાશ્વતં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ।
નિત્યાનિત્યવિચારેઽત્ર નિમગ્ના મુનયઃ સદા ॥ ૧૪॥

ન જાનન્તિ કિમેતદ્વૈ નિત્યં વાનિત્યમેવ ચ ।
માયાયાં વિદ્યમાનાયાં જગન્નિત્યં પ્રતીયતે ॥ ૧૫॥

કાર્યાભાવઃ કથં વાચ્યઃ કારણે સતિ સર્વથા ।
માયા નિત્યા કારણઞ્ચ સર્વેષાં સર્વદા કિલ ॥ ૧૬॥

કર્મબીજં તતોઽનિત્યં ચિન્તનીયં સદા બુધૈઃ ।
ભ્રમત્યેવ જગત્સર્વં રાજન્કર્મનિયન્ત્રિતમ્ ॥ ૧૭॥

નાનાયોનિષુ રાજેન્દ્ર નાનાધર્મમયેષુ ચ ।
ઇચ્છયા ચ ભવેઞ્ચન્મ વિષ્ણોરમિતતેજસઃ ॥ ૧૮॥

યુગે યુગેષ્વનેકાસુ નીચયોનિષુ તત્કથમ્ ।
ત્યક્ત્વા વૈકુણ્ઠસંવાસં સુખભોગાનનેકશઃ ॥ ૧૯॥

વિણ્મૂત્રમન્દિરે વાસં સન્ત્રસ્તઃ કોઽભિવાઞ્છતિ ।
પુષ્પાવચયલીલાં ચ જલકેલિં સુખાસનમ્ ॥ ૨૦॥

ત્યક્ત્વા ગર્ભગૃહે વાસં કોઽભિવાચ્છતિ બુદ્ધિમાન્ ।
તૂલિકાં મૃદુસંયુક્તાં દિવ્યાં શય્યાં વિનિર્મિતામ્ ॥ ૨૧॥

ત્યક્ત્વાધોમુખવાસં ચ કોઽભિવાઞ્છતિ પણ્ડિતઃ ।
ગીતં નૃત્યઞ્ચ વાદ્યઞ્ચ નાનાભાવસમન્વિતમ્ ॥ ૨૨॥

મુક્ત્વા કો નરકે વાસં મનસાપિ વિચિન્તયેત્ ।
સિન્ધુજાદ્ભુતભાવાનાં રસં ત્યક્ત્વા સુદુસ્ત્વજમ્ ॥ ૨૩॥

વિણ્મૂત્રરસપાનઞ્જ ક ઇચ્છેન્મતિમાન્નરઃ ।
ગર્ભવાસાત્પરો નાસ્તિ નરકો ભુવનત્રયે ॥ ૨૪॥

તદ્ભીતાશ્ચ પ્રકુર્વન્તિ મુનયો દુસ્તરં તપઃ ।
હિત્વા ભોગઞ્ચ રાજ્યઞ્ચ વને યાન્તિ મનસ્વિનઃ ॥ ૨૫॥

યદ્ભીતાસ્તુ વિમૂઢાત્મા કસ્તં સેવિતુમિચ્છતિ ।
ગર્ભે તુદન્તિ કૃમયો જઠરાગ્નિસ્તપત્યધઃ ॥ ૨૬॥

વપાસંવેષ્ટનં કૂરં કિં સુખં તત્ર ભૂપતે ।
વરં કારાગૃહે વાસો બન્ધનં નિગડૈર્વરમ્ ॥ ૨૭॥

અલ્પમાત્રં ક્ષણં નૈવ ગર્ભવાસઃ ક્વચિચ્છુભઃ ।
ગર્ભવાસે મહદ્દુઃખં દશમાસનિવાસનમ્ ॥ ૨૮॥

તથા નિઃસરણે દુઃખં યોનિયન્ત્રેઽતિદારુણે ।
બાલભાવે તદા દુઃખં મૂકાજ્ઞભાવસંયુતમ્ ॥ ૨૯॥

ક્ષુત્તૃષ્ણાવેદનાશક્તઃ પરતન્ત્રોઽતિકાતરઃ ।
ક્ષુધિતે રુદિતે બાલે માતા ચિન્તાતુરા તદા ॥ ૩૦॥

ભેષજં પાતુમિચ્છન્તી જ્ઞાત્વા વ્યાધિવ્યથાં દૃઢામ્ ।
નાનાવિધાનિ દુઃખાનિ બાલભાવે ભવન્તિ વૈ ॥ ૩૧॥

કિં સુખં વિબુધા દૃષ્ટ્વા જન્મ વાઞ્છન્તિ ચેચ્છયા ।
સઙ્ગ્રામમમરૈઃ સાર્ધં સુખં ત્યક્ત્વા નિરન્તરમ્ ॥ ૩૨॥

કર્તુમિચ્છેચ્ચ કો મૂઢઃ શ્રમદં સુખનાશનમ્ ।
સર્વથૈવ નૃપશ્રેષ્ઠ સર્વે બ્રહ્માદયઃ સુરાઃ ॥ ૩૩॥

કૃતકર્મવિપાકેન પ્રાપ્નુવન્તિ સુખાસુખે ।
અવશ્યમેવ ભોક્તવ્યં કૃતં કર્મ શુભાશુભમ્ ।
દેહવદ્ભિર્નૃભિર્દેવૈસ્તિર્યગ્ભિશ્ચ નૃપોત્તમ ॥ ૩૪॥

તપસા દાનયજ્ઞૈશ્ચ માનવશ્ચેન્દ્રતાં વ્રજેત્ ।
ક્ષીણે પુણ્યેઽથ શક્રોઽપિ પતત્યેવ ન સંશયઃ ॥ ૩૫॥

રામાવતારયોગેન દેવા વાનરતાં ગતાઃ ।
તથા કૃષ્ણસહાયાર્થં દેવા યાદવતાં ગતાઃ ॥ ૩૬॥

એવં યુગે યુગે વિષ્ણુરવતારાનનેકશઃ ।
કરોતિ ધર્મરક્ષાર્થં બ્રહ્મણા પ્રેરિતો ભૃશમ્ ॥ ૩૭॥

પુનઃ પુનર્હરેરેવં નાનાયોનિષુ પાર્થિવ ।
અવતારા ભવન્ત્યન્યે રથચક્રવદદ્ભુતાઃ ॥ ૩૮॥

દૈત્યાનાં હનનં કર્મ કર્તવ્યં હરિણા સ્વયમ્ ।
અંશાંશેન પૃથિવ્યાં વૈ કૃત્વા જન્મ મહાત્મના ॥ ૩૯॥

તદહં સમ્પ્રવક્ષ્યામિ કૃષ્ણજન્મકથાં શુભામ્ ।
સ એવ ભગવાન્વિષ્ણુરવતીર્ણો યદોઃ કુલે ॥ ૪૦॥

કશ્યપસ્ય મુનેરંશો વસુદેવઃ પ્રતાપવાન્ ।
ગોવૃત્તિરભવદ્રાજન્ પૂર્વશાપાનુભાવતઃ ॥ ૪૧॥

કશ્યપસ્ય ચ દ્વે પત્ન્યૌ શાપાદત્ર મહીપતે ।
અદિતિઃ સુરસા ચૈવમાસતુઃ પૃથિવીપતે ॥ ૪૨॥

દેવકી રોહિણી ચોભે ભગિન્યૌ ભરતર્ષભ ।
વરુણેન મહાઞ્છાપો દત્તઃ કોપાદિતિ શ્રુતમ્ ॥ ૪૩॥

રાજોવાચ ।
કિં કૃતં કશ્યપેનાગો યેન શપ્તો મહાનૃષિઃ ।
સભાર્યઃ સ કથં જાતસ્તદ્વદસ્વ મહામતે ॥ ૪૪॥

કથઞ્ચ ભગવાન્વિષ્ણુસ્તત્ર જાતોઽસ્તિ ગોકુલે ।
વાસી વૈકુણ્ઠનિલયે રમાપતિરખણ્ડિતઃ ॥ ૪૫॥

નિદેશાત્કસ્ય ભગવાન્વર્તતે પ્રભુરવ્યયઃ ।
નારાયણઃ સુરશ્રેષ્ઠો યુગાદિઃ સર્વધારકઃ ॥ ૪૬॥

સ કથં સદનં ત્યક્ત્વા કર્મવાનિવ માનુષે ।
કરોતિ જનનં કસ્માદત્ર મે સંશયો મહાન્ ॥ ૪૭॥

પ્રાપ્ય માનુષદેહં તુ કરોતિ ચ વિડમ્બનમ્ ।
ભાવાન્નાનાવિધાંસ્તત્ર માનુષે દુષ્ટજન્મનિ ॥ ૪૮॥

કામઃ ક્રોધોઽમર્ષશોકૌ વૈરં પ્રીતિશ્ચ કર્હિચિત્ ।
સુખં દુઃખં ભયં નૃણાં દૈન્યમાર્જવમેવ ચ ॥ ૪૯॥

દુષ્કૃતં સુકૃતં ચૈવ વચનં હનનં તથા ।
પોષણં ચલનં તાપો વિમર્શશ્ચ વિકત્થનમ્ ॥ ૫૦॥

લોભો દમ્ભસ્તથા મોહઃ કપટઃ શોચનં તથા ।
એતે ચાન્યે તથા ભાવા માનુષ્યે સમ્ભવન્તિ હિ ॥ ૫૧॥

સ કથં ભગવાન્વિષ્ણુસ્ત્વક્ત્વા સુખમનશ્વરમ્ ।
કરોતિ માનુષં જન્મ ભાવૈસ્તૈસ્તૈરભિદ્રુતમ્ ॥ ૫૨॥

કિં સુખં માનુષં પ્રાપ્ય ભુવિ જન્મ મુનીશ્વર ।
કિં નિમિત્તં હરિઃ સાક્ષાદ્ગર્ભવાસં કરોતિ વૈ ॥ ૫૩॥

ગર્ભદુઃખં જન્મદુઃખં બાલભાવે તથા પુનઃ ।
યૌવને કામજં દુઃખં ગાર્હસ્ત્યેઽતિમહત્તરમ્ ॥ ૫૪॥

દુઃખાન્યેતાન્યવાપ્નોતિ માનુષે દ્વિજસત્તમ ।

કથં સ ભગવાન્વિષ્ણુરવતારાન્પુનઃ પુનઃ ॥ ૫૫॥

પ્રાપ્ય રામાવતારં હિ હરિણા બ્રહ્મયોનિના ।
દુઃખં મહત્તરં પ્રાપ્તં વનવાસેઽતિદારુણે ॥ ૫૬॥

સીતાવિરહજં દુઃખં સઙ્ગ્રામશ્ચ પુનઃ પુનઃ ।
કાન્તાત્યાગોઽપ્યનેનૈવમનુભૂતો મહાત્મના ॥ ૫૭॥

તથા કૃષ્ણાવતારેઽપિ જન્મ રક્ષાગૃહે પુનઃ ।
ગોકુલે ગમનં ચૈવ ગવાં ચારણમિત્યુત ॥ ૫૮॥

કંસસ્ય હનનં કષ્ટાદ્ દ્વારકાગમનં પુનઃ ।
નાનાસંસારદુઃખાનિ ભુક્તવાન્ભગવાન્ કથમ્ ॥ ૫૯॥

સ્વેચ્છયા કઃ પ્રતીક્ષેત મુક્તો દુઃખાનિ જ્ઞાનવાન્ ।
સંશયં છિન્ધિ સર્વજ્ઞ મમ ચિત્તપ્રશાન્તયે ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે કર્મણો જન્માદિકારણત્વનિરૂપણં નામ દ્વિતીયોઽધ્યાયઃ ॥ ૪.૨॥

## ૪.૩ તૃતીયોઽધ્યાયઃ । દિત્યા અદિત્યૈ શાપદાનમ્ ।

વ્યાસ ઉવાચ ।
કારણાનિ બહૂન્યત્રાપ્યવતારે હરેઃ કિલ ।
સર્વેષાં ચૈવ દેવાનામંશાવતરણેષ્વપિ ॥ ૧॥

વસુદેવાવતારસ્ય કારણં શ‍ૃણુ તત્ત્વતઃ ।
દેવક્યાશ્ચૈવ રોહિણ્યા અવતારસ્ય કારણમ્ ॥ ૨॥

એકદા કશ્યપઃ શ્રીમાન્યજ્ઞાર્થં ધેનુમાહરત્ ।
યાચિતોઽયં બહુવિધં ન દદૌ ધેનુમુત્તમામ્ ॥ ૩॥

વરુણસ્તુ તતો ગત્વા બ્રહ્માણં જગતઃ પ્રભુમ્ ।
પ્રણમ્યોવાચ દીનાત્મા સ્વદુઃખં વિનયાન્વિતઃ ॥ ૪॥

કિં કરોમિ મહાભાગ મત્તોઽસૌ ન દદાતિ ગામ્ ।
શાપો મયા વિસૃષ્ટોઽસ્મૈ ગોપાલો ભવ માનુષે ॥ ૫॥

ભાર્યે દ્વે અપિ તત્રૈવ ભવેતાં ચાતિદુઃખિતે ।
યતો વત્સા રુદન્ત્યત્ર માતૃહીનાઃ સુદુઃખિતાઃ ॥ ૬॥

મૃતવત્સાદિતિસ્તસ્માદ્ભવિષ્યતિ ધરાતલે ।
કારાગારનિવાસા ચ તેનાપિ બહુદુઃખિતા ॥ ૭॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય યાદોનાથસ્ય પદ્મભૂઃ ।
સમાહૂય મુનિં તત્ર તમુવાચ પ્રજાપતિઃ ॥ ૮॥

કસ્માત્ત્વયા મહાભાગ લોકપાલસ્ય ધેનવઃ ।
હૃતાઃ પુનર્ન દત્તાશ્ચ કિમન્યાયં કરોષિ ચ ॥ ૯॥

જાનન્ ન્યાયં મહાભાગ પરવિત્તાપહારણમ્ ।
કૃતવાન્કથમન્યાયં સર્વજ્ઞોઽસિ મહામતે ॥ ૧૦॥

અહો લોભસ્ય મહિમા મહતોઽપિ ન મુઞ્ચતિ ।
લોભં નરકદં નૂનં પાપાકરમસમ્મતમ્ ॥ ૧૧॥

કશ્યપોઽપિ ન તં ત્યક્તું સમર્થઃ કિં કરોમ્યહમ્ ।
સર્વદૈવાધિકસ્તસ્માલ્લોભો વૈ કલિતો મયા ॥ ૧૨॥

ધન્યાસ્તે મુનયઃ શાન્તા જિતો યૈર્લોભ એવ ચ ।
વૈખાનસૈઃ શમપરૈઃ પ્રતિગ્રહપરાઙ્મુખૈઃ ॥ ૧૩॥

સંસારે બલવાઞ્છત્રુર્લોભોઽમેધ્યોઽવરઃ સદા ।
કશ્યપોઽપિ દુરાચારઃ કૃતસ્નેહો દુરાત્મના ॥ ૧૪॥

બ્રહ્માપિ તં શશાપાથ કશ્યપં મુનિસત્તમમ્ ।
મર્યાદારક્ષણાર્થં હિ પૌત્રં પરમવલ્લભમ્ ॥ ૧૫॥

અંશેન ત્વં પૃથિવ્યાં વૈ પ્રાપ્ય જન્મ યદોઃ કુલે ।
ભાર્યાભ્યાં સંયુતસ્તત્ર ગોપાલત્વં કરિષ્યસિ ॥ ૧૬॥

વ્યાસ ઉવાચ ।
એવં શપ્તઃ કશ્યપોઽસૌ વરુણેન ચ બ્રહ્મણા ।
અંશાવતરણાર્થાય ભૂભારહરણાય ચ ॥ ૧૭॥

તથા દિત્યાદિતિઃ શપ્તા શોકસન્તપ્તયા ભૃશમ્ ।
જાતા જાતા વિનશ્યેરંસ્તવ પુત્રાસ્તુ સપ્ત વૈ ॥ ૧૮॥

જનમેજય ઉવાચ ।

કસ્માદ્દિત્યા ચ ભગિની શપ્તેન્દ્રજનની મુને ।
કારણં વદ શાપે ચ શોકસ્તુ મુનિસત્તમ ॥ ૧૯॥

સૂત ઉવાચ ।
પારીક્ષિતેન પૃષ્ટસ્તુ વ્યાસઃ સત્યવતીસુતઃ ।
રાજાનં પ્રત્યુવાચેદં કારણં સુસમાહિતઃ ॥ ૨૦॥

વ્યાસ ઉવાચ ।
રાજન્ દક્ષસુતે દ્વે તુ દિતિશ્ચાદિતિરુત્તમે ।
કશ્યપસ્ય પ્રિયે ભાર્યે બભૂવતુરુરુક્રમે ॥ ૨૧॥

અદિત્યાં મઘવા પુત્રો યદાભૂદતિવીર્યવાન્ ।
તદા તુ તાદૃશં પુત્રં ચકમે દિતિરોજસા ॥ ૨૨॥

પતિમાહાસિતાપાઙ્ગી પુત્રં મે દેહિ માનદ ।
ઇન્દ્રખ્યબલં વીરં ધર્મિષ્ઠં વીર્યવત્તમમ્ ॥ ૨૩॥

તામુવાચ મુનિઃ કાન્તે સ્વસ્થા ભવ મયોદિતે ।
વ્રતાન્તે ભવિતા તુભ્યં શતક્રતુસમઃ સુતઃ ॥ ૨૪॥

સા તથેતિ પ્રતિશ્રુત્ય ચકાર વ્રતમુત્તમમ્ ।
નિષિક્તં મુનિના ગર્ભં બિભ્રાણા સુમનોહરમ્ ॥ ૨૫॥

ભૂમૌ ચકાર શયનં પયોવ્રતપરાયણા ।
પવિત્રા ધારણાયુક્તા બભૂવ વરવર્ણિની ॥ ૨૬॥

એવં જાતઃ સુસમ્પૂર્ણો યદા ગર્ભોઽતિવીર્યવાન્ ।
શુભ્રાંશુમતિદીપ્તાઙ્ગીં દિતિં દૃષ્ટ્વા તુ દુઃખિતા ॥ ૨૭॥

મઘવત્સદૃશઃ પુત્રો ભવિષ્યતિ મહાબલઃ ।
દિત્યાસ્તદા મમ સુતસ્તેજોહીનો ભવેત્કિલ ॥ ૨૮॥

ઇતિ ચિન્તાપરા પુત્રમિન્દ્રં ચોવાચ માનિની ।
શત્રુસ્તેઽદ્ય સમુત્પન્નો દિતિગર્ભેઽતિવીર્યવાન્ ॥ ૨૯॥

ઉપાયં કુરુ નાશાય શત્રોરદ્ય વિચિન્ત્ય ચ ।
ઉત્પત્તિરેવ હન્તવ્યા દિત્યા ગર્ભસ્ય શોભન ॥ ૩૦॥

વીક્ષ્ય તામસિતાપાઙ્ગીં સપત્નીભાવમાસ્થિતામ્ ।
દુનોતિ હૃદયે ચિન્તા સુખમર્મવિનાશિની ॥ ૩૧॥

રાજયક્ષ્મેવ સંવૃદ્ધો નષ્ટો નૈવ ભવેદ્રિપુઃ ।
તસ્માદઙ્કુરિતં હન્યાદ્બુદ્ધિમાનહિતં કિલ ॥ ૩૨॥

લોહશઙ્કુરિવ ક્ષિપ્તો ગર્ભો વૈ હૃદયે મમ ।
યેન કેનાપ્યુપાયેન પાતયાદ્ય શતક્રતો ॥ ૩૩॥

સામદાનબલેનાપિ હિંસનીયસ્ત્વયા સુતઃ ।
દિત્યા ગર્ભો મહાભાગ મમ ચેદિચ્છસિ પ્રિયમ્ ॥ ૩૪॥

વ્યાસ ઉવાચ ।
શ્રુત્વા માતૃવચઃ શક્રો વિચિન્ત્ય મનસા તતઃ ।
જગામાપરમાતુઃ સ સમીપમમરાધિપઃ ॥ ૩૫॥

વવન્દે વિનયાત્પાદૌ દિત્યાઃ પાપમતિર્નૃપ ।
પ્રોવાચ વિનયેનાસૌ મધુરં વિષગર્ભિતમ્ ॥ ૩૬॥

ઇન્દ્ર ઉવાચ ।
માતસ્ત્વં વ્રતયુક્તાસિ ક્ષીણદેહાતિદુર્બલા ।
સેવાર્થમિહ સમ્પ્રાપ્તઃ કિં કર્તવ્યં વદસ્વ મે ॥ ૩૭॥

પાદસંવાહનં તેઽહં કરિષ્યામિ પતિવ્રતે ।
ગુરુશુશ્રૂષણાત્પુણ્યં લભતે ગતિમક્ષયામ્ ॥ ૩૮॥

ન મે કિમપિ ભેદોઽસ્તિ તથાદિત્યા શપે કિલ ।
ઇત્યુક્ત્વા ચરણૌ સ્પૃષ્ટ્વા સંવાહનપરોઽભવત્ ॥ ૩૯॥

સંવાહનસુખં પ્રાપ્ય નિદ્રામાપ સુલોચના ।
શ્રાન્તા વ્રતકૃશા સુપ્તા વિશ્વસ્તા પરમા સતી ॥ ૪૦॥

તાં નિદ્રાવશમાપન્નાં વિલોક્ય પ્રાવિશત્તનુમ્ ।
રૂપં કૃત્વાતિસૂક્ષ્મઞ્ચ શસ્ત્રપાણિઃ સમાહિતઃ ॥ ૪૧॥

ઉદરં પ્રવિવેશાશુ તસ્યા યોગબલેન વૈ ।
ગર્ભં ચકર્ત વજ્રેણ સપ્તધા પવિનાયકઃ ॥ ૪૨॥

રુરોદ ચ તદા બાલો વજ્રેણાભિહતસ્તથા ।
મા રુદેતિ શનૈર્વાક્યમુવાચ મઘવાનમુમ્ ॥ ૪૩॥

શકલાનિ પુનઃ સપ્ત સપ્તધા કર્તિતાનિ ચ ।
તદા ચૈકોનપઞ્ચાશન્મરુતશ્ચાભવન્નૃપ ॥ ૪૪॥

તદા પ્રબુદ્ધા સુદતી જ્ઞાત્વા ગર્ભં તથાકૃતમ્ ।
ઇન્દ્રેણ છલરૂપેણ ચુકોપ ભૃશદુઃખિતા ॥ ૪૫॥

ભગિનીકૃતં તુ સા બુદ્ધ્વા શશાપ કુપિતા તદા ।
અદિતિં મઘવન્તઞ્ચ સત્યવ્રતપરાયણા ॥ ૪૬॥

યથા મે કર્તિતો ગર્ભસ્તવ પુત્રેણ છદ્મના ।
તથા તન્નાશમાયાતુ રાજ્યં ત્રિભુવનસ્ય તુ ॥ ૪૭॥

યથા ગુપ્તેન પાપેન મમ ગર્ભો નિપાતિતઃ ।
અદિત્યા પાપચારિણ્યા યથા મે ઘાતિતઃ સુતઃ ॥ ૪૮॥

તસ્યાઃ પુત્રાસ્તુ નશ્યન્તુ જાતા જાતાઃ પુનઃ પુનઃ ।
કારાગારે વસત્વેષા પુત્રશોકાતુરા ભૃશમ્ ॥ ૪૯॥

અન્યજન્મનિ ચાપ્યેવ મૃતાપત્યા ભવિષ્યતિ ।
વ્યાસ ઉવાચ ।
ઇત્યુત્સૃષ્ટં તદા શ્રુત્વા શાપં મરીચિનન્દનઃ ॥ ૫૦॥

ઉવાચ પ્રણયોપેતો વચનં શમયન્નિવ ।
મા કોપં કુરુ કલ્યાણિ પુત્રાસ્તે બલવત્તરાઃ ॥ ૫૧॥

ભવિષ્યન્તિ સુરાઃ સર્વે મરુતો મઘવત્સખાઃ ।
શાપોઽયં તવ વામોરુ ત્વષ્ટાવિંશેઽથ દ્વાપરે ॥ ૫૨॥

અંશેન માનુષં જન્મ પ્રાપ્ય ભોક્ષ્યતિ ભામિની ।
વરુણેનાપિ દત્તોઽસ્તિ શાપઃ સન્તાપિતેન ચ ॥ ૫૩॥

ઉભયોઃ શાપયોગેન માનુષીયં ભવિષ્યતિ ।
વ્યાસ ઉવાચ ।
પતિનાશ્વાસિતા દેવી સન્તુષ્ટા સાભવત્તદા ॥ ૫૪॥

નોવાચ વિપ્રિયં કિઞ્ચિત્તતઃ સા વરવર્ણિની ।
ઇતિ તે કથિતં રાજન્ પૂર્વશાપસ્ય કારણમ્ ॥ ૫૫॥

અદિતિર્દેવકી જાતા સ્વાંશેન નૃપસત્તમ ॥ ૫૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે દિત્યા અદિત્યૈ શાપદાનં નામ તૃતીયોઽધ્યાયઃ ॥ ૪.૩॥

## ૪.૪ ચતુર્થોઽધ્યાયઃ । અધમજગતઃ સ્થિતિવર્ણનમ્ ।

રાજોવાચ ।
વિસ્મિતોઽસ્મિ મહાભાગ શ્રુત્વાખ્યાનં મહામતે ।
સંસારોઽયં પાપરૂપઃ કથં મુચ્યેત બન્ધનાત્ ॥ ૧॥

કશ્યપસ્યાપિ દાયાદસ્ત્રિલોકીવિભવે સતિ ।
કૃતવાનીદૃશં કર્મ કો ન કુર્યાજ્જુગુપ્સિતમ્ ॥ ૨॥

ગર્ભે પ્રવિશ્ય બાલસ્ય હનનં દારુણં કિલ ।
સેવામિષેણ માતુશ્ચ કૃત્વા શપથમદ્ભુતમ્ ॥ ૩॥

શાસ્તા ધર્મસ્ય ગોપ્તા ચ ત્રિલોક્યાઃ પતિરપ્યુત ।
કૃતવાનીદૃશં કર્મ કો ન કુર્યાદસામ્પ્રતમ્ ॥ ૪॥

પિતામહા મે સઙ્ગ્રામે કુરુક્ષેત્રેઽતિદારુણમ્ ।
કૃતવન્તસ્તથાશ્ચર્યં દુષ્ટં કર્મ જગદ્ગુરો ॥ ૫॥

ભીષ્મોદ્રોણઃ કૃપઃ કર્ણો ધર્માંશોઽપિ યુધિષ્ઠિરઃ ।
સર્વે વિરુદ્ધધર્મેણ વાસુદેવેન નોદિતાઃ ॥ ૬॥

અસારતાં વિજાનન્તઃ સંસારસ્ય સુમેધસઃ ।
દેવાંશાશ્ચ કથં ચક્રુર્નિન્દિતં ધર્મતત્પરાઃ ॥ ૭॥

કાસ્થા ધર્મસ્ય વિપ્રેન્દ્ર પ્રમાણં કિં વિનિશ્ચિતમ્ ।
ચલચિત્તોઽસ્મિ સઞ્જાતઃ શ્રુત્વા ચૈતત્કથાનકમ્ ॥ ૮॥

આપ્તવાક્યં પ્રમાણં ચેદાપ્તઃ કઃ પરદેહવાન્ ।
પુરુષો વિષયાસક્તો રાગી ભવતિ સર્વથા ॥ ૯॥

રાગો દ્વેષો ભવેન્નૂનમર્થનાશાદસંશયમ્ ।
દ્વેષાદસત્યવચનં વક્તવ્યં સ્વાર્થસિદ્ધયે ॥ ૧૦॥

જરાસન્ધવિઘાતાર્થં હરિણા સત્ત્વમૂર્તિના ।
છલેન રચિતં રૂપં બ્રાહ્મણસ્ય વિજાનતા ॥ ૧૧॥

તદાપ્તઃ કઃ પ્રમાણં કિં સત્ત્વમૂર્તિરપીદૃશઃ ।
અર્જુનોઽપિ તથૈવાત્ર કાર્યે યજ્ઞવિનિર્મિતે ॥ ૧૨॥

કીદૃશોઽયં કૃતો યજ્ઞઃ કિમર્થં શમવર્જિતઃ ।
પરલોકપદાર્થં વા યશસે વાન્યથા કિલ ॥ ૧૩॥

ધર્મસ્ય પ્રથમઃ પાદઃ સત્યમેતચ્છ્રુતેર્વચઃ ।
દ્વિતીયસ્તુ તથા શૌચં દયા પાદસ્તૃતીયકઃ ॥ ૧૪॥

દાનં પાદશ્ચતુર્થશ્ચ પુરાણજ્ઞા વદન્તિ વૈ ।
તૈર્વિહીનઃ કથં ધર્મસ્તિષ્ઠેદિહ સુસમ્મતઃ ॥ ૧૫॥

ધર્મહીનં કૃતં કર્મ કથં તત્ફલદં ભવેત્ ।
ધર્મે સ્થિરા મતિઃ ક્વાપિ ન કસ્યાપિ પ્રતીયતે ॥ ૧૬॥

છલાર્થઞ્ચ યદા વિષ્ણુર્વામનોઽભૂજ્જગત્પ્રભુઃ ।
યેન વામનરૂપેણ વઞ્ચિતોઽસૌ બલિર્નૃપઃ ॥ ૧૭॥

વિહર્તા શતયજ્ઞસ્ય વેદાજ્ઞાપરિપાલકઃ ।
ધર્મિષ્ઠો દાનશીલશ્ચ સત્યવાદી જિતેન્દ્રિયઃ ॥ ૧૮॥

સ્થાનાત્પ્રભ્રંશિતોઽકસ્માદ્વિષ્ણુના પ્રભવિષ્ણુના ।
જિતં કેન તયોઃ કૃષ્ણ બલિના વામનેન વા ॥ ૧૯॥

છલકર્મવિદા ચાયં સન્દેહોઽત્ર મહાન્મમ ।
વઞ્ચયિત્વા વઞ્ચિતેન સત્યં વદ દ્વિજોત્તમ ॥ ૨૦॥

પુરાણકર્તા ત્વમસિ ધર્મજ્ઞશ્ચ મહામતિઃ ।
વ્યાસ ઉવાચ ।
જિતં વૈ બલિના રાજન્ દત્તા યેન ચ મેદિની ॥ ૨૧॥

ત્રિવિક્રમોઽપિ નામ્ના યઃ પ્રથિતો વામનોઽભવત્ ।
છલનાર્થમિદં રાજન્વામનત્વં નરાધિપ ॥ ૨૨॥

સમ્પ્રાપ્તં હરિણા ભૂયો દ્વારપાલત્વમેવ ચ ।
સત્યાદન્યતરન્નાસ્તિ મૂલં ધર્મસ્ય પાર્થિવ ॥ ૨૩॥

દુઃસાધ્યં દેહિનાં રાજન્સત્યં સર્વાત્મના કિલ ।
માયા બલવતી ભૂપ ત્રિગુણા બહુરૂપિણી ॥ ૨૪॥

યયેદં નિર્મિતં વિશ્વં ગુણૈઃ શબલિતં ત્રિભિઃ ।
તસ્માચ્છલવતા સત્યં કુતોઽવિદ્ધં ભવેન્નૃપ ॥ ૨૫॥

મિશ્રેણ જનિતા ચૈવ સ્થિતિરેષા સનાતની ।
વૈખાનસાશ્ચ મુનયો નિઃસઙ્ગા નિષ્પ્રતિગ્રહાઃ ॥ ૨૬॥

સત્યયુક્તા ભવન્ત્યત્ર વીતરાગા ગતસ્પૃહાઃ ।
દૃષ્ટાન્તદર્શનાર્થાય નિર્મિતાસ્તે ચ તાદૃશાઃ ॥ ૨૭॥

અન્યત્સર્વં શબલિતં ગુણૈરેભિસ્ત્રિભિર્નૃપ ।
નૈકં વાક્યં પુરાણેષુ વેદેષુ નૃપસત્તમ ॥ ૨૮॥

ધર્મશાસ્ત્રેષુ ચાઙ્ગેષુ સગુણૈ રચિતેષ્વિહ ।
સગુણઃ સગુણં કુર્યાન્નિર્ગુણો ન કરોતિ વૈ ॥ ૨૯॥

ગુણાસ્તે મિશ્રિતાઃ સર્વે ન પૃથગ્ભાવસઙ્ગતાઃ ।
નિર્વ્યલીકે સ્થિરે ધર્મે મતિઃ કસ્યાપિ ન સ્થિરા ॥ ૩૦॥

ભવોદ્ભવે મહારાજ માયયા મોહિતસ્ય વૈ ।
ઇન્દ્રિયાણિ પ્રમાથીનિ તદાસક્તં મનસ્તથા ॥ ૩૧॥

કરોતિ વિવિધાન્ભાવાન્ગુણૈસ્તૈઃ પ્રેરિતો ભૃશમ્ ।
બ્રહ્માદિસ્તમ્બપર્યન્તાઃ પ્રાણિનઃ સ્થિરજઙ્ગમાઃ ॥ ૩૨॥

સર્વે માયાવશા રાજન્ સાનુક્રીડતિ તૈરિહ ।
સર્વાન્વૈ મોહયત્યેષા વિકુર્વત્યનિશં જગત્ ॥ ૩૩॥

અસત્યો જાયતે રાજન્કાર્યવાન્પ્રથમં નરઃ ।
ઇન્દ્રિયાર્થાંશ્ચિન્તયાનો ન પ્રાપ્નોતિ યદા નરઃ ॥ ૩૪॥

તદર્થં છલમાદત્તે છલાત્પાપે પ્રવર્તતે ।
કામઃ ક્રોધશ્ચ લોભશ્ચ વૈરિણો બલવત્તરાઃ ॥ ૩૫॥

કૃતાકૃતં ન જાનન્તિ પ્રાણિનસ્તદ્વશં ગતાઃ ।
વિભવે સત્યહઙ્કારઃ પ્રબલઃ પ્રભવત્યપિ ॥ ૩૬॥

અહઙ્કારાદ્ભવેન્મોહો મોહાન્મરણમેવ ચ ।
સઙ્કલ્પા બહવસ્તત્ર વિકલ્પાઃ પ્રભવન્તિ ચ ॥ ૩૭॥

ઈર્ષ્યાસૂયા તથા દ્વેષઃ પ્રાદુર્ભવતિ ચેતસિ ।
આશા તૃષ્ણા તથા દૈન્યં દમ્ભોઽધર્મમતિસ્તથા ॥ ૩૮॥

પ્રાણિનાં પ્રભવન્ત્યેતે ભાવા મોહસમુદ્ભવાઃ ।
યજ્ઞદાનાનિ તીર્થાનિ વ્રતાનિ નિયમાસ્તથા ॥ ૩૯॥

અહઙ્કારાભિભૂતસ્તુ કરોતિ પુરુષોઽન્વહમ્ ।
અહમ્ભાવકૃતં સર્વં પ્રભવેદ્વૈ ન શૌચવત્ ॥ ૪૦॥

રાગલોભાત્કૃતં કર્મ સર્વાઙ્ગં શુદ્ધિવર્જિતમ્ ।
પ્રથમં દ્રવ્યશુદ્ધિશ્ચ દ્રષ્ટવ્યા વિબુધૈઃ કિલ ॥ ૪૧॥

અદ્રોહેણાર્જિતં દ્રવ્યં પ્રશસ્તં ધર્મકર્મણિ ।
દ્રોહાર્જિતેન દ્રવ્યેણ યત્કરોતિ શુભં નરઃ ॥ ૪૨॥

વિપરીતં ભવેત્તત્તુ ફલકાલે નૃપોત્તમ ।
મનોઽતિનિર્મલં યસ્ય સ સમ્યક્ફલભાગ્ભવેત્ ॥ ૪૩॥

તસ્મિન્વિકારયુક્તે તુ ન યથાર્થફલં લભેત્ ।
કર્તારઃ કર્મણાં સર્વે આચાર્યઋત્વિજાદયઃ ॥ ૪૪॥

સ્યુસ્તે વિશુદ્ધમનસસ્તદા પૂર્ણં ભવેત્ફલમ્ ।
દેશકાલક્રિયાદ્રવ્યકર્તૄણાં શુદ્ધતા યદિ ॥ ૪૫॥

મન્ત્રાણાં ચ તદા પૂર્ણં કર્મણાં ફલમશ્નુતે ।
શત્રૂણાં નાશમુદ્દિશ્ય સ્વવૃદ્ધિં પરમાં તથા ॥ ૪૬॥

કરોતિ સુકૃતં તદ્વદ્વિપરીતં ભવેત્કિલ ।
સ્વાર્થાસક્તઃ પુમાન્નિત્યં ન જાનાતિ શુભાશુભમ્ ॥ ૪૭॥

દૈવાધીનઃ સદા કુર્યાત્પાપમેવ ન સત્કૃતમ્ ।
પ્રાજાપત્યાઃ સુરાઃ સર્વે હ્યસુરાશ્ચ તદુદ્ભવાઃ ॥ ૪૮॥

સર્વે તે સ્વાર્થનિરતાઃ પરસ્પરવિરોધિનઃ ।
સત્ત્વોદ્ભવાઃ સુરાઃ સર્વેઽપ્યુક્તા વેદેષુ માનુષાઃ ॥ ૪૯॥

રજોદ્ભવાસ્તામસાસ્તુ તિર્યઞ્ચઃ પરિકીર્તિતાઃ ।
સત્ત્વોદ્ભવાનાં તૈર્વૈરં પરસ્પરમનારતમ્ ॥ ૫૦॥

તિરશ્ચામત્ર કિં ચિત્રં જાતિવૈરસમુદ્ભવે ।
સદા દ્રોહપરા દેવાસ્તપોવિઘ્નકરાસ્તથા ॥ ૫૧॥

અસન્તુષ્ટા દ્વેષપરાઃ પરસ્પરવિરોધિનઃ ।
અહઙ્કારસમુદ્ભૂતઃ સંસારોઽયં યતો નૃપ ॥ ૫૨॥

રાગદ્વેષવિહીનસ્તુ સ કથં જાયતે નૃપ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે અધમજગતઃ સ્થિતિવર્ણનં નામ ચતુર્થોઽધ્યાયઃ ॥ ૪.૪॥

## ૪.૫ પઞ્ચમોઽધ્યાયઃ । નરનારાયણકથાવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
અથ કિં બહુનોક્તેન સંસારેઽસ્મિન્નૃપોત્તમ ।
ધર્માત્માદ્રોહબુદ્ધિસ્તુ કશ્ચિદ્ભવતિ કર્હિચિત્ ॥ ૧॥

રાગદ્વેષાવૃતં વિશ્વં સર્વં સ્થાવરજઙ્ગમમ્ ।
આદ્યે યુગેઽપિ રાજેન્દ્ર કિમદ્ય કલિદૂષિતે ॥ ૨॥

દેવાઃ સેર્ષ્યાશ્ચ સદ્રોહાશ્છલકર્મરતાઃ સદા ।
માનુષાણાં તિરશ્ચાં ચ કા વાર્તા નૃપ ગણ્યતે ॥ ૩॥

દ્રોહપરે દ્રોહપરો ભવેદિતિ સમાનતા ।
અદ્રોહિણિ તથા શાન્તે વિદ્વેષઃ ખલતા સ્મૃતા ॥ ૪॥

યઃ કશ્ચિત્તાપસઃ શાન્તો જપધ્યાનપરાયણઃ ।
ભવેત્તસ્ય જપે વિઘ્નકર્તા વૈ મઘવા પરમ્ ॥ ૫॥

સતાં સત્યયુગં સાક્ષાત્સર્વદૈવાસતાં કલિઃ ।
મધ્યમો મધ્યમાનાં તુ ક્રિયાયોગૌ યુગે સ્મૃતૌ ॥ ૬॥

કશ્ચિત્કદાચિદ્ભવતિ સત્યધર્માનુવર્તકઃ ।
અન્યથાન્યયુગાનાં વૈ સર્વે ધર્મપરાયણાઃ ॥ ૭॥

વાસના કારણં રાજન્ સર્વત્ર ધર્મસંસ્થિતૌ ।
તસ્યાં વૈ મલિનાયાં તુ ધર્મોઽપિ મલિનો ભવેત્ ॥ ૮॥

મલિના વાસના સત્યં વિનાશાયેતિ સર્વથા ।
બ્રહ્મણો હૃદયાજ્જાતઃ પુત્રો ધર્મ ઇતિ સ્મૃતઃ ॥ ૯॥

બ્રાહ્મણઃ સત્યસમ્પન્નો વેદધર્મરતઃ સદા ।
દક્ષસ્ય દુહિતારો હિ વૃતા દશ મહાત્મના ॥ ૧૦॥

વિવાહવિધિના સમ્યઙ્મુનિના ગૃહધર્મિણા ।
તાસ્વજીજનયત્પુત્રાન્ધર્મઃ સત્યવતાં વરઃ ॥ ૧૧॥

હરિં કૃષ્ણં નરં ચૈવ તથા નારાયણં નૃપ ।
યોગાભ્યાસરતો નિત્યં હરિઃ કૃષ્ણો બભૂવ હ ॥ ૧૨॥

નરનારાયણૌ ચૈવ ચેરતુસ્તપ ઉત્તમમ્ ।
પ્રાલેયાદ્રિં સમાગત્ય તીર્થે બદરિકાશ્રમે ॥ ૧૩॥

તપસ્વિષુ ધુરીણૌ તૌ પુરાણૌ મુનિસત્તમૌ ।
ગૃણન્તૌ તત્પરં બ્રહ્મ ગઙ્ગાયા વિપુલે તટે ॥ ૧૪॥

હરેરંશૌ સ્થિતૌ તત્ર નરનારાયણાવૃષી ।
પૂર્ણં વર્ષસહસ્રં તુ ચક્રાતે તપ ઉત્તમમ્ ॥ ૧૫॥

તાપિતં ચ જગત્સર્વં તપસા સચરાચરમ્ ।
નરનારાયણાભ્યાં ચ શક્રઃ ક્ષોભં તદા યયૌ ॥ ૧૬॥

ચિન્તાવિષ્ટઃ સહસ્રાક્ષો મનસા સમકલ્પયત્ ।
કિં કર્તવ્યં ધર્મપુત્રૌ તાપસૌ ધ્યાનસંયુતૌ ॥ ૧૭॥

સિદ્ધાર્થૌ સુભૃશં શ્રેષ્ઠમાસનં મે ગ્રહીષ્યતઃ ।
વિઘ્નઃ કથં પ્રકર્તવ્યસ્તપો યેન ભવેન્ન હિ ॥ ૧૮॥

ઉત્પાદ્ય કામં ક્રોધઞ્ચ લોભં વાપ્યતિદારુણમ્ ।
ઇત્યુદ્દિશ્ય સહસ્રાક્ષઃ સમારુહ્ય ગજોત્તમમ્ ॥ ૧૯॥

વિઘ્નકામસ્તુ તરસા જગામ ગન્ધમાદનમ્ ।
ગત્વા તત્રાશ્રમે પુણ્યે તાવપશ્યચ્છતક્રતુઃ ॥ ૨૦॥

તપસા દીપ્તદેહૌ તુ ભાસ્કરાવિવ ચોદિતૌ ।
બ્રહ્મવિષ્ણૂ કિમેતૌ વૈ પ્રકટૌ વા વિભાવસૂ ॥ ૨૧॥

ધર્મપુત્રાવૃષી એતૌ તપસા કિં કરિષ્યતઃ ।
ઇતિ સઞ્ચિન્ત્ય તૌ દૃષ્ટ્વા તદોવાચ શચીપતિઃ ॥ ૨૨॥

કિં વા કાર્યં મહાભાગૌ બ્રૂતં ધર્મસુતૌ કિલ ।
દદામિ વાં વરં શ્રેષ્ઠં દાતું યાતોઽસ્મ્યહમૃષી ॥ ૨૩॥

અદેયમપિ દાસ્યામિ તુષ્ટોઽસ્મિ તપસા કિલ ।
વ્યાસ ઉવાચ ।
એવં પુનઃ પુનઃ શક્રસ્તાવુવાચ પુરઃ સ્થિતઃ ॥ ૨૪॥

નોચતુસ્તાવૃષી ધ્યાનસંસ્થિતૌ દૃઢચેતસૌ ।
તતો વૈ મોહિનીં માયાં ચકાર ભયદાં વૃષઃ ॥ ૨૫॥

વૃકાન્સિંહાંશ્ચ વ્યાઘ્રાંશ્ચ સમુત્પાદ્યાબિભીષયત્ ।

વર્ષં વાતં તથા વહ્નિં સમુત્પાદ્ય પુનઃ પુનઃ ॥ ૨૬॥

ભીષયામાસ તૌ શક્રો માયાં કૃત્વા વિમોહિનીમ્ ।
ભયતોઽપિ વશં નીતૌ ન તૌ ધર્મસુતૌ મુની ॥ ૨૭॥

નરનારાયણૌ દૃષ્ટ્વા શક્રઃ સ્વભવનં ગતઃ ।
વરદાને પ્રલુબ્ધૌ ન ન ભીતૌ વહ્નિવાયુતઃ ॥ ૨૮॥

વ્યાઘ્રસિંહાદિભિઃ કાન્તૌ ચલિતૌ નાશ્રમાત્સ્વકાત્ ।
ન તયોર્ધ્યાનભઙ્ગં વૈ કર્તું કોઽપિ ક્ષમોઽભવત્ ॥ ૨૯॥

ઇન્દ્રોઽપિ સદનં ગત્વા ચિન્તયામાસ દુઃખિતઃ ।
ચલિતૌ ભયલોભાભ્યાં નેમૌ મુનિવરોત્તમૌ ॥ ૩૦॥

ચિન્તયન્તૌ મહાવિદ્યામાદિશક્તિં સનાતનીમ્ ।
ઈશ્વરીં સર્વલોકાનાં પરાં પ્રકૃતિમદ્ભુતામ્ ॥ ૩૧॥

ધ્યાયતાં કઃ ક્ષમો લોકે બહુમાયાવિદપ્યુત ।
યન્મૂલાઃ સકલા માયા દેવાસુરકૃતાઃ કિલ ॥ ૩૨॥

તે કથં બાધિતું શક્તા ધ્યાયન્તિ ગતકલ્મષાઃ ।
વાગ્બીજં કામબીજઞ્ચ માયાબીજં તથૈવ ચ ॥ ૩૩॥

ચિત્તે યસ્ય ભવેત્તં તુ બાધિતું કોઽપિ ન ક્ષમઃ ।
માયયા મોહિતઃ શક્રો ભૂયસ્તસ્ય પ્રતિક્રિયામ્ ॥ ૩૪॥

કર્તું કામવસન્તૌ તુ સમાહૂયાબ્રવીદ્વચઃ ।
મનોભવ વસન્તેન રત્યા યુક્તો વ્રજાધુના ॥ ૩૫॥

અપ્સરોભિઃ સમાયુક્તસ્તરસા ગન્ધમાદનમ્ ।
નરનારાયણૌ તત્ર પુરાણાવૃષિસત્તમૌ ॥ ૩૬॥

કુરુતસ્તપ એકાન્તે સ્થિતૌ બદરિકાશ્રમે ।
ગત્વા તત્ર સમીપે તુ તયોર્મન્મથ માર્ગણૈઃ ॥ ૩૭॥

ચિત્તં કામાતુરં કાર્યં કુરુ કાર્યં મમાધુના ।
મોહયિત્વોચ્ચાટયિત્વા વિશિખૈસ્તાડયાશુ ચ ॥ ૩૮॥

વશીકુરુ મહાભાગ મુની ધર્મસુતાવપિ ।
કો હ્યસ્મિન્ સર્વસંસારે દેવો દૈત્યોઽથ માનવઃ ॥ ૩૯॥

યસ્તે બાણવશં પ્રાપ્તો ન યાતિ ભૃશતાડિતઃ ।
બ્રહ્માહં ગિરિજાનાથશ્ચન્દ્રો વહ્નિર્વિમોહિતઃ ॥ ૪૦॥

ગણના કાનયોઃ કામ ત્વદ્બાણાનાં પરાક્રમે ।
વારાઙ્ગનાગણોઽયં તે સહાયાર્થં મયેરિતઃ ॥ ૪૧॥

આગમિષ્યતિ તત્રૈવ રમ્ભાદીનાં મનોરમઃ ।
એકા તિલોત્તમા રમ્ભા કાર્યં સાધયિતું ક્ષમા ॥ ૪૨॥

ત્વમેવૈકઃ ક્ષમઃ કામં મિલિતૈઃ કસ્તુ સંશયઃ ।
કુરુ કાર્યં મહાભાગ દદામિ તવ વાઞ્છિતમ્ ॥ ૪૩॥

પ્રલોભિતૌ મયાત્યર્થં વરદાનૈસ્તપસ્વિનૌ ।
સ્થાનાન્ન ચલિતૌ શાન્તૌ વૃથાયં મે ગતઃ શ્રમઃ ॥ ૪૪॥

તથા વૈ માયયા કૃત્વા ભીષિતૌ તાપસૌ ભૃશમ્ ।
તથાપિ નોત્થિતૌ સ્થાનાદ્દેહરક્ષાપરૌ ન તૌ ॥ ૪૫॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા શક્રં પ્રાહ મનોભવઃ ।
વાસવાદ્ય કરિષ્યામિ કાર્યં તે મનસેપ્સિતમ્ ॥ ૪૬॥

યદિ વિષ્ણું મહેશં વા બ્રહ્માણં વા દિવાકરમ્ ।
ધ્યાયન્તૌ તૌ તદાસ્માકં ભવિતારૌ વશૌ મુની ॥ ૪૭॥

દેવીભક્તં વશીકર્તું નાહં શક્તઃ કથઞ્ચન ।
કામરાજ મહાબીજં ચિન્તયન્તં મનસ્યલમ્ ॥ ૪૮॥

તાં દેવીં ચેન્મહાશક્તિં સંશ્રિતૌ ભક્તિભાવતઃ ।
ન તદા મમ બાણાનાં ગોચરૌ તાપસૌ કિલ ॥ ૪૯॥

ઇન્દ્ર ઉવાચ ।
ગચ્છ ત્વં ચ મહાભાગ સર્વૈસ્તત્ર સમુદ્યતૈઃ ।
કાર્યં મમાતિદુઃસાધ્યં કર્તા હિતમનુત્તમમ્ ॥ ૫૦॥

વ્યાસ ઉવાચ ।
ઇતિ તેન સમાદિષ્ટા યયુઃ સર્વે સમુદ્યતાઃ ।
યત્ર તૌ ધર્મપુત્રૌ દ્વૌ તેપાતે દુષ્કરં તપઃ ॥ ૫૧॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં

ચતુર્થસ્કન્ધે નરનારાયણકથાવર્ણનં નામ પઞ્ચમોઽધ્યાયઃ ॥ ૪.૫॥

## ૪.૬ ષષ્ઠોઽધ્યાયઃ । અપ્સરાં નારાયણસમીપે પ્રાર્થનાકરણમ્ ।

વ્યાસ ઉવાચ ।
પ્રથમં તત્ર સમ્પ્રાપ્તો વસન્તઃ પર્વતોત્તમે ।
પુષ્પિતાઃ પાદપાઃ સર્વે દ્વિરેફાલિવિરાજિતાઃ ॥ ૧॥

આમ્રાશ્ચ બકુલા રમ્યાસ્તિલકાઃ કિંશુકાઃ શુભા ।
સાલાસ્તાલાસ્તમાલાશ્ચ મધૂકાઃ પુષ્પિતા બભુઃ ॥ ૨॥

બભૂવુઃ કોકિલાલાપા વૃક્ષાગ્રેષુ મનોહરાઃ ।
વલ્લ્યોઽપિ પુષ્પિતાઃ સર્વા આલિલિઙ્ગુર્નગોત્તમાન્ ॥ ૩॥

પ્રાણિનઃ સ્વાસુ ભાર્યાસુ પ્રેમયુક્તાઃ સ્મરાતુરાઃ ।
બભૂવુશ્ચાતિમત્તાશ્ચ ક્રીડાસક્તાઃ પરસ્પરમ્ ॥ ૪॥

વવુર્મન્દાઃ સુગન્ધાશ્ચ સુસ્પર્શા દક્ષિણાનિલાઃ ।
ઇન્દ્રિયાણિ પ્રમાથીનિ મુનીનામપિ ચાભવન્ ॥ ૫॥

રતિયુક્તસ્તતઃ કામઃ પૂરયન્પઞ્ચમાર્ગણાન્ ।
ચકાર ત્વરિતસ્તત્ર વાસં બદરિકાશ્રમે ॥ ૬॥

રમ્ભા તિલોત્તમાદ્યાશ્ચ ગત્વા તત્ર વરાશ્રમે ।
ગાનં ચકુઃ સુગીતજ્ઞાઃ સ્વરતાનસમન્વિતમ્ ॥ ૭॥

તચ્છ્રુત્વા મધુરોદ્ગીતં કોકિલાનાઞ્ચ કૂજિતમ્ ।
ભ્રમરાલિવિરાવઞ્ચ પ્રબુદ્ધૌ તૌ મુનીશ્વરૌ ॥ ૮॥

ઋતુરાજમકાલે તુ દૃષ્ટ્વા તૌ પુષ્પિતં વનમ્ ।
જાતૌ ચિન્તાપરૌ તત્ર નરનારાયણાવૃષી ॥ ૯॥

કિમદ્ય શિશિરાપાયઃ સમ્ભૃતઃ સમયં વિના ।
પ્રાણિનો વિહ્વલાઃ સર્વે લક્ષ્યન્તેઽતિસ્મરાતુરાઃ ॥ ૧૦॥

કાલધર્મવિપર્યાસઃ કથમદ્ય દુરાસદઃ ।
નરં નારાયણઃ પ્રાહ વિસ્મયોત્ફુલ્લલોચનઃ ॥ ૧૧॥

નારાયણ ઉવાચ ।
પશ્ય ભ્રાતરિમે વૃક્ષાઃ પુષ્પિતાઃ પ્રતિભાન્તિ વૈ ।

કોકિલાલાપસઙ્ઘુષ્ટા ભ્રમરાલિવિરાજિતાઃ ॥ ૧૨॥

શિશિરં ભીમમાતઙ્ગં દારયન્સ્વખરૈર્નખૈઃ ।
વસન્તકેસરી પ્રાપ્તઃ પલાશકુસુમૈર્મુને ॥ ૧૩॥

રક્તાશોકકરા તન્વી દેવર્ષે કિંશુકાઙ્ઘ્રિકા ।
નીલાશોકકચા શ્યામા વિકાસિકમલાનના ॥ ૧૪॥

નીલેન્દીવરનેત્રા સા બિલ્વવૃક્ષફલસ્તની ।
પ્રોત્ફુલ્લકુન્દરદના મઞ્જરીકર્ણશોભિતા ॥ ૧૫॥

બન્ધુજીવાધરા શુભ્રા સિન્ધુવારનખોદ્ભવા ।
પુંસ્કોકિલસ્વરા પુણ્યા કદમ્બવસના શુભા ॥ ૧૬॥

બર્હિવૃન્દકલાપા ચ સારસસ્વનનૂપુરા ।
વાસન્તી બદ્ધરશના મત્તહંસગતિસ્તથા ॥ ૧૭॥

પુત્રજીવાંશુકન્યસ્તરોમરાજિવિરાજિતા ।
વસન્તલક્ષ્મીઃ સમ્પ્રાપ્તા બ્રહ્મન્ બદરિકાશ્રમે ॥ ૧૮॥

અકાલે કિમિયં પ્રાપ્તા વિસ્મયોઽયં મમાધુના ।
તપોવિઘ્નકરા નૂનં દેવર્ષે પરિચિન્તય ॥ ૧૯॥

શ્રૂયતે સુરનારીણાં ગાનં ધ્યાનવિનાશનમ્ ।
આવયોસ્તપિભઙ્ગાય કૃતં મઘવતા કિલ ॥ ૨૦॥

ઋતુરાડન્યથાકાલે પ્રીતિં સઞ્જનયેત્કથમ્ ।
વિઘ્નોઽયં વિહિતો ભાતિ ભીતેનાસુરશત્રુણા ॥ ૨૧॥

વાતાઃ સુગન્ધાઃ શીતાશ્ચ સમાયાન્તિ મનોહરાઃ ।
નાન્યત્કારણમસ્તીહ શતક્રતુકૃતિં વિના ॥ ૨૨॥

ઇતિ બ્રુવતિ વિપ્રાગ્ર્યે દેવે નારાયણે વિભૌ ।
સર્વે દૃષ્ટિપથં પ્રાપ્તા મન્મથપ્રમુખાસ્તદા ॥ ૨૩॥

દદર્શ ભગવાન્સર્વાન્નરો નારાયણસ્તથા ।
વિસ્મયાવિષ્ટમનસૌ બભૂવતુરુભાવપિ ॥ ૨૪॥

મન્મથં મેનકાં ચૈવ રમ્ભાં ચૈવ તિલોત્તમામ્ ।
પુષ્પગન્ધાં સુકેશીં ચ મહાશ્વેતાં મનોરમામ્ ॥ ૨૫॥

પ્રમદ્વરાં ધૃતાચીઞ્ચ ગીતજ્ઞાં ચારુહાસિનીમ્ ।
ચન્દ્રપ્રભાં ચ સોમાં ચ કોકિલાલાપમણ્ડિતામ્ ॥ ૨૬॥

વિદ્યુન્માલામ્બુજાક્ષ્યૌ ચ તથા કાઞ્ચનમાલિનીમ્ ।
એતાશ્ચાન્યા વરારોહા દૃષ્ટાસ્તાભ્યાં તદાન્તિકે ॥ ૨૭॥

તાસાં દ્વ્યષ્ટસહસ્રાણિ પઞ્ચાશદધિકાનિ ચ ।
વીક્ષ્ય તૌ વિસ્મિતૌ જાતૌ કામસૈન્યં સુવિસ્તરમ્ ॥ ૨૮॥

પ્રણમ્યાગ્રે સ્થિતાઃ સર્વા દેવવારાઙ્ગનાસ્તદા ।
દિવ્યાભરણભૂષાઢ્યા દિવ્યમાલોપશોભિતાઃ ॥ ૨૯॥

જગુશ્છલેન તાઃ સર્વાઃ પૃથિવ્યામતિદુર્લભમ્ ।
તત્તથાવસ્થિતં દિવ્યં મન્મથાદિવિવર્ધનમ્ ॥ ૩૦॥

શુશ્રાવ ભગવાન્વિષ્ણુર્નરો નારાયણસ્તદા ।
શ્રુત્વા પ્રોવાચ તાસ્તત્ર પ્રીત્યા નારાયણો મુનિઃ ॥ ૩૧॥

આસ્યતાં સુખમત્રૈવ કરોમ્યાતિથ્યમદ્ભુતમ્ ।
ભવત્યોઽતિથિધર્મેણ પ્રાપ્તાઃસ્વર્ગાત્સુમધ્યમાઃ ॥ ૩૨॥

વ્યાસ ઉવાચ ।
સાભિમાનસ્તુ સઞ્ચાતસ્તદા નારાયણો મુનિઃ ।
ઇન્દ્રેણ પ્રેષિતા નૂનં તથા વિઘ્નચિકીર્ષયા ॥ ૩૩॥

વરાક્યઃ કા ઇમાઃ સર્વાઃ સૃજામ્યદ્ય નવાઃ કિલ ।
એતાભ્યો દિવ્યરૂપાશ્ચ દર્શયામિ તપોબલમ્ ॥ ૩૪॥

ઇતિ સઞ્ચિન્ત્ય મનસા કરેણોરું પ્રતાડ્ય વૈ ।
તરસોત્પાદયામાસ નારીં સર્વાઙ્ગસુન્દરીમ્ ॥ ૩૫॥

નારાયણોરુસમ્ભૂતા હ્યુર્વશીતિ તતઃ શુભા ।
દદૃશુસ્તાઃ સ્થિતાસ્તત્ર વિસ્મયં પરમં યયુઃ ॥ ૩૬॥

તાસાં ચ પરિચર્યાર્થં તાવતીશ્ચાતિસુન્દરીઃ ।
પ્રાદુશ્ચકાર તરસા તદા મુનિરસમ્ભ્રમઃ ॥ ૩૭॥

ગાયન્ત્યશ્ચ હસન્ત્યશ્ચ નાનોપાયનપાણયઃ ।
પ્રણેમુસ્તા મુની સર્વાઃ સ્થિતાઃ કૃત્વાઞ્જલિં પુરઃ ॥ ૩૮॥

તાં વીક્ષ્ય વિભ્રમકરીં તપસો વિભૂતિમ્ ॥

દેવાઙ્ગના હિ મુમુહુઃ પ્રવિમોહયન્ત્યઃ ।
ઊચુશ્ચ તૌ પ્રમુદિતાનનપદ્મશોભા
રોમોદ્ગમોલ્લસિતચારુનિજાઙ્ગવલ્લ્યઃ ॥ ૩૯॥

કુર્યુઃ કથં સ્તુતિમહો તપસો મહત્ત્વં
ધૈર્યં તથૈવ ભવતામભિવીક્ષ્ય બાલાઃ ।
અસ્મત્કટાક્ષવિષદિગ્ધશરેણ દગ્ધઃ
કો વા ન તત્ર ભવતાં મનસો વ્યથા ન ॥ ૪૦॥

જ્ઞાતૌ યુવાં નરહરેઃ પરમાંશભૂતૌ
દેવૌ મુની શમદમાદિનિધી સદૈવ ।
સેવાનિમિત્તમિહ નો ગમનં ન કામં
કાર્યં હરેઃ શતમખસ્ય વિધાતુમેવ ॥ ૪૧॥

ભાગ્યેન કેન યુવયોઃ કિલ દર્શનં નઃ
સમ્પાદિતં ન વિદિતં ખલુ સઞ્ચિતં તત્ ।
ચિત્તં ક્ષમં નિજજને વિહિતં યુવાભ્યા-
મસ્મદ્વિધે કિલ કૃતાગસિ તાપમુક્તમ્ ॥ ૪૨॥

કુર્વન્તિ નૈવ વિબુધાસ્તપસો વ્યયં વૈ
શાપેન તુચ્છફલદેન મહાનુભાવાઃ ।
વ્યાસ ઉવાચ ।
ઇત્થં નિશમ્ય વચનં સુરકામિનીનાં
તાવૂચતુર્મુનિવરૌ વિનયાનતાનામ્ ॥ ૪૩॥

પ્રીતૌ પ્રસન્નવદનૌ જિતકામલોભૌ
ધર્માત્મજૌ નિજતપોરુચિશોભિતાઙ્ગૌ ।
નરનારાયણાવૂચતુઃ
બ્રુવન્તુ વાઞ્છિતાન્ કામાન્દદાવસ્તુષ્ટમાનસૌ ॥ ૪૪॥

યાન્તુ સ્વર્ગં ગહીત્વેમામુર્વશીં ચારુલોચનામ્ ।
ઉપાયનમિયં બાલા ગચ્છત્વદ્ય મનોહરા ॥ ૪૫॥

દત્તાવાભ્યાં મઘવતઃ પ્રીણનાયોરુસમ્ભવા ।
સ્વસ્ત્યસ્તુ સર્વદેવેભ્યો યથેષ્ટં પ્રવ્રજન્તુ ચ ॥ ૪૬॥

(ન કસ્યાપિ તપોવિઘ્નં પ્રકર્તવ્યમતઃ પરં ।)॥

દેવ્ય ઊચુઃ ।
ક્વ ગચ્છામો મહાભાગ પ્રાપ્તાસ્તે પાદપઙ્કજમ્ ।
નારાયણ સુરશ્રેષ્ઠ ભક્ત્યા પરમયા મુદા ॥ ૪૭॥

વાઞ્છિતં ચેદ્વરં નાથ દદાસિ મધુસૂદન ।
તુષ્ટઃ કમલપત્રાક્ષ બ્રવીમો મનસેપ્સિતમ્ ॥ ૪૮॥

પતિસ્ત્વં ભવ દેવેશ વરમેનં પરન્તપ ।
ભવામઃ પ્રીતિયુક્તાસ્ત્વાં સેવિતું જગદીશ્વર ॥ ૪૯॥

ત્વયા ચોત્પાદિતા નાર્યઃ સન્ત્યન્યાશ્ચારુલોચનાઃ ।
ઉર્વશ્યાદ્યાસ્તથા યાન્તુ સ્વર્ગં વૈ ભવદાજ્ઞયા ॥ ૫૦॥

સ્ત્રીણાં ષોડશસાહસ્રં તિષ્ઠત્વત્ર શતાર્ધકમ્ ।
સેવાં તેઽત્ર કરિષ્યામો યુવયોસ્તાપસોત્તમૌ ॥ ૫૧॥

વાઞ્છિતં દેહિ દેવેશ સત્યવાગ્ભવ માધવ ।
આશાભઙ્ગો હિ નારીણાં હિંસનં પરિકીર્તિતમ્ ॥ ૫૨॥

કામાર્તાનાઞ્ચ મુનિભિર્ધર્મજ્ઞૈસ્તત્ત્વદર્શિભિઃ ।
ભાગ્યયોગાદિહ પ્રાપ્તાઃ સ્વર્ગાત્પ્રેમપરિપ્લુતાઃ ॥ ૫૩॥

ત્યક્તું નાર્હસિ દેવેશ સમર્થોઽસિ જગત્પતે ।
નારાયણ ઉવાચ ।
પૂર્ણં વર્ષસહસ્રં તુ તપસ્તપ્તં મયાત્ર વૈ ॥ ૫૪॥

જિતેન્દ્રિયેણ ચાર્વઙ્ગ્યઃ કથં ભઙ્ગં કરોમ્યતઃ ।
નેચ્છા કામે સુખે કાચિત્સુખધર્મવિનાશકે ॥ ૫૫॥

પશૂનામપિ સાધર્મ્યે રમેત મતિમાન્કથમ્ ।
અપ્સરસ ઊચુઃ ।
શબ્દાદીનાં ચ પઞ્ચાનાં મધ્યે સ્પર્શસુખં વરમ્ ॥ ૫૬॥

આનન્દરસમૂલં વૈ નાન્યદસ્તિ સુખં કિલ ।
અતોઽસ્માકં મહારાજ વચનં કુરુ સર્વથા ॥ ૫૭॥

નિર્ભરં સુખમાસાદ્ય ચરસ્વ ગન્ધમાદને ।
યદિ વાઞ્છસિ નાકત્વં નાધિકો ગન્ધમાદનાત્ ॥ ૫૮॥

રમસ્વાત્ર શુભે સ્થાને પ્રાપ્ય સર્વાઃ સુરાઙ્ગનાઃ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ચતુર્થસ્કન્ધે
અપ્સરસાં નારાયણસમીપે પ્રાર્થનાકરણં નામ ષષ્ઠોઽધ્યાયઃ ॥ ૪.૬॥

## ૪.૭ સપ્તમોઽધ્યાયઃ । અહઙ્કારાવર્તનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇત્યાકર્ણ્ય વચસ્તાસાં ધર્મપુત્રઃ પ્રતાપવાન્ ।
વિમર્શમકરોચ્ચિત્તે કિં કર્તવ્યં મયાધુના ॥ ૧॥

હાસ્યોઽહં મુનિવૃન્દેષુ ભવિષ્યામ્યદ્ય સઙ્ગમાત્ ।
અહઙ્કારાદિદં પ્રાપ્તં દુઃખં નાત્ર વિચારણા ।
મૂલં ધર્મવિનાશસ્ય પ્રથમં યદહઙ્કૃતિઃ ॥ ૨॥

મૂલં સંસારવૃક્ષસ્ય યતઃ પ્રોક્તો મહાત્મભિઃ ।
દૃષ્ટ્વા મૌનં સમાધાય ન સ્થિતોઽહં સમાગતમ્ ॥ ૩॥

વારાઙ્ગનાગણં જુષ્ટં તેનાસં દુઃખભાજનમ્ ।
ઉત્પાદિતાસ્તથા નાર્યો મયા ધર્મવ્યયેન વૈ ॥ ૪॥

તાસ્તુ માં બાધિતું વૃત્તાઃ કામાર્તાઃ પ્રમદોત્તમાઃ ।
ઊર્ણનાભિરિવાદ્યાહં જાલેન સ્વકૃતેન વૈ ॥ ૫॥

બદ્ધોઽસ્મિ સુદૃઢેનાત્ર કિં કર્તવ્યમતઃ પરમ્ ।
યદિ ચિન્તાં સમુત્સૃજ્ય સન્ત્યજામ્યબલા ઇમાઃ ॥ ૬॥

શપ્ત્વા ભ્રષ્ટા વ્રજિષ્યન્તિ સર્વા ભગ્નમનોરથાઃ ।
મુક્તોઽહં સઞ્ચરિષ્યામિ વિજને પરમં તપઃ ॥ ૭॥

તસ્માત્ક્રોધં સમુત્પાદ્ય ત્યક્ષ્યામિ સુન્દરીગણમ્ ।
વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય મનસા મુનિર્નારાયણસ્તદા ॥ ૮॥

વિમર્શમકરોચ્ચિત્તે સુખોત્પાદનસાધને ।
દ્વિતીયોઽયં મહાશત્રુઃ ક્રોધઃ સન્તાપકારકઃ ॥ ૯॥

કામાદપ્યધિકો લોકે લોભાદપિ ચ દારુણઃ ।
ક્રોધાભિભૂતઃ કુરુતે હિંસાં પ્રાણવિઘાતિનીમ્ ॥ ૧૦॥

દુઃખદાં સર્વભૂતાનાં નરકારામદીર્ઘિકામ્ ।
યથાગ્નિર્ઘર્ષણાજ્જાતઃ પાદપં પ્રદહેત્તથા ॥ ૧૧॥

દેહોત્પન્નસ્તથા ક્રોધો દેહં દહતિ દારુણઃ ।
વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્યમાનં તં ભ્રાતરં દીનમાનસમ્ ॥ ૧૨॥

ઉવાચ વચનં તથ્યં નરો ધર્મસુતોઽનુજઃ ।
નર ઉવાચ ।
નારાયણ મહાભાગ કોપં યચ્છ મહામતે ॥ ૧૩॥

શાન્તં ભાવં સમાશ્રિત્ય નાશયાહઙ્કૃતિં પરામ્ ।
પુરાહઙ્કારદોષેણ તપો નષ્ટં કિલાવયોઃ ॥ ૧૪॥

સઙ્ગ્રામશ્ચાભવત્તાભ્યાં ભાવાભ્યામસુરેણ હ ।
દિવ્યવર્ષસહસ્રં તુ પ્રહ્લાદેન મહાદ્ભુતમ્ ॥ ૧૫॥

દુઃખં બહુતરં પ્રાપ્તં તત્રાવાભ્યાં સુરોત્તમ ।
તસ્માત્ક્રોધં પરિત્યજ્ય શાન્તો ભવ મુનીશ્વર ॥ ૧૬॥

(શાન્તત્વં તપસો મૂલં મુનિભિઃ પરિકીર્તિતં ।)॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા શાન્તોઽભૂદ્ધર્મનન્દનઃ ।
જનમેજય ઉવાચ ।
સંશયોઽયં મુનિશ્રેષ્ઠ પ્રહ્લાદેન મહાત્મના ॥ ૧૭॥

વિષ્ણુભક્તેન શાન્તેન કથં યુદ્ધં કૃતં પુરા ।
કૃતવન્તૌ કથં યુદ્ધં નરનારાયણાવૃષી ॥ ૧૮॥

તાપસૌ ધર્મપુત્રૌ દ્વૌ સુશાન્તમાનસાવુભૌ ।
સમાગમઃ કથં જાતસ્તયોર્દૈત્યસુતસ્ય ચ ॥ ૧૯॥

સઙ્ગ્રામસ્તુ કથં તાભ્યાં કૃતસ્તેન મહાત્મના ।
પ્રહ્લાદોઽપ્યતિધર્માત્મા જ્ઞાનવાન્વિષ્ણુતત્પરઃ ॥ ૨૦॥

નરનારાયણૌ તદ્વત્તાપસૌ સત્ત્વસંસ્થિતૌ ।
તેન તાભ્યાં સમુદ્ભૂતં વૈરં યદિ પરસ્પરમ્ ॥ ૨૧॥

તદા તપસિ ધર્મે ચ શ્રમ એવ હિ કેવલમ્ ।

ક્વ જપઃ ક્વ તપશ્ચર્યા પુરા સત્યયુગેઽપિ ચ ॥ ૨૨॥

તાદૃશૈર્ન જિતં ચિત્તં ક્રોધાહઙ્કારસંવૃતમ્ ।
ન ક્રોધો ન ચ માત્સર્યમહઙ્કારાઙ્કુરં વિના ॥ ૨૩॥

અહઙ્કારાત્સમુત્પન્નાઃ કામક્રોધાદયઃ કિલ ।
વર્ષકોટિસહસ્રં તુ તપઃ કૃત્વાતિદારુણમ્ ॥ ૨૪॥

અહઙ્કારાઙ્કુરે જાતે વ્યર્થં ભવતિ સર્વથા ।
યથા સૂર્યોદયે જાતે તમોરૂપં ન તિષ્ઠતિ ॥ ૨૫॥

અહઙ્કારાઙ્કુરસ્યાગ્રે તથા પુણ્યં ન તિષ્ઠતિ ।
પ્રહ્લાદોઽપિ મહાભાગ હરિણા સમયુધ્યત ॥ ૨૬॥

તદા વ્યર્થં કૃતં સર્વં સુકૃતં કિલ ભૂતલે ।
નરનારાયણૌ શાન્તૌ વિહાય પરમં તપઃ ॥ ૨૭॥

કૃતવન્તૌ યદા યુદ્ધં ક્વ શમઃ સુકૃતં પુનઃ ।
ઈદૃગ્ભ્યાં સત્ત્વયુક્તાભ્યામજેયા યદ્યહઙ્કૃતિઃ ॥ ૨૮॥

માદૃશાનાઞ્જ કા વાર્તા મુનેઽહઙ્કારસઙ્ક્ષયે ।
અહઙ્કારપરિત્યક્તો ન કોઽપ્યસ્તિ જગત્ત્રયે ॥ ૨૯॥

ન ભૂતો ભવિતા નૈવ યસ્ત્યક્તસ્તેન સર્વથા ।
મુચ્યતે લોહનિગડૈર્બદ્ધઃ કાષ્ઠમયૈસ્તથા ॥ ૩૦॥

અહઙ્કારનિબદ્ધસ્તુ ન કદાચિદ્વિમુચ્યતે ।
અહઙ્કારાવૃતં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૩૧॥

ભ્રમત્યેવ હિ સંસારે વિષ્ઠામૂત્રપ્રદૂષિતે ।
બ્રહ્મજ્ઞાનં કુતસ્તાવત્સંસારે મોહસંવૃતે ॥ ૩૨॥

મતં મીમાંસકાનાં વૈ સમ્મતં ભાતિ સુવ્રત ।
મહાન્તોઽપિ સદા યુક્તાઃ કામક્રોધાદિભિર્મુને ॥ ૩૩॥

માદૃશાનાં કલાવસ્મિન્કા કથા મુનિસત્તમ ।
વ્યાસ ઉવાચ ।
કાર્યં વૈ કારણાદ્ભિન્નં કથં ભવતિ ભારત ॥ ૩૪॥

કટકં કુણ્ડલઞ્ચૈવ સુવર્ણસદૃશં ભવેત્ ।
અહઙ્કારોદ્ભવં સર્વં બ્રહ્માણ્ડં સચરાચરમ્ ॥ ૩૫॥

પટસ્તન્તુવશઃ પ્રોક્તસ્તદ્વિયુક્તઃ કથં ભવેત્ ।
માયાગુણૈસ્ત્રિભિઃ સર્વં રચિતં સ્થિરજઙ્ગમમ્ ॥ ૩૬॥

સતૃણસ્તમ્બપર્યન્તં કા તત્ર પરિદેવના ।
બ્રહ્મા વિષ્ણુસ્તથા રુદ્રસ્તે ચાહઙ્કારમોહિતાઃ ॥ ૩૭॥

ભ્રમન્ત્યસ્મિન્મહાગાધે સંસારે નૃપસત્તમ ।
વસિષ્ઠનારદાદ્યાશ્ચ મુનયો જ્ઞાનિનઃ પરમ્ ॥ ૩૮॥

તેઽભિભૂતાઃ સંસરન્તિ સંસારેઽસ્મિન્પુનઃ પુનઃ ।
ન કોઽપ્યસ્તિ નૃપશ્રેષ્ઠ ત્રિષુ લોકેષુ દેહભૃત્ ॥ ૩૯॥

એભિર્માયાગુણૈર્મુક્તઃ શાન્ત આત્મસુખે સ્થિતઃ ।
કામક્રોધૌ તથા લોભો મોહોઽહઙ્કારસમ્ભવઃ ॥ ૪૦॥

ન મુઞ્ચન્તિ નરં સર્વં દેહવન્તં નૃપોત્તમ ।
અધીત્ય વેદશાસ્ત્રાણિ પુરાણાનિ વિચિન્ત્ય ચ ॥ ૪૧॥

કૃત્વા તીર્થાટનં દાનં ધ્યાનઞ્ચૈવ સુરાર્ચનમ્ ।
કરોતિ વિષયાસક્તઃ સર્વં કર્મ ચ ચૌરવત્ ॥ ૪૨॥

વિચારયતિ નો પૂર્વં કામમોહમદાન્વિતઃ ।
કૃતે યુગેઽપિ ત્રેતાયાં દ્વાપરે કુરુનન્દન ॥ ૪૩॥

વિદ્ધોઽત્રાસ્તિ ચ ધર્મોઽપિ કા કથાદ્ય કલૌ પુનઃ ।
સ્પર્ધા સદૈવ સદ્રોહા લોભામર્ષૌ ચ સર્વદા ॥ ૪૪॥

એવંવિધોઽસ્તિ સંસારો નાત્ર કાર્યા વિચારણા ।
સાધવો વિરલા લોકે ભવન્તિ ગતમત્સરાઃ ॥ ૪૫॥

જિતક્રોધા જિતામર્ષા દૃષ્ટાન્તાર્થં વ્યવસ્થિતાઃ ।
રાજોવાચ ।
તે ધન્યાઃ કૃતપુણ્યાસ્તે મદમોહવિવર્જિતાઃ ॥ ૪૬॥

જિતેન્દ્રિયાઃ સદાચારા જિતં તૈર્ભુવનત્રયમ્ ।
દુનોમિ પાતકં સ્મૃત્વા પિતુર્મમ મહાત્મનઃ ॥ ૪૭॥

કૃતસ્તપસ્વિનઃ કણ્ઠે મૃતસર્પો હ્યઘં વિના ।
અતસ્તસ્ય મુનિશ્રેષ્ઠ ભવિતા કિં મમાગ્રતઃ ॥ ૪૮॥

ન જાને બુદ્ધિસમ્મોહાત્કિં વા કાર્યં ભવિષ્યતિ ।
મધુ પશ્યતિ મૂઢાત્મા પ્રપાતં નૈવ પશ્યતિ ॥ ૪૯॥

કરોતિ નિન્દિતં કર્મ નરકાન્ન બિભેતિ ચ ।
કથં યુદ્ધં પુરા વૃત્તં વિસ્તરાત્તદ્વદસ્વ મે ॥ ૫૦॥

પ્રહ્લાદેન યથા ચોગ્રં નરનારાયણસ્ય વૈ ।
પ્રહ્લાદસ્તુ કથં યાતઃ પાતાલાત્તદ્વદસ્વ મે ॥ ૫૧॥

સારસ્વતે મહાતીર્થે પુણ્યે બદરિકાશ્રમે ।
નરનારાયણૌ શાન્તૌ તાપસૌ મુનિસત્તમૌ ॥ ૫૨॥

કૃતવન્તૌ તથા યુદ્ધં હેતુના કેન માનદ ।
વૈરં ભવતિ વિત્તાર્થં દારાર્થં વા પરસ્પરમ્ ॥ ૫૩॥

એષણારહિતૌ કસ્માચ્ચક્રતુઃ પ્રધનં મહત્ ।
પ્રહ્લાદોઽપિ ચ ધર્માત્મા જ્ઞાત્વા દેવૌ સનાતનૌ ॥ ૫૪॥

કૃતવાન્સ કથં યુદ્ધં નરનારાયણૌ મુની ।
એતદ્વિસ્તરતો બ્રહ્મઞ્છ્રોતુમિચ્છામિ કારણમ્ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે અહઙ્કારાવર્તનવર્ણનં નામ સપ્તમોઽધ્યાયઃ ॥ ૪.૭॥

## ૪.૮ અષ્ટમોઽધ્યાયઃ । પ્રહ્લાદતીર્થયાત્રાવર્ણનમ્ ।

સૂત ઉવાચ ।
ઇતિ પૃષ્ટસ્તદા વિપ્રો રાજ્ઞા પારીક્ષિતેન વૈ ।
ઉવાચ વિસ્તરાત્સર્વં વ્યાસઃ સત્યવતીસુતઃ ॥ ૧॥

જનમેજયોઽપિ ધર્માત્મા નિર્વેદં પરમં ગતઃ ।
ચિત્તં દુશ્ચરિતં મત્વા વૈરાટીતનયસ્ય વૈ ॥ ૨॥

તસ્યૈવોદ્ધરણાર્થાય ચકાર સતતં મનઃ ।
વિપ્રાવમાનપાપેન યમલોકં ગતસ્ય વૈ ॥ ૩॥

પુન્નામનરકાદ્યસ્માત્ત્રાયતે પિતરં સ્વકમ્ ।
પુત્રેતિ નામ સાર્થં સ્યાત્તેન તસ્ય મુનીશ્વરાઃ ॥ ૪॥

સર્પદષ્ટં નૃપં શ્રુત્વા હર્મ્યોપરિ મૃતં તથા ।

વિપ્રશાપાદૌત્તરેયં સ્નાનદાનવિવર્જિતમ્ ॥ ૫॥

પિતુર્ગતિં નિશમ્યાસૌ નિર્વેદં ગતવાન્નૃપઃ ।
પારીક્ષિતો મહાભાગઃ સન્તપ્તો ભયવિહ્વલઃ ॥ ૬॥

પપ્રચ્છાથ મુનિં વ્યાસં ગૃહાગતમનિન્દિતઃ ।
નરનારાયણસ્યેમાં કથાં પરમવિસ્મૃતામ્ ॥ ૭॥

વ્યાસ ઉવાચ ।
સ યદા નિહતો રૌદ્રો હિરણ્યકશિપુર્નૃપ ।
અભિષિક્તસ્તદા રાજ્યે પ્રહ્લાદો નામ તત્સુતઃ ॥ ૮॥

તસ્મિઞ્છાસતિ દૈત્યેન્દ્રે દેવબ્રાહ્મણપૂજકે ।
મખૈર્ભૂમૌ નૃપતયો યજન્તઃ શ્રદ્ધયાન્વિતાઃ ॥ ૯॥

બ્રાહ્મણાશ્ચ તપોધર્મતીર્થયાત્રાશ્ચ કુર્વતે ।
વૈશ્યાશ્ચ સ્વસ્વવૃત્તિસ્થાઃ શૂદ્રાઃ શુશ્રૂષણે રતાઃ ॥ ૧૦॥

નૃસિંહેન ચ પાતાલે સ્થાપિતઃ સોઽથ દૈત્યરાટ્ ।
રાજ્યં ચકાર તત્રૈવ પ્રજાપાલનતત્પરઃ ॥ ૧૧॥

કદાચિદ્ ભૃગુપુત્રોઽથ ચ્યવનાખ્યો મહાતપાઃ ।
જગામ નર્મદાં સ્નાતું તીર્થં વૈ વ્યાહૃતીશ્વરમ્ ॥ ૧૨॥

રેવાં મહાનદીં દૃષ્ટ્વા તતસ્તસ્યામવાતરત્ ।
ઉત્તરન્તં પ્રજગ્રાહ નાગો વિષભયઙ્કરઃ ॥ ૧૩॥

ગૃહીતો ભયભીતસ્તુ પાતાલે મુનિસત્તમઃ ।
સસ્માર મનસા વિષ્ણું દેવદેવં જનાર્દનમ્ ॥ ૧૪॥

સંસ્મૃતે પુણ્ડરીકાક્ષે નિર્વિષોઽભૂન્મહોરગઃ ।
ન પ્રાપ ચ્યવનો દુઃખં નીયમાનો રસાતલમ્ ॥ ૧૫॥

દ્વિજિહ્વેન મુનિસ્ત્યક્તો નિર્વિણ્ણેનાતિશઙ્કિના ।
માં શપેત મુનિઃ કુદ્ધસ્તાપસોઽયં મહાનિતિ ॥ ૧૬॥

ચચાર નાગકન્યાભિઃ પૂજિતો મુનિસત્તમઃ ।
વિવેશાપ્યથ નાગાનાં દાનવાનાં મહત્પુરમ્ ॥ ૧૭॥

કદાચિદ્ભૃગુપુત્રં તં વિચરન્તં પુરોત્તમે ।
દદર્શ દૈત્યરાજોઽસૌ પ્રહ્લાદો ધર્મવત્સલઃ ॥ ૧૮॥

દૃષ્ટ્વા તં પૂજયામાસ મુનિં દૈત્યપતિસ્તદા ।
પપ્રચ્છ કારણં કિં તે પાતાલાગમને વદ ॥ ૧૯॥

પ્રેષિતોઽસિ કિમિન્દ્રેણ સત્યં બ્રૂહિ દ્વિજોત્તમ ।
દૈત્યવિદ્વેષયુક્તેન મમ રાજ્યદિદૃક્ષયા ॥ ૨૦॥

ચ્યવન ઉવાચ ।
કિં મે મઘવતા રાજન્ યદહં પ્રેષિતઃ પુનઃ ।
દૂતકાર્યં પ્રકુર્વાણઃ પ્રાપ્તવાન્નગરે તવ ॥ ૨૧॥

વિદ્ધિ માં ભૃગુપુત્રં તં સ્વનેત્રં ધર્મતત્પરમ્ ।
મા શઙ્કાં કુરુ દૈત્યેન્દ્ર વાસવપ્રેષિતસ્ય વૈ ॥ ૨૨॥

સ્નાનાર્થં નર્મદાં પ્રાપ્તઃ પુણ્યતીર્થે નૃપોત્તમ ।
નદ્યામેવાવતીર્ણોઽહં ગૃહીતશ્ચ મહાહિના ॥ ૨૩॥

જાતોઽસૌ નિર્વિષઃ સર્પો વિષ્ણોઃ સંસ્મરણાદિવ ।
મુક્તોઽહં તેન નાગેન પ્રભાવાત્સ્મરણસ્ય વૈ ॥ ૨૪॥

અત્રાગતેન રાજેન્દ્ર મયાપ્તં તવ દર્શનમ્ ।
વિષ્ણુભક્તોઽસિ દૈત્યેન્દ્ર તદ્ભક્તં માં વિચિન્તય ॥ ૨૫॥

વ્યાસ ઉવાચ ।
તન્નિશમ્ય વચઃ શ્લક્ષ્ણં હિરણ્યકશિપોઃ સુતઃ ।
પપ્રચ્છ પરયા પ્રીત્યા તીર્થાનિ વિવિધાનિ ચ ॥ ૨૬॥

પ્રહ્લાદ ઉવાચ ।
પૃથિવ્યાં કાનિ તીર્થાનિ પુણ્યાનિ મુનિસત્તમ ।
પાતાલે ચ તથાકાશે તાનિ નો વદ વિસ્તરાત્ ॥ ૨૭॥

ચ્યવન ઉવાચ ।
મનોવાક્કાયશુદ્ધાનાં રાજંસ્તીર્થં પદે પદે ।
તથા મલિનચિત્તાનાં ગઙ્ગાપિ કીકટાધિકા ॥ ૨૮॥

પ્રથમં ચેન્મનઃ શુદ્ધં જાતં પાપવિવર્જિતમ્ ।
તદા તીર્થાનિ સર્વાણિ પાવનાનિ ભવન્તિ વૈ ॥ ૨૯॥

ગઙ્ગાતીરે હિ સર્વત્ર વસન્તિ નગરાણિ ચ ।

વ્રજાશ્ચૈવાકરા ગ્રામાઃ સર્વે ખેટાસ્તથાપરે ॥ ૩૦॥

નિષાદાનાં નિવાસાશ્ચ કૈવર્તાનાં તથાપરે ।
હૂણબઙ્ગખસાનાં ચ મ્લેચ્છાનાં દૈત્યસત્તમ ॥ ૩૧॥

પિબન્તિ સર્વદા ગાઙ્ગં જલં બ્રહ્મોપમં સદા ।
સ્નાનં કુર્વન્તિ દૈત્યેન્દ્ર ત્રિકાલં સ્વેચ્છયા જનાઃ ॥ ૩૨॥

તત્રૈકોઽપિ વિશુદ્ધાત્મા ન ભવત્યેવ મારિષ ।
કિં ફલં તર્હિ તીર્થસ્ય વિષયોપહતાત્મસુ ॥ ૩૩॥

કારણં મન એવાત્ર નાન્યદ્રાજન્વિચિન્તય ।
મનઃશુદ્ધિં પ્રકર્તવ્યા સતતં શુદ્ધિમિચ્છતા ॥ ૩૪॥

તીર્થવાસી મહાપાપી ભવેત્તત્રાત્મવઞ્ચનાત્ ।
તત્રૈવાચરિતં પાપમાનન્ત્યાય પ્રકલ્પતે ॥ ૩૫॥

યથેન્દ્રવારુણં પક્વં મિષ્ટં નૈવોપજાયતે ।
ભાવદુષ્ટસ્તથા તીર્થે કોટિસ્નાતો ન શુધ્યતિ ॥ ૩૬॥

પ્રથમં મનસઃ શુદ્ધિઃ કર્તવ્યા શુભમિચ્છતા ।
શુદ્ધે મનસિ દ્રવ્યસ્ય શુદ્ધિર્ભવતિ નાન્યથા ॥ ૩૭॥

તથૈવાચારશુદ્ધિઃ સ્યાત્તતસ્તીર્થં પ્રસિધ્યતિ ।
અન્યથા તુ કૃતં સર્વં વ્યર્થં ભવતિ તત્ક્ષણાત્ ॥ ૩૮॥

(હીનવર્ણસ્ય સંસર્ગં તીર્થે ગત્વા સદા ત્યજેત્ ।)॥

ભૂતાનુકમ્પનં ચૈવ કર્તવ્યં કર્મણા ધિયા ।
યદિ પૃચ્છસિ રાજેન્દ્ર તીર્થં વક્ષ્યામ્યનુત્તમમ્ ॥ ૩૯॥

પ્રથમં નૈમિષં પુણ્યં ચક્રતીર્થં ચ પુષ્કરમ્ ।
અન્યેષાં ચૈવ તીર્થાનાં સઙ્ખ્યા નાસ્તિ મહીતલે ॥ ૪૦॥

પાવનાનિ ચ સ્થાનાનિ બહૂનિ નૃપસત્તમ ।
વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં રાજા નૈમિષં ગન્તુમુદ્યતઃ ॥ ૪૧॥

નોદયામાસ દૈત્યાન્વૈ હર્ષનિર્ભરમાનસઃ ।
પ્રહ્લાદ ઉવાચ ।
ઉત્તિષ્ઠન્તુ મહાભાગા ગમિષ્યામોઽદ્ય નૈમિષમ્ ॥ ૪૨॥

દ્રક્ષ્યામઃ પુણ્ડરીકાક્ષં પીતવાસસમચ્યુતમ્ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા વિષ્ણુભક્તેન સર્વે તે દાનવાસ્તદા ॥ ૪૩॥

તેનૈવ સહ પાતાલાન્નિર્યયુઃ પરયા મુદા ।
તે સમેત્ય ચ દૈતેયા દાનવાશ્ચ મહાબલાઃ ॥ ૪૪॥

નૈમિષારણ્યમાસાદ્ય સ્નાનં ચક્રુર્મુદાન્વિતાઃ ।
પ્રહ્લાદસ્તત્ર તીર્થેષુ ચરન્દૈત્યૈઃ સમન્વિતઃ ॥ ૪૫॥

સરસ્વતીં મહાપુણ્યાં દદર્શ વિમલોદકામ્ ।
તીર્થે તત્ર નૃપશ્રેષ્ઠ પ્રહ્લાદસ્ય મહાત્મનઃ ॥ ૪૬॥

મનઃ પ્રસન્નં સઞ્જાતં સ્નાત્વા સારસ્વતે જલે ।
વિધિવત્તત્ર દૈત્યેન્દ્રઃ સ્નાનદાનાદિકં શુભે ॥ ૪૭॥

ચકારાતિપ્રસન્નાત્મા તીર્થે પરમપાવને ॥ ૪૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પ્રહ્લાદતીર્થયાત્રાવર્ણનં નામાષ્ટમોઽધ્યાયઃ ॥ ૪.૮॥

## ૪.૯ નવમોઽધ્યાયઃ । પ્રહ્લાદનારાયણયોર્યુદ્ધે વિષ્ણોરાગમનવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
કુર્વંસ્તીર્થવિધિં તત્ર હિરણ્યકશિપોઃ સુતઃ ।
ન્યગ્રોધં સુમહચ્છાયમપશ્યત્પુરતસ્તદા ॥ ૧॥

દદર્શ બાણાનપરાન્નાનાજાતીયકાંસ્તદા ।
ગૃધ્રપક્ષયુતાંસ્તીવ્રાચ્છિલાધૌતાન્મહોજ્વલાન્ ॥ ૨॥

ચિન્તયામાસ મનસા કસ્યેમે વિશિખાસ્ત્વિહ ।
ઋષીણામાશ્રમે પુણ્યે તીર્થે પરમપાવને ॥ ૩॥

એવં ચિન્તયતાનેન કૃષ્ણાજિનધરૌ મુની ।
સમુન્નતજટાભારૌ દૃષ્ટૌ ધર્મસુતૌ તદા ॥ ૪॥

તયોરગ્રે ધૃતે શુભ્રે ધનુષી લક્ષણાન્વિતે ।
શાર્ઙ્ગમાજગવઞ્ચૈવ તથાક્ષય્યૌ મહેષુધી ॥ ૫॥

ધ્યાનસ્થૌ તૌ મહાભાગૌ નરનારાયણાવૃષી ।
દૃષ્ટ્વા ધર્મસુતૌ તત્ર દૈત્યાનામધિપસ્તદા ॥ ૬॥

ક્રોધરક્તેક્ષણસ્તૌ તુ પ્રોવાચાસુરપાલકઃ ।
કિં ભવદ્ભ્યાં સમારબ્ધો દમ્ભો ધર્મવિનાશનઃ ॥ ૭॥

ન શ્રુતં નૈવ દૃષ્ટં હિ સંસારેઽસ્મિન્કદાપિ હિ ।
તપસશ્ચરણં તીવ્રં તથા ચાપસ્ય ધારણમ્ ॥ ૮॥

વિરોધોઽયં યુગે ચાદ્યે કથં યુક્તં કલિપ્રિયમ્ ।
બ્રાહ્મણસ્ય તપો યુક્તં તત્ર કિં ચાપધારણમ્ ॥ ૯॥

ક્વ જટાધારણં દેહે ક્વેષુધી ચ વિડમ્બનૌ ।
ધર્મસ્યાચરણં યુક્તં યુવયોર્દિવ્યભાવયોઃ ॥ ૧૦॥

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા નરઃ પ્રોવાચ ભારત ।
કા તે ચિન્તાત્ર દૈત્યેન્દ્ર વૃથા તપસિ ચાવયોઃ ॥ ૧૧॥

સામર્થ્યે સતિ યત્કુર્યાત્તત્સમ્પદ્યેત તસ્ય હિ ।
આવાં કાર્યદ્વયે મન્દ સમર્થૌ લોકવિશ્રુતૌ ॥ ૧૨॥

યુદ્ધે તપસિ સામર્થ્યં ત્વં પુનઃ કિં કરિષ્યસિ ।
ગચ્છ માર્ગે યથાકામં કસ્માદત્ર વિકત્થસે ॥ ૧૩॥

બ્રહ્મતેજો દુરારાધ્યં ન ત્વં વેદ વિમોહિતઃ ।
વિપ્રચર્ચા ન કર્તવ્યા પ્રાણિભિઃ સુખમીપ્સુભિઃ ॥ ૧૪॥

પ્રહ્લાદ ઉવાચ ।
તાપસૌ મન્દબુદ્ધી સ્થો મૃષા વાં ગર્વમોહિતૌ ।
મયિ તિષ્ઠતિ દૈત્યેન્દ્રે ધર્મસેતુપ્રવર્તકે ॥ ૧૫॥

ન યુક્તમેતત્તીર્થેઽસ્મિન્નધર્માચરણં પુનઃ ।
કા શક્તિસ્તવ યુદ્ધેઽસ્તિ દર્શયાદ્ય તપોધન ॥ ૧૬॥

વ્યાસ ઉવાચ ।
તદાકર્ણ્ય વચસ્તસ્ય નરસ્તં પ્રત્યુવાચ હ ।
યુદ્ધસ્વાદ્ય મયા સાર્ધં યદિ તે મતિરીદૃશી ॥ ૧૭॥

અદ્ય તે સ્ફોટયિષ્યામિ મૂર્ધાનમસુરાધમ ।

(યુદ્ધે શ્રદ્ધા ન તે પશ્ચાદ્ભવિષ્યતિ કદાચન ।)॥

વ્યાસ ઉવાચ ।
તન્નિશમ્ય વચસ્તસ્ય દૈત્યેન્દ્રઃ કુપિતસ્તદા ॥ ૧૮॥

પ્રહ્લાદો બલવાનત્ર પ્રતિજ્ઞામારુરોહ સઃ ।
યેન કેનાપ્યુપાયેન જેષ્યામિ તાવુભાવપિ ॥ ૧૯॥

નરનારાયણૌ દાન્તાવૃષી તપિસમન્વિતૌ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા વચનં દૈત્યઃ પ્રતિગૃહ્ય શરાસનમ્ ॥ ૨૦॥

આકૃષ્ય તરસા ચાપં જ્યાશબ્દઞ્ચ ચકાર હ ।
નરોઽપિ ધનુરાદાય શરાંસ્તીવ્રાઞ્છિલાશિતાન્ ॥ ૨૧॥

મુમોચ બહુશઃ કોધાત્પ્રહ્લાદોપરિ પાર્થિવ ॥ ૨૨॥

તાન્દૈત્યરાજસ્તપનીયપુઙ્ખૈ-
શ્ચિચ્છેદ બાણૈસ્તરસા સમેત્ય ।
સમીક્ષ્ય છિન્નાંશ્ચ નરઃ સ્વસૃષ્ટા-
નન્યાન્મુમોચાશુ રુષાન્વિતો વૈ ॥ ૨૩॥

દૈત્યાથિપસ્તાનપિ તીવ્રવેગૈ-
શ્છિત્ત્વા જઘાનોરસિ તં મુનીન્દ્રમ્ ।
નરોઽપિ તં પઞ્ચભિરાશુગૈશ્ચ
કુદ્ધોઽહનદ્દૈત્યપતિં બાહુદેશે ॥ ૨૪॥

સેન્દ્રાઃ સુરાસ્તત્ર તયોર્હિ યુદ્ધં
દ્રષ્ટું વિમાનૈર્ગગનસ્થિતાશ્ચ ।
નરસ્ય વીર્યં યુધિ સંસ્થિતસ્ય
તે તુષ્ટુવુર્દૈત્યપતેશ્ચ ભૂયઃ ॥ ૨૫॥

વવર્ષ દૈત્યાધિપ આત્તચાપઃ
શિલીમુખાનમ્બુધરો યથાપઃ ।
આદાય શાર્ઙ્ગ ધનુરપ્રમેયં
મુમોચ બાણાઞ્છિતહેમપુઙ્ખાન્ ॥ ૨૬॥

બભૂવ યુદ્ધં તુમુલં તયોસ્તુ
જયૈષિણોઃ પાર્થિવ દેવદૈત્યયોઃ ।

વવર્ષુરાકાશપથે સ્થિતાસ્તે
પુષ્પાણિ દિવ્યાનિ પ્રહૃષ્ટચિત્તાઃ ॥ ૨૭॥

ચુકોપ દૈત્યાધિપતિર્હરૌ સ
મુમોચ બાણાનતિતીવ્રવેગાન્ ।
ચિચ્છેદ તાન્ધર્મસુતઃ સુતીક્ષ્ણૈ-
ર્ધનુર્વિમુક્તૈર્વિશિખૈસ્તદાઽઽશુ ॥ ૨૮॥

તતો નારાયણં બાણૈઃ પ્રહ્લાદશ્ચાતિકર્ષિતૈઃ ।
વવર્ષ સુસ્થિતં વીરં ધર્મપુત્રં સનાતનમ્ ।
નારાયણોઽપિ તં વેગાન્મુક્તૈર્બાણૈઃ શિલાશિતૈઃ ॥ ૨૯॥

તુતોદાતીવ પુરતો દૈત્યાનામધિપં સ્થિતમ્ ।
સન્નિપાતોઽમ્બરે તત્ર દિદૃક્ષૂણાં બભૂવ હ ॥ ૩૦॥

દેવાનાં દાનવાનાઞ્ચ કુર્વતાં જયઘોષણમ્ ।
ઉભયોઃ શરવર્ષેણ છાદિતે ગગને તદા ॥ ૩૧॥

દિવાપિ રાત્રિસદૃશં બભૂવ તિમિરં મહત્ ।
ઊચુઃ પરસ્પરં દેવા દૈત્યાશ્ચાતીવ વિસ્મિતાઃ ॥ ૩૨॥

અદૃષ્ટપૂર્વં યુદ્ધં વૈ વર્તતેઽદ્ય સુદારુણમ્ ।
દેવર્ષયોઽથ ગન્ધર્વા યક્ષકિન્નરપન્નગાઃ ॥ ૩૩॥

વિદ્યાધરાશ્ચારણાશ્ચ વિસ્મયં પરમં યયુઃ ।
નારદઃ પર્વતશ્ચૈવ પ્રેક્ષણાર્થં સ્થિતૌ મુની ॥ ૩૪॥

નારદઃ પર્વતં પ્રાહ નેદૃશં ચાભવત્પુરા ।
તારકાસુરયુદ્ધઞ્ચ તથા વૃત્રાસુરસ્ય ચ ॥ ૩૫॥

મધુકૈટભયોર્યુદ્ધં હરિણા ચેદૃશં કૃતમ્ ।
પ્રહ્લાદઃ પ્રબલઃ શૂરો યસ્માન્નારાયણેન ચ ॥ ૩૬॥

કરોતિ સદૃશં યુદ્ધં સિદ્ધેનાદ્ભુતકર્મણા ।
વ્યાસ ઉવાચ ।
દિને દિને તથા રાત્રૌ કૃત્વા કૃત્વા પુનઃ પુનઃ ॥ ૩૭॥

ચક્રતુઃ પરમં યુદ્ધં તૌ તદા દૈત્યતાપસૌ ।
નારાયણસ્તુ ચિચ્છેદ પ્રહ્લાદસ્ય શરાસનમ્ ॥ ૩૮॥

તરસૈકેન બાણેન સ ચાન્યદ્ધનુરાદદે ।
નારાયણસ્તુ તરસા મુક્ત્વાન્યચ્ચ શિલીમુખમ્ ॥ ૩૯॥

તદૈવ મધ્યતશ્ચાપં ચિચ્છેદ લઘુહસ્તકઃ ।
છિન્નં છિન્નં પુનર્દૈત્યો ધનુરન્યત્સમાદદે ॥ ૪૦॥

નારાયણસ્તુ ચિચ્છેદ વિશિખૈરાશુ કોપિતઃ ।
છિન્ને ધનુષિ દૈત્યેન્દ્રઃ પરિઘં તુ સમાદદે ॥ ૪૧॥

જઘાન ધર્મજં તૂર્ણં બાહ્વોર્મધ્યેઽતિકોપનઃ ।
તમાયાન્તં સ બલવાન્માર્ગણૈર્નવભિર્મુનિઃ ॥ ૪૨॥

ચિચ્છેદ પરિઘં ઘોરં દશભિસ્તમતાડયત્ ।
ગદામાદાય દૈત્યેન્દ્રઃ સર્વાયસમયીં દૃઢામ્ ॥ ૪૩॥

જાનુદેશે જઘાનાશુ દેવં નારાયણં રુષા ।
ગદયા ચાપિ ગિરિવત્સંસ્થિતઃ સ્થિરમાનસઃ ॥ ૪૪॥

ધર્મપુત્રોઽતિબલવાન્મુમોચાશુ શિલીમુખાન્ ।
ગદાં ચિચ્છેદ ભગવાંસ્તદા દૈત્યપતેર્દૃઢામ્ ॥ ૪૫॥

વિસ્મયં પરમં જગ્મુઃ પ્રેક્ષકા ગગને સ્થિતાઃ ।
સ તુ શક્તિં સમાદાય પ્રહ્લાદઃ પરવીરહા ॥ ૪૬॥

ચિક્ષેપ તરસા ક્રુદ્ધો બલાન્નારાયણોરસિ ।
તામાપતન્તીં સંવીક્ષ્ય બાણેનૈકેન લીલયા ॥ ૪૭॥

સપ્તધા કૃતવાનાશુ સપ્તભિસ્તં જઘાન હ ।
દિવ્યવર્ષશતં ચૈવ તદ્યુદ્ધં પરમં તયોઃ ॥ ૪૮॥

જાતં વિસ્મયદં રાજન્ સર્વેષાં તત્ર ચાશ્રમે ।
તદાઽઽજગામ તરસા પીતવાસાશ્ચતુર્ભુજઃ ॥ ૪૯॥

પ્રહ્લાદસ્યાશ્રમં તત્ર જગામ ચ ગદાધરઃ ।
ચતુર્ભુજો રમાકાન્તો રથાઙ્ગદરપદ્મભૃત્ ॥ ૫૦॥

દૃષ્ટ્વા તમાગતં તત્ર હિરણ્યકશિપોઃ સુતઃ ।
પ્રણમ્ય પરયા ભક્ત્યા પ્રાઞ્જલિઃ પ્રત્યુવાચ હ ॥ ૫૧॥

પ્રહ્લાદ ઉવાચ ।
દેવદેવ જગન્નાથ ભક્તવત્સલ માધવ ।

કથં ન જિતવાનાજાવહમેતૌ તપસ્વિનૌ ।
સઙ્ગ્રામસ્તુ મયા દેવ કૃતઃ પૂર્ણં શતં સમાઃ ॥ ૫૨॥

સુરાણાં ન જિતૌ કસ્માદિતિ મે વિસ્મયો મહાન્ ।
વિષ્ણુરુવાચ ।
સિદ્ધાવિમૌ મદંશૌ ચ વિસ્મયઃ કોઽત્ર મારિષ ॥ ૫૩॥

તાપસૌ ન જિતાત્માનૌ નરનારાયણૌ જિતૌ ।
ગચ્છ ત્વં વિતલં રાજન્ કુરુ ભક્તિં મમાચલામ્ ॥ ૫૪॥

નાભ્યાં કુરુ વિરોધં ત્વં તાપસાભ્યાં મહામતે ।
વ્યાસ ઉવાચ ।
ઇત્યાજ્ઞપ્તો દૈત્યરાજો નિર્યયાવસુરૈઃ સહ ॥ ૫૫॥

નરનારાયણૌ ભૂયસ્તપોયુક્તૌ બભૂવતુઃ ॥ ૫૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પ્રહ્લાદનારાયણયોર્યુદ્ધે વિષ્ણોરાગમનવર્ણનં નામ નવમોઽધ્યાયઃ ॥ ૪.૯॥

## ૪.૧૦ દશમોઽધ્યાયઃ । ભૃગુશાપકારણવર્ણનમ્ ।

જનમેજય ઉવાચ ।
સન્દેહોઽયં મહાનત્ર પારાશર્ય કથાનકે ।
નરનારાયણૌ શાન્તૌ વૈષ્ણવાંશૌ તપોધનૌ ॥ ૧॥

તીર્થાશ્રયૌ સત્ત્વયુક્તૌ વન્યાશનપરૌ સદા ।
ધર્મપુત્રૌ મહાત્માનૌ તાપસૌ સત્યસંસ્થિતૌ ॥ ૨॥

કથં રાગસમાયુક્તૌ જાતૌ યુદ્ધે પરસ્પરમ્ ।
સઙ્ગ્રામં ચક્રતુઃ કસ્માત્ત્યક્ત્વા તપિમનુત્તમામ્ ॥ ૩॥

પ્રહ્લાદેન સમં પૂર્ણં દિવ્યવર્ષશતં કિલ ।
હિત્વા શાન્તિસુખં યુદ્ધં કૃતવન્તૌ કથં મુની ॥ ૪॥

કથં તૌ ચક્રતુર્યુદ્ધં પ્રહ્લાદેન સમં મુની ।
કથયસ્વ મહાભાગ કારણં વિગ્રહસ્ય વૈ ॥ ૫॥

(કામિની કનકં કાર્યં કારણં વિગ્રહસ્ય વૈ)॥

યુદ્ધબુદ્ધિઃ કથં જાતા તયોશ્ચ તદ્વિરક્તયોઃ ।

તથાવિધં તપસ્તપ્તં તાભ્યાઞ્ચ કેન હેતુના ॥ ૬॥

મોહાર્થં સુખભોગાર્થં સ્વર્ગાર્થં વા પરન્તપ ।
કૃતમત્યુત્કટં તાભ્યાં તપઃ સર્વફલપ્રદમ્ ॥ ૭॥

મુનિભ્યાં શાન્તચિત્તાભ્યાં પ્રાપ્તં કિં ફલમદ્ભુતમ્ ।
તપસા પીડિતો દેહઃ સઙ્ગ્રામેણ પુનઃ પુનઃ ॥ ૮॥

દિવ્યવર્ષશતં પૂર્ણં શ્રમેણ પરિપીડિતૌ ।
ન રાજ્યાર્થે ધને વાપિ ન દારેષુ ગૃહેષુ ચ ॥ ૯॥

કિમર્થં તુ કૃતં યુદ્ધં તાભ્યાં તેન મહાત્મના ।
નિરીહઃ પુરુષઃ કસ્માત્પ્રકુર્યાદ્યુદ્ધમીદૃશમ્ ॥ ૧૦॥

દુઃખદં સર્વથા દેહે જાનન્ધર્મં સનાતનમ્ ।
સુબુદ્ધિઃ સુખદાનીહ કર્માણિ કુરુતે સદા ॥ ૧૧॥

ન દુઃખદાનિ ધર્મજ્ઞ સ્થિતિરેષા સનાતની ।
ધર્મપુત્રૌ હરેરંશૌ સર્વજ્ઞૌ સર્વભૂષિતૌ ॥ ૧૨॥

કૃતવન્તૌ કથં યુદ્ધં દુઃખં ધર્મવિનાશકમ્ ।
ત્યક્ત્વા તપઃ સમાધીતં સુખારામં મહત્ફલમ્ ॥ ૧૩॥

સંયુગં દારુણં કૃષ્ણ નૈવ મૂર્ખોઽપિ વાઞ્છતિ ।
શ્રુતો મયા યયાતિસ્તુ ચ્યુતઃ સ્વર્ગાન્મહીપતિઃ ॥ ૧૪॥

અહઙ્કારભવાત્પાપાત્પાતિતઃ પૃથિવીતલે ।
યજ્ઞકૃદ્દાનકર્તા ચ ધાર્મિકઃ પૃથિવીપતિઃ ॥ ૧૫॥

શબ્દોચ્ચારણમાત્રેણ પાતિતો વજ્રપાણિના ।
અહઙ્કારમૃતે યુદ્ધં ન ભવત્યેવ નિશ્ચયઃ ॥ ૧૬॥

કિં ફલં તસ્ય યુદ્ધસ્ય મુનેઃ પુણ્યવિનાશનમ્ ।
વ્યાસ ઉવાચ ।
રાજન્ સંસારમૂલં હિ ત્રિવિધઃ પરિકીર્તિતઃ ॥ ૧૭॥

અહઙ્કારસ્તુ સર્વજ્ઞૈર્મુનિભિર્ધર્મનિશ્ચયે ।
સ કથં મુનિના ત્યક્તું યોગ્યો દેહભૃતા કિલ ॥ ૧૮॥

કારણેન વિના કાર્યં ન ભવત્યેવ નિશ્ચયઃ ।
તપો દાનં તથા યજ્ઞાઃ સાત્ત્વિકાત્પ્રભવન્તિ તે ॥ ૧૯॥

રાજસાદ્ધા મહાભાગ તામસાત્કલહસ્તથા ।
ક્રિયા સ્વલ્પાપિ રાજેન્દ્ર નાહઙ્કારં વિના ક્વચિત્ ॥ ૨૦॥

શુભા વાપ્યશુભા વાપિ પ્રભવત્યપિ નિશ્ચયઃ ।
અહઙ્કારાદ્ બન્ધકારી નાન્યોઽસ્તિ જગતીતલે ॥ ૨૧॥

યેનેદં રચિતં વિશ્વં કથં તદ્રહિતં ભવેત્ ।
બ્રહ્મા રુદ્રસ્તથા વિષ્ણુરહઙ્કારયુતાસ્ત્વમી ॥ ૨૨॥

અન્યેષાં ચૈવ કા વાર્તા મુનીનાં વસુધાધિપ ।
અહઙ્કારાવૃતં વિશ્વં ભ્રમતીદં ચરાચરમ્ ॥ ૨૩॥

પુનર્જન્મ પુનર્મૃત્યુઃ સર્વં કર્મવશાનુગમ્ ।
દેવતિર્યઙ્મનુષ્યાણાં સંસારેઽસ્મિન્મહીપતે ॥ ૨૪॥

રથાઙ્ગવદસર્વાર્થં ભ્રમણં સર્વદા સ્મૃતમ્ ।
વિષ્ણોરપ્યવતારાણાં સઙ્ખ્યાં જાનાતિ કઃ પુમાન્ ॥ ૨૫॥

વિતતેઽસ્મિંસ્તુ સંસારે ઉત્તમાધમયોનિષુ ।
નારાયણો હરિઃ સાક્ષાન્માત્સ્યં વપુરુપાશ્રિતઃ ॥ ૨૬॥

કામઠં સૌકરં ચૈવ નારસિંહઞ્ચ વામનમ્ ।
યુગે યુગે જગન્નાથો વાસુદેવો જનાર્દનઃ ॥ ૨૭॥

અવતારાનસઙ્ખ્યાતાન્કરોતિ વિધિયન્ત્રિતઃ ।
વૈવસ્વતે મહારાજ સપ્તમે ભગવાન્હરિઃ ॥ ૨૮॥

મન્વન્તરેઽવતારાન્વૈ ચક્રે તાઞ્છૃણુ તત્ત્વતઃ ।
ભૃગુશાપાન્મહારાજ વિષ્ણુર્દેવવરઃ પ્રભુઃ ॥ ૨૯॥

અવતારાનનેકાંસ્તુ કૃતવાનખિલેશ્વરઃ ।
રાજોવાચ ।
સન્દેહોઽયં મહાભાગ હૃદયે મમ જાયતે ॥ ૩૦॥

ભૃગુણા ભગવાન્વિષ્ણુઃ કથં શપ્તઃ પિતામહ ।
હરિણા ચ મુનેસ્તસ્ય વિપ્રિયં કિં કૃતં મુને ॥ ૩૧॥

યદ્રોષાદ્ ભૃગુણા શપ્તો વિષ્ણુર્દેવનમસ્કૃતઃ ।
વ્યાસ ઉવાચ ।

શ‍ૃણુ રાજન્પ્રવક્ષ્યામિ ભૃગોઃ શાપસ્ય કારણમ્ ॥ ૩૨॥

પુરા કશ્યપદાયાદો હિરણ્યકશિપુર્નૃપઃ ।
યદા તદા સુરૈઃ સાર્ધં કૃતં સઙ્ખ્યં પરસ્પરમ્ ॥ ૩૩॥

કૃતે સઙ્ખ્યે જગત્સર્વં વ્યાકુલં સમજાયત ।
હતે તસ્મિન્નૃપે રાજા પ્રહ્લાદઃ સમજાયત ॥ ૩૪॥

દેવાન્સ પીડયામાસ પ્રહ્લાદઃ શત્રુકર્ષણઃ ।
સઙ્ગ્રામો હ્યભવદ્ ઘોરઃ શક્રપ્રહ્લાદયોસ્તદા ॥ ૩૫॥

પૂર્ણં વર્ષશતં રાજઁલ્લોકવિસ્મયકારકમ્ ।
દેવૈર્યુદ્ધં કૃતં ચોગ્રં પ્રહ્રાદસ્તુ પરાજિતઃ ॥ ૩૬॥

નિર્વેદં પરમં પ્રાપ્તો જ્ઞાત્વા ધર્મં સનાતનમ્ ।
વિરોચનસુતં રાજ્યે પ્રતિષ્ઠાપ્ય બલિં નૃપ ॥ ૩૭॥

જગામ સ તપસ્તપ્તું પર્વતે ગન્ધમાદને ।
પ્રાપ્ય રાજ્યં બલિઃ શ્રીમાન્સુરૈર્વૈરં ચકાર હ ॥ ૩૮॥

યતઃ પરસ્પરં યુદ્ધં જાતં પરમદારુણમ્ ।
તતઃ સુરૈર્જિતા દૈત્યા ઇન્દ્રેણામિતતેજસા ॥ ૩૯॥

વિષ્ણુના ચ સહાયેન રાજ્યભ્રષ્ટાઃ કૃતા નૃપ ।
તતઃ પરાજિતા દૈત્યાઃ કાવ્યસ્ય શરણં ગતાઃ ॥ ૪૦॥

કિં ત્વં ન કુરુષે બ્રહ્મન્ સાહાય્યં નઃ પ્રતાપવાન્ ।
સ્થાતું ન શક્નુમો હ્યત્ર પ્રવિશામો રસાતલમ્ ॥ ૪૧॥

યદિ ત્વં ન સહાયોઽસિ ત્રાતું મન્ત્રવિદુત્તમ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્તઃ સોઽબ્રવીદ્દૈત્યાન્કાવ્યઃ કારુણિકો મુનિઃ ॥ ૪૨॥

મા ભૈષ્ટ ધારયિષ્યામિ તેજસા સ્વેન ભોઽસુરાઃ ।
મન્ત્રૈસ્તથૌષધીભિશ્ચ સાહાય્યં વઃ સદૈવ હિ ॥ ૪૩॥

કરિષ્યામિ કૃતોત્સાહા ભવન્તુ વિગતજ્વરાઃ ।
વ્યાસ ઉવાચ ।
તતસ્તે નિર્ભયા જાતા દૈત્યાઃ કાવ્યસ્ય સંશ્રયાત્ ॥ ૪૪॥

દેવૈઃ શ્રુતસ્તુ વૃત્તાન્તઃ સર્વૈશ્ચારમુખાત્કિલ ।

તત્ર સમ્મન્ત્ર્ય તે દેવાઃ શક્રેણ ચ પરસ્પરમ્ ॥ ૪૫॥

મન્ત્રં ચક્રુઃ સુસંવિગ્નાઃ કાવ્યમન્ત્રપ્રભાવતઃ ।
યોદ્ધું ગચ્છામહે તૂર્ણં યાવન્ન ચ્યાવયન્તિ વૈ ॥ ૪૬॥

પ્રસહ્ય હત્વા શિષ્ટાંસ્તુ પાતાલં પ્રાપયામહે ।
દૈત્યાઞ્જગ્મુસ્તતો દેવાઃ સંરુષ્ટાઃ શસ્ત્રપાણયઃ ॥ ૪૭॥

જગ્મુસ્તાન્વિષ્ણુસહિતા દાનવાન્ હરિણોદિતાઃ ।
વધ્યમાનાસ્તુ તે દૈત્યાઃ સન્ત્રસ્તા ભયપીડિતાઃ ॥ ૪૮॥

કાવ્યસ્ય શરણં જગ્મૂ રક્ષ રક્ષેતિ ચાબ્રુવન્ ।
તાઞ્છુક્રઃ પીડિતાન્દૃષ્ટ્વા દેવૈર્દૈત્યાન્મહાબલાન્ ॥ ૪૯॥

મા ભૈષ્ટેતિ વચઃ પ્રાહ મન્ત્રૌષધિબલાદ્વિભુઃ ।
દૃષ્ટ્વા કાવ્યં સુરાઃ સર્વે ત્યક્ત્વા તાન્પ્રયયુઃ કિલ ॥ ૫૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે ભૃગુશાપકારણવર્ણનં નામ દશમોઽધ્યાયઃ ॥ ૪.૧૦॥

## ૪.૧૧ એકાદશોઽધ્યાયઃ । શુક્રમાતુર્વધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તથા ગતેષુ દેવેષુ કાવ્યસ્તાન્પ્રત્યુવાચ હ ।
બ્રહ્મણા પૂર્વમુક્તં યચ્છૃણુધ્વં દાનવોત્તમાઃ ॥ ૧॥

વિષ્ણુર્દૈત્યવધે યુક્તો હનિષ્યતિ જનાર્દનઃ ।
વારાહરૂપં સંસ્થાય હિરણ્યાક્ષો યથા હતઃ ॥ ૨॥

યથા નૃસિંહરૂપેણ હિરણ્યકશિપુર્હતઃ ।
તથા સર્વાન્કૃતોત્સાહો હનિષ્યતિ ન ચાન્યથા ॥ ૩॥

ન મે મન્ત્રબલં સમ્યક્પ્રતિભાતિ યથા હરિમ્ ।
જેતું યૂયં સમર્થાઃ સ્થ મયા ત્રાતાઃ સુરાનથ ॥ ૪॥

તસ્માત્કાલં પ્રતીક્ષધ્વં કિયન્તં દાનવોત્તમાઃ ।
અહમદ્ય મહાદેવં મન્ત્રાર્થં પ્રવ્રજામિ વૈ ॥ ૫॥

પ્રાપ્ય મન્ત્રાન્મહાદેવાદાગમિષ્યામિ સામ્પ્રતમ્ ।
યુષ્મભ્યં તાન્પ્રદાસ્યામિ યથાર્થં દાનવોત્તમાઃ ॥ ૬॥

દૈત્યા ઊચુઃ ।
પરાજિતાઃ કથં સ્થાતું પૃથિવ્યાં મુનિસત્તમ ।
શક્તા ભવામોઽપ્યબલાસ્તાવત્કાલં પ્રતીક્ષિતુમ્ ॥ ૭॥

નિહતા બલિનઃ સર્વે કેચિચ્છિષ્ટાશ્ચ દાનવાઃ ।
નાદ્ય યુક્તાશ્ચ સઙ્ગ્રામે સ્થાતુમેવં સુખાવહાઃ ॥ ૮॥

શુક્ર ઉવાચ ।
યાવદહં મન્ત્રવિદ્યામાનયિષ્યામિ શઙ્કરાત્ ।
તાવદ્ભવદ્ભિઃ સ્થાતવ્યં તપોયુક્તૈઃ શમાન્વિતૈઃ ॥ ૯॥

સામદાનાદયઃ પ્રોક્તા વિદ્વદ્ભિઃ સમયોચિતાઃ ।
દેશં કાલં બલં વીરૈર્જ્ઞાત્વા શક્તિં બલં બુધૈઃ ॥ ૧૦॥

સેવાથ સમયે કાર્યા શત્રૂણાં શુભકામ્યયા ।
સ્વશક્ત્યુપચયે કાલે હન્તવ્યાસ્તે મનીષિભિઃ ॥ ૧૧॥

તદદ્ય વિનયં કૃત્વા સામપૂર્વં છલેન વૈ ।
તિષ્ઠધ્વં સ્વનિકેતેષુ મદાગમનકાઙ્ક્ષયા ॥ ૧૨॥

પ્રાપ્ય મન્ત્રાન્મહાદેવાદાગમિષ્યામિ દાનવાઃ ।
યુધ્યામહે પુનર્દેવાન્માન્ત્રમાસ્થાય વૈ બલમ્ ॥ ૧૩॥

ઇત્યુક્ત્વાથ ભૃગુસ્તેભ્યો જગામ કૃતનિશ્ચયઃ ।
મહાદેવં મહારાજ મન્ત્રાર્થં મુનિસત્તમઃ ॥ ૧૪॥

દાનવાઃ પ્રેષયામાસુઃ પ્રહ્લાદં સુરસન્નિધૌ ।
સત્યવાદિનમવ્યગ્રં સુરાણાં પ્રત્યયપ્રદમ્ ॥ ૧૫॥

પ્રહ્લાદસ્તુ સુરાન્પ્રાહ પ્રશ્રયાવનતો નૃપઃ ।
અસુરૈઃ સહિતસ્તત્ર વચનં નમ્રતાયુતમ્ ॥ ૧૬॥

ન્યસ્તશસ્ત્રા વયં સર્વે નિઃસન્નાહાસ્તથૈવ ચ ।
દેવાસ્તપશ્ચરિષ્યામઃ સંવૃતા વલ્કલૈર્યુતાઃ ॥ ૧૭॥

પ્રહ્લાદસ્ય વચઃ શ્રુત્વા સત્યાભિવ્યાહૃતં તુ તત્ ।
તતો દેવા ન્યવર્તન્ત વિજ્વરા મુદિતાશ્ચ તે ॥ ૧૮॥

ન્યસ્તશસ્ત્રેષુ દૈત્યેષુ વિનિવૃત્તાસ્તદા સુરાઃ ।

વિશ્રબ્ધાઃ સ્વગૃહાન્ગત્વા ક્રીડાસક્તાઃ સુસંસ્થિતાઃ ॥ ૧૯॥

દૈત્યા દમ્ભં સમાલમ્બ્ય તાપસાસ્તપિસંયુતાઃ ।
કશ્યપસ્યાશ્રમે વાસં ચક્રુઃ કાવ્યાગમેચ્છયા ॥ ૨૦॥

કાવ્યો ગત્વાથ કૈલાસં મહાદેવં પ્રણમ્ય ચ ।
ઉવાચ વિભુના પૃષ્ટઃ કિં તે કાર્યમિતિ પ્રભુઃ ॥ ૨૧॥

મન્ત્રાનિચ્છામ્યહં દેવ યે ન સન્તિ બૃહસ્પતૌ ।
પરાજયાય દેવાનામસુરાણાં જયાય ચ ॥ ૨૨॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તસ્ય સર્વજ્ઞઃ શઙ્કરઃ શિવઃ ।
ચિન્તયામાસ મનસા કિં કર્તવ્યમતઃ પરમ્ ॥ ૨૩॥

સુરેષુ દ્રોહબુદ્ધ્યાસૌ મન્ત્રાર્થમિહ સામ્પ્રતમ્ ।
પ્રાપ્તઃ કાવ્યો ગુરુસ્તેષાં દૈત્યાનાં વિજયાય ચ ॥ ૨૪॥

રક્ષણીયા મયા દેવા ઇતિ સઞ્ચિન્ત્ય શઙ્કરઃ ।
દુષ્કરં વ્રતમત્યુગ્રં તમુવાચ મહેશ્વરઃ ॥ ૨૫॥

પૂર્ણં વર્ષસહસ્રં તુ કણધૂમમવાક્છિરાઃ ।
યદિ પાસ્યસિ ભદ્રં તે તતો મન્ત્રાનવાપ્સ્યસિ ॥ ૨૬॥

ઇત્યુક્તોઽસૌ પ્રણમ્યેશં બાઢમિત્યબ્રવીદ્વચઃ ।
વ્રતં ચરામ્યહં દેવ ત્વયાજ્ઞપ્તઃ સુરેશ્વર ॥ ૨૭॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા શઙ્કરં કાવ્યશ્ચકાર વ્રતમુત્તમમ્ ।
ધૂમપાનરતઃ શાન્તો મન્ત્રાર્થં કૃતનિશ્ચયઃ ॥ ૨૮॥

તતો દેવાઃ પરિજ્ઞાય કાવ્યં વ્રતરતં તદા ।
દૈત્યાન્દમ્ભરતાંશ્ચૈવ બભૂવુર્મન્ત્રતત્પરાઃ ॥ ૨૯॥

વિચાર્ય મનસા સર્વે સઙ્ગ્રામાયોદ્યતા નૃપ ।
યયુર્ધૃતાયુધાસ્તત્ર યત્ર તે દાનવોત્તમાઃ ॥ ૩૦॥

તાનાગતાન્સમીક્ષ્યાથ સાયુધાન્દંશિતાંસ્તથા ।
આસંસ્તે ભયસંવિગ્ના દૈત્યા દેવાન્સમન્તતઃ ॥ ૩૧॥

ઉત્પેતુઃ સહસા તે વૈ સન્નદ્ધાન્ભયકર્શિતાઃ ।

અબ્રુવન્વચનં તથ્યં તે દેવાન્વલદર્પિતાન્ ॥ ૩૨॥

ન્યસ્તશસ્ત્રે ભયવતિ આચાર્યે વ્રતમાસ્થિતે ।
દત્ત્વાભયં પુરા દેવાઃ સમ્પ્રાપ્તા નો જિઘાંસયા ॥ ૩૩॥

સત્યં વઃ ક્વ ગતં દેવા ધર્મશ્ચ શ્રુતિનોદિતઃ ।
ન્યસ્તશસ્ત્રા ન હન્તવ્યા ભીતાશ્ચ શરણં ગતાઃ ॥ ૩૪॥

દેવા ઊચુઃ ।
ભવદ્ભિઃ પ્રેષિતઃ કાવ્યો મન્ત્રાર્થં કુહકેન ચ ।
તપો જ્ઞાતં હિ યુષ્માકં તેન યુધ્યામ એવ હિ ॥ ૩૫॥

સજ્જા ભવન્તુ યુદ્ધાય સંરબ્ધાઃ શસ્ત્રપાણયઃ ।
શત્રુશ્છિદ્રેણ હન્તવ્ય એષ ધર્મઃ સનાતનઃ ॥ ૩૬॥

વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં દૈત્યા વિચાર્ય ચ પરસ્પરમ્ ।
પલાયનપરાઃ સર્વે નિર્ગતા ભયવિહ્વલાઃ ॥ ૩૭॥

શરણં દાનવા જગ્મુર્ભીતાસ્તે કાવ્યમાતરમ્ ।
દૃષ્ટ્વા તાનતિસન્તપ્તાનભયં ચ દદાવથ ॥ ૩૮॥

કાવ્યમાતોવાચ ।
ન ભેતવ્યં ન ભેતવ્યં ભયં ત્યજત દાનવાઃ ।
મત્સન્નિધૌ વર્તમાનાન્ન ભીર્ભવિતુમર્હતિ ॥ ૩૯॥

તચ્છ્રુત્વા વચનં દૈત્યાઃ સ્થિતાસ્તત્ર ગતવ્યથાઃ ।
નિરાયુધા હ્યસમ્ભ્રાન્તાસ્તત્રાશ્રમવરેઽસુરાઃ ॥ ૪૦॥

દેવાસ્તાન્વિદ્રુતાન્વીક્ષ્ય દાનવાસ્તે પદાનુગાઃ ।
અભિજગ્મુઃ પ્રસહ્યૈતાનવિચાર્ય બલાબલમ્ ॥ ૪૧॥

તત્રાગતાઃ સુરાઃ સર્વે હન્તું દૈત્યાન્સમુદ્યતાઃ ।
વારિતાઃ કાવ્યમાત્રાપિ જઘ્નુસ્તાનાશ્રમસ્થિતાન્ ॥ ૪૨॥

હન્યમાનાન્સુરૈર્દૃષ્ટ્વા કાવ્યમાતાતિવેપિતા ।
ઉવાચ સર્વાન્સનિદ્રાંસ્તપસા વૈ કરોમ્યહમ્ ॥ ૪૩॥

ઇત્યુક્ત્વા પ્રેરિતા નિદ્રા તાનાગત્ય પપાત ચ ।
સેન્દ્રા નિદ્રાવશં યાતા દેવા મૂકવદાસ્થિતાઃ ॥ ૪૪॥

ઇન્દ્રં નિદ્રાજિતં દૃષ્ટ્વા દીનં વિષ્ણુરભાષત ।
માં ત્વં પ્રવિશ ભદ્રં તે નયે ત્વાં ચ સુરોત્તમ ॥ ૪૫॥

એવમુક્તસ્તતો વિષ્ણું પ્રવિવેશ પુરન્દરઃ ।
નિર્ભયો ગતનિદ્રશ્ચ બભૂવ હરિરક્ષિતઃ ॥ ૪૬॥

રક્ષિતં હરિણા દૃષ્ટ્વા શક્રં તત્ર ગતવ્યથમ્ ।
કાવ્યમાતા તતઃ ક્રુદ્ધા વચનં ચેદમબ્રવીત્ ॥ ૪૭॥

મઘવંસ્ત્વાં ભક્ષયામિ સવિષ્ણું વૈ તપોબલાત્ ।
પશ્યતાં સર્વદેવાનામીદૃશં મે તપોબલમ્ ॥ ૪૮॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તૌ તુ તયા દેવૌ વિષ્ણ્વિન્દ્રૌ યોગવિદ્યયા ।
અભિભૂતૌ મહાત્માનૌ સ્તબ્ધૌ તૌ સમ્બભૂવતુઃ ॥ ૪૯॥

વિસ્મિતાસ્તુ તદા દેવા દૃષ્ટ્વા તાવતિબાધિતૌ ।
ચક્રુઃ કિલકિલાશબ્દં તતસ્તે દીનમાનસાઃ ॥ ૫૦॥

ક્રોશમાનાન્સુરાન્દૃષ્ટ્વા વિષ્ણું પ્રાહ શચીપતિઃ ।
વિશેષેણાભિભૂતોઽસ્મિ ત્વત્તોઽહં મધુસૂદન ॥ ૫૧॥

જહ્યેનાં તરસા વિષ્ણો યાવન્નૌ ન દહેત્પ્રભો ।
તપસા દર્પિતાં દુષ્ટાં મા વિચારય માધવ ॥ ૫૨॥

ઇત્યુક્તો ભગવાન્વિષ્ણુઃ શક્રેણ પ્રથિતેન ચ ।
ચક્રં સસ્માર તરસા ઘૃણાં ત્યક્ત્વાથ માધવઃ ॥ ૫૩॥

સ્મૃતમાત્રં તુ સમ્પ્રાપ્તં ચક્રં વિષ્ણુવશાનુગમ્ ।
દધાર ચ કરે ક્રુદ્ધો વધાર્થં શક્રનોદિતઃ ॥ ૫૪॥

ગૃહીત્વા તત્કરે ચક્રં શિરશ્ચિચ્છેદ રંહસા ।
હતાં દૃષ્ટ્વા તુ તાં શક્રો મુદિતશ્ચાભવત્તદા ॥ ૫૫॥

દેવાશ્ચાતીવ સન્તુષ્ટા હરિં જય જયેતિ ચ ।
તુષ્ટુવુર્મુદિતાઃ સર્વે સઞ્જાતા વિગતજ્વરાઃ ॥ ૫૬॥

ઇન્દ્રવિષ્ણૂ તુ સઞ્જાતૌ તત્ક્ષણાદ્ધૃદયવ્યથૌ ।
સ્ત્રીવધાચ્છઙ્કમાનૌ તુ ભૃગોઃ શાપં દુરત્યયમ્ ॥ ૫૭॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં

ચતુર્થસ્કન્ધે શુક્રમાતુર્વધવર્ણનં નામૈકાદશોઽધ્યાયઃ ॥ ૪.૧૧॥

## ૪.૧૨ દ્વાદશોઽધ્યાયઃ । જયન્ત્યા શુક્રસહવાસવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
તં દૃષ્ટ્વા તુ વધં ઘોરં ચુક્રોધ ભગવાન્ભૃગુઃ ।
વેપમાનોઽતિદુઃખાર્તઃ પ્રોવાચ મધુસૂદનમ્ ॥ ૧॥

ભૃગુરુવાચ ।
અકૃત્યં તે કૃતં વિષ્ણો જાનન્પાપં મહામતે ।
વધોઽયં વિપ્રજાતાયા મનસા કર્તુમક્ષમઃ ॥ ૨॥

આખ્યાતસ્ત્વં સત્ત્વગુણઃ સ્મૃતો બ્રહ્મા ચ રાજસઃ ।
તથાસૌ તામસઃ શમ્ભુર્વિપરીતં કથં સ્મૃતમ્ ॥ ૩॥

તામસસ્ત્વં કથં જાતઃ કૃતં કર્માતિનિન્દિતમ્ ।
અવધ્યા સ્ત્રી ત્વયા વિષ્ણો હતા કસ્માન્નિરાગસા ॥ ૪॥

શપામિ ત્વાં દુરાચારં કિમન્યત્પ્રકરોમિ તે ।
વિધુરોઽહં કૃતઃ પાપ ત્વયાહં શક્રકારણાત્ ॥ ૫॥

ન શપેઽહં તથા શક્રં શપે ત્વાં મધુસૂદન ।
સદા છલપરોઽસિ ત્વં કીટયોનિર્દુરાશયઃ ॥ ૬॥

યે ચ ત્વાં સાત્ત્વિકં પ્રાહુસ્તે મૂર્ખા મુનયઃ કિલ ।
તામસસ્ત્વં દુરાચારઃ પ્રત્યક્ષં મે જનાર્દન ॥ ૭॥

અવતારા મૃત્યુલોકે સન્તુ મચ્છાપસમ્ભવાઃ ।
પ્રાયો ગર્ભભવં દુઃખં ભુઙ્ક્ષ્વ પાપાજ્જનાર્દન ॥ ૮॥

વ્યાસ ઉવાચ ।
તતસ્તેનાથ શાપેન નષ્ટે ધર્મે પુનઃ પુનઃ ।
લોકસ્ય ચ હિતાર્થાય જાયતે માનુષેષ્વિહ ॥ ૯॥

રાજોવાચ ।
ભૃગુભાર્યા હતા તત્ર ચક્રેણામિતતેજસા ।
ગાર્હસ્થ્યઞ્ચ પુનસ્તસ્ય કથં જાતં મહાત્મનઃ ॥ ૧૦॥

વ્યાસ ઉવાચ ।

ઇતિ શપ્ત્વા હરિં રોષાત્તદાદાય શિરસ્ત્વરન્ ।
કાયે સંયોજ્ય તરસા ભૃગુઃ પ્રોવાચ કાર્યવિત્ ॥ ૧૧॥

અદ્ય ત્વાં વિષ્ણુના દેવિ હતાં સઞ્જીવયામ્યહમ્ ।
યદિ કૃત્સ્નો મયા ધર્મો જ્ઞાયતે ચરિતોઽપિ વા ॥ ૧૨॥

તેન સત્યેન જીવેત યદિ સત્યં બ્રવીમ્યહમ્ ।
પશ્યન્તુ દેવતાઃ સર્વા મમ તેજોબલં મહત્ ॥ ૧૩॥

અદ્ભિસ્ત્વાં પ્રોક્ષ્ય શીતાભિર્જીવયામિ તપોબલાત્ ।
સત્યં શૌચં તથા વેદા યદિ મે તપસો બલમ્ ॥ ૧૪॥

વ્યાસ ઉવાચ ।
અદ્ભિઃ સમ્પ્રોક્ષિતા દેવી સદ્યઃ સઞ્જીવિતા તદા ।
ઉત્થિતા પરમપ્રીતા ભૃગોર્ભાર્યા શુચિસ્મિતા ॥ ૧૫॥

તતસ્તાં સર્વભૂતાનિ દૃષ્ટ્વા સુપ્તોત્થિતામિવ ।
સાધુ સાધ્વિતિ તં તાં તુ તુષ્ટુવુઃ સર્વતો દિશમ્ ॥ ૧૬॥

એવં સઞ્ચીવિતા તેન ભૃગુણા વરવર્ણિની ।
વિસ્મયં પરમં જગ્મુર્દેવાઃ સેન્દ્રા વિલોક્ય તત્ ॥ ૧૭॥

ઇન્દ્રઃ સુરાનથોવાચ મુનિના જીવિતા સતી ।
કાવ્યસ્તપ્ત્વા તપો ઘોરં કિં કરિષ્યતિ મન્ત્રવિત્ ॥ ૧૮॥

વ્યાસ ઉવાચ ।
ગતા નિદ્રા સુરેન્દ્રસ્ય દેહેઽક્ષેમમભૂન્નૃપ ।
સ્મૃત્વા કાવ્યસ્ય વૃત્તાન્તં મન્ત્રાર્થમતિદારુણમ્ ॥ ૧૯॥

વિમૃશ્ય મનસા શક્રો જયન્તીં સ્વસુતાં તદા ।
ઉવાચ કન્યાં ચાર્વઙ્ગીં સ્મિતપૂર્વમિદં વચઃ ॥ ૨૦॥

ગચ્છ પુત્રિ મયા દત્તા કાવ્યાય ત્વં તપસ્વિને ।
સમારાધય તન્વઙ્ગિ મત્કૃતે તં વશં કુરુ ॥ ૨૧॥

ઉપચારૈર્મુનિં તૈસ્તૈઃ સમારાધ્ય મનઃપ્રિયૈઃ ।
ભયં મે તરસા ગત્વા હર તત્ર વરાશ્રમે ॥ ૨૨।
સા પિતુર્વચનં શ્રુત્વા તત્રાગચ્છન્મનોરમા ।
તમપશ્યદ્વિશાલાક્ષી પિબન્તં ધૂમમાશ્રમે ॥ ૨૩॥

તસ્ય દેહં સમાલોક્ય સ્મૃત્વા વાક્યં પિતુસ્તદા ।
કદલીદલમાદાય વીજયામાસ તં મુનિમ્ ॥ ૨૪॥

નિર્મલં શીતલં વારિ સમાનીય સુવાસિતમ્ ।
પાનાય કલ્પયામાસ ભક્ત્યા પરમયા લઘુ ॥ ૨૫॥

છાયાં વસ્ત્રાતપત્રેણ ભાસ્કરે મધ્યગે સતિ ।
રચયામાસ તન્વઙ્ગી સ્વયં ધર્મે સ્થિતા સતી ॥ ૨૬॥

ફલાન્યાનીય દિવ્યાનિ પક્વાનિ મધુરાણિ ચ ।
મુમોચાગ્રે મુનેસ્તસ્ય ભક્ષાર્થં વિહિતાનિ ચ ॥ ૨૭॥

કુશાઃ પ્રાદેશમાત્રા હિ હરિતાઃ શુકસન્નિભાઃ ।
દધારાગ્રેઽથ પુષ્પાણિ નિત્યકર્મસમૃદ્ધયે ॥ ૨૮॥

નિદ્રાર્થં કલ્પયામાસ સંસ્તરં પલ્લવાન્વિતમ્ ।
તસ્મિન્મુનૌ ચાદરસ્થા ચકાર વ્યજનં શનૈઃ ॥ ૨૯॥

હાવભાવાદિકં કિઞ્ચિદ્વિકારજનનં ચ તત્ ।
ન ચકાર જયન્તી સા શાપભીતા મુનેસ્તદા ॥ ૩૦॥

સ્તુતિં ચકાર તન્વઙ્ગી ગીર્ભિસ્તસ્ય મહાત્મનઃ ।
સુભાષિણ્યનુકૂલાભિઃ પ્રીતિકર્ત્રીભિરપ્યુત ॥ ૩૧॥

પ્રબુદ્ધે જલમાદાય દધારાચમનાય ચ ।
મનોઽનુકૂલં સતતં કુર્વન્તી વ્યચરત્તદા ॥ ૩૨॥

ઇન્દ્રોઽપિ સેવકાંસ્તત્ર પ્રેષયામાસ ચાતુરઃ ।
પ્રવૃત્તિં જ્ઞાતુકામો વૈ મુનેસ્તસ્ય જિતાત્મનઃ ॥ ૩૩॥

એવં બહૂનિ વર્ષાણિ પરિચર્યાપરાભવત્ ।
નિર્વિકારા જિતક્રોધા બ્રહ્મચર્યપરા સતી ॥ ૩૪॥

પૂર્ણે વર્ષસહસ્રે તુ પરિતુષ્ટો મહેશ્વરઃ ।
વરેણ છન્દયામાસ કાવ્યં પ્રીતમના હરઃ ॥ ૩૫॥

ઈશ્વર ઉવાચ ।
યચ્ચ કિઞ્ચિદપિ બ્રહ્મન્વિદ્યતે ભૃગુનન્દન ।
પ્રતિપશ્યસિ યત્સર્વં યચ્ચ વાચ્યં ન કસ્યચિત્ ॥ ૩૬॥

સર્વાભિભાવકત્વેન ભવિષ્યસિ ન સંશયઃ ।

અવધ્યઃ સર્વભૂતાનાં પ્રજેશશ્ચ દ્વિજોત્તમઃ ॥ ૩૭॥

વ્યાસ ઉવાચ ।
એવં દત્ત્વા વરાઞ્છમ્ભુસ્તત્રૈવાન્તરધીયત ।
કાવ્યસ્તામથ સંવીક્ષ્ય જયન્તીં વાક્યમબ્રવીત્ ॥ ૩૮॥

કાસિ કસ્યાસિ સુશ્રોણિ બ્રૂહિ કિં તે ચિકીર્ષિતમ્ ।
કિમર્થમિહ સમ્પ્રાપ્તા કાર્યં વદ વરોરુ મે ॥ ૩૯॥

કિં વાઞ્છસિ કરોમ્યદ્ય દુષ્કરં ચેત્સુલોચને ।
પ્રીતોઽસ્મિ ત્વત્કૃતેનાદ્ય વરં વરય સુવ્રતે ॥ ૪૦॥

તતઃ સા તુ મુનિં પ્રાહ જયન્તી મુદિતાનના ।
ચિકીર્ષિતં મે ભગવંસ્તપસા જ્ઞાતુમર્હસિ ॥ ૪૧॥

શુક્ર ઉવાચ ।
જ્ઞાતં મયા તથાપિ ત્વં બ્રૂહિ યન્મનસેપ્સિતમ્ ।
કરોમિ સર્વથા ભદ્રં પ્રીતોઽસ્મિ પરિચર્યયા ॥ ૪૨॥

જયન્ત્યુવાચ ।
શક્રસ્યાહં સુતા બ્રહ્મન્ પિત્રા તુભ્યં સમર્પિતા ।
જયન્તી નામતશ્ચાહં જયન્તાવરજા મુને ॥ ૪૩॥

સકામાસ્મિ ત્વયિ વિભો વાઞ્છિતં કુરુ મેઽધુના ।
રંસ્યે ત્વયા મહાભાગ ધર્મતઃ પ્રીતિપૂર્વકમ્ ॥ ૪૪॥

શુક્ર ઉવાચ ।
મયા સહ ત્વં સુશ્રોણિ દશવર્ષાણિ ભામિનિ ।
સર્વૈર્ભૂતૈરદૃશ્યા ચ રમસ્વેહ યદૃચ્છયા ॥ ૪૫॥

વ્યાસ ઉવાચ ।
એવમુક્ત્વા ગૃહં ગત્વા જયન્ત્યાઃ પાણિમુદ્વહન્ ।
તયા સહાવસદ્દેવ્યા દશવર્ષાણિ ભાર્ગવઃ ॥ ૪૬॥

અદૃશ્યઃ સર્વભૂતાનાં માયયા સંવૃતઃ પ્રભુઃ ।
દૈત્યાસ્તમાગતં શ્રુત્વા કૃતાર્થં મન્ત્રસંયુતમ્ ॥ ૪૭॥

અભિજગ્મુર્ગૃહે તસ્ય મુદિતાસ્તે દિદૃક્ષવઃ ।
નાપશ્યન્ રમમાણં તે જયન્ત્યા સહ સંયુતમ્ ॥ ૪૮॥

તદા વિમનસઃ સર્વે જાતા ભગ્નોદ્યમાશ્ચ તે ।
ચિન્તાપરાતિદીનાશ્ચ વીક્ષમાણાઃ પુનઃ પુનઃ ॥ ૪૯॥

અદૃષ્ટ્વા તં તુ સંવૃત્તં પ્રતિજગ્મુર્યથાગતમ્ ।
સ્વગૃહાન્દૈત્યવર્યાસ્તે ચિન્તાવિષ્ટા ભયાતુરાઃ ॥ ૫૦॥

રમમાણં તથા જ્ઞાત્વા શક્રઃ પ્રોવાચ તં ગુરુમ્ ।
બૃહસ્પતિં મહાભાગ કિં કર્તવ્યમિતઃ પરમ્ ॥ ૫૧॥

ગચ્છાદ્ય દાનવાન્બ્રહ્મન્માયયા ત્વં પ્રલોભય ।
અસ્માકં કુરુ કાર્યં ત્વં બુદ્ધ્યા સઞ્ચિન્ત્ય માનદ ॥ ૫૨॥

તચ્છ્રુત્વા વચનં કાવ્યં રમમાણં સુસંવૃતમ્ ।
જ્ઞાત્વા તદ્રૂપમાસ્થાય દૈત્યાન્મતિ યયૌ ગુરુઃ ॥ ૫૩॥

ગત્વા તત્રાતિભક્ત્યાસૌ દાનવાન્સમુપાહ્વયત્ ।
આગતાસ્તેઽસુરાઃ સર્વે દદૃશુઃ કાવ્યમગ્રતઃ ॥ ૫૪॥

પ્રણમ્ય સંસ્થિતાઃ સર્વે કાવ્યં મત્વાતિમોહિતાઃ ।
ન વિદુસ્તે ગુરોર્માયાં કાવ્યરૂપવિભાવિનીમ્ ॥ ૫૫॥

તાનુવાચ ગુરુઃ કાવ્યરૂપઃ પ્રચ્છન્નમાયયા ।
સ્વાગતં મમ યાજ્યાનાં પ્રાપ્તોઽહં વો હિતાય વૈ ॥ ૫૬॥

અહં વો બોધયિષ્યામિ વિદ્યાં પ્રાપ્તામમાયયા ।
તપસા તોષિતઃ શમ્ભુર્યુષ્મત્કલ્યાણહેતવે ॥ ૫૭॥

તચ્છ્રુત્વા પ્રીતમનસો જાતાસ્તે દાનવોત્તમાઃ ।
કૃતકાર્યં ગુરું મત્વા જહૃષુસ્તે વિમોહિતાઃ ॥ ૫૮॥

પ્રણેમુસ્તે મુદા યુક્તા નિરાતઙ્કા ગતવ્યથાઃ ।
દેવેભ્યશ્ચ ભયં ત્યક્ત્વા તસ્થુઃ સર્વે નિરામયાઃ ॥ ૫૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે જયન્ત્યા શુક્રસહવાસવર્ણનં નામ દ્વાદશોઽધ્યાયઃ ॥ ૪.૧૨॥

## ૪.૧૩ ત્રયોદશોઽધ્યાયઃ । શુક્રરૂપેણ ગુરુણા દૈત્યવઞ્ચનાવર્ણનમ્ ।

રાજોવાચ ।
કિં કૃતં ગુરુણા પશ્ચાદ્ભૃગુરૂપેણ વર્તતા ।

છલેનૈવ હિ દૈત્યાનાં પૌરોહિત્યેન ધીમતા ॥ ૧॥

ગુરુઃ સુરાણામનિશં સર્વવિદ્યાનિધિસ્તથા ।
સુતોઽઙ્ગિરસ એવાસૌ સ કથં છલકૃન્મુનિઃ ॥ ૨॥

ધર્મશાસ્ત્રેષુ સર્વેષુ સત્યં ધર્મસ્ય કારણમ્ ।
કથિતં મુનિભિર્યેન પરમાત્માપિ લભ્યતે ॥ ૩॥

વાચસ્પતિસ્તથા મિથ્યાવક્તા ચેદ્દાનવાન્પ્રતિ ।
કઃ સત્યવક્તા સંસારે ભવિષ્યતિ ગૃહાશ્રમી ॥ ૪॥

આહારાદધિકં ભોજ્યં જહ્માણ્ડવિભવેઽપિ ન ।
તદર્થં મુનયો મિથ્યા પ્રવર્તન્તે કથં મુને ॥ ૫॥

શબ્દપ્રમાણમુચ્છેદં શિષ્ટાભાવે ગતં ન કિમ્ ।
છલકર્મપ્રવૃત્તે વાવિગીતત્વં ગુરૌ કથમ્ ॥ ૬॥

દેવાઃ સત્ત્વસમુદ્ભૂતા રાજસા માનવાઃ સ્મૃતાઃ ।
તિર્યઞ્ચસ્તામસાઃ પ્રોક્તા ઉત્પત્તૌ મુનિભિઃ કિલ ॥ ૭॥

અમરાણાં ગુરુઃ સાક્ષાન્મિથ્યાવાદી સ્વયં યદિ ।
તદા કઃ સત્યવક્તા સ્યાદ્રાજસસ્તામસઃ પુનઃ ॥ ૮॥

ક્વ સ્થિતિસ્તસ્ય ધર્મસ્ય સન્દેહોઽયં મમાત્મનઃ ।
કા ગતિઃ સર્વજન્તૂનાં મિથ્યાભૂતે જગત્ત્રયે ॥ ૯॥

હરિર્બ્રહ્મા શચીકાન્તસ્તથાન્યે સુરસત્તમાઃ ।
સર્વે છલવિધૌ દક્ષા મનુષ્યાણાઞ્ચ કા કથા ॥ ૧૦॥

કામક્રોધાભિસન્તપ્તા લોભોપહતચેતસઃ ।
છલે દક્ષાઃ સુરાઃ સર્વે મુનયશ્ચ તપોધનાઃ ॥ ૧૧॥

વસિષ્ઠો વામદેવશ્ચ વિશ્વામિત્રો ગુરુસ્તથા ।
એતે પાપરતાઃ કાત્ર ગતિર્ધર્મસ્ય માનદ ॥ ૧૨॥

ઇન્દ્રોઽગ્નિશ્ચન્દ્રમા વેધાઃ પરદારાભિલમ્પટાઃ ।
આર્યત્વં ભુવનેષ્વેષુ સ્થિતં કુત્ર મુને વદ ॥ ૧૩॥

વચનં કસ્ય મન્તવ્યમુપદેશધિયાનઘ ।
સર્વે લોભાભિભૂતાસ્તે દેવાશ્ચ મુનયસ્તદા ॥ ૧૪॥

વ્યાસ ઉવાચ ।
કિં વિષ્ણુઃ કિં શિવો બ્રહ્મા મઘવા કિં બૃહસ્પતિઃ ।
દેહવાન્ પ્રભવત્યેવ વિકારૈઃ સંયુતસ્તદા ॥ ૧૫॥

રાગી વિષ્ણુઃ શિવો રાગી બ્રહ્માપિ રાગસંયુતઃ ।
(રાગવાન્કિમકૃત્યં વૈ ન કરોતિ નરાધિપ)॥

રાગવાનપિ ચાતુર્યાદ્વિદેહ ઇવ લક્ષ્યતે ॥ ૧૬॥

સમ્પ્રાપ્તે સઙ્કટે સોઽપિ ગુણૈઃ સમ્બાધ્યતે કિલ ।
કારણાદ્રહિતં કાર્યં કથં ભવિતુમર્હતિ ॥ ૧૭॥

બ્રહ્માદીનાં ચ સર્વેષાં ગુણા એવ હિ કારણમ્ ।
પઞ્ચવિંશત્સમુદ્ભૂતા દેહાસ્તેષાં ન ચાન્યથા ॥ ૧૮॥

કાલે મરણધર્માસ્તે સન્દેહઃ કોઽત્ર તે નૃપ ।
પરોપદેશે વિસ્પષ્ટં શિષ્ટાઃ સર્વે ભવન્તિ ચ ॥ ૧૯॥

વિપ્લુતિર્હ્યવિશેષેણ સ્વકાર્યે સમુપસ્થિતે ।
કામઃ ક્રોધસ્તથા લોભદ્રોહાહઙ્કારમત્સરાઃ ॥ ૨૦॥

દેહવાન્કઃ પરિત્યક્તુમીશો ભવતિ તાન્પુનઃ ।
સંસારોઽયં મહારાજ સદૈવૈવંવિધઃ સ્મૃતઃ ॥ ૨૧॥

નાન્યથા પ્રભવત્યેવ શુભાશુભમયઃ કિલ ।
કદાચિદ્ભગવાન્વિષ્ણુસ્તપશ્ચરતિ દારુણમ્ ॥ ૨૨॥

કદાચિદ્વિવિધાન્યજ્ઞાન્વિતનોતિ સુરાધિપઃ ।
કદાચિત્તુ રમારઙ્ગરઞ્જિતઃ પરમેશ્વરઃ ॥ ૨૩॥

રમતે કિલ વૈકુણ્ઠે તદ્વશસ્તરુણો વિભુઃ ।
કદાચિદ્દાનવૈઃ સાર્ધં યુદ્ધં પરમદારુણમ્ ॥ ૨૪॥

કરોતિ કરુણાસિન્ધુસ્તદ્બાણાપીડિતો ભૃશમ્ ।
કદાચિજ્જયમાપ્નોતિ દૈવાત્સોઽપિ પરાજયમ્ ॥ ૨૫॥

સુખદુઃખાભિભૂતોઽસૌ ભવત્યેવ ન સંશયઃ ।
શેષે શેતે કદાચિદ્વૈ યોગનિદ્રાસમાવૃતઃ ॥ ૨૬॥

કાલે જાગર્તિ વિશ્વાત્મા સ્વભાવપ્રતિબોધિતઃ ।
શર્વો બ્રહ્મા હરિશ્ચેતિ ઇન્દ્રાદ્યા યે સુરાસ્તથા ॥ ૨૭॥

મુનયશ્ચ વિનિર્માણૈઃ સ્વાયુષો વિચરન્તિ હિ ।
નિશાવસાને સઞ્જાતે જગત્સ્થાવરજઙ્ગમમ્ ॥ ૨૮॥

મ્રિયતે નાત્ર સન્દેહો નૃપ કિઞ્ચિત્કદાપિ ચ ।
સ્વાયુષોઽન્તે પદ્મજાદ્યાઃ ક્ષયમૃચ્છન્તિ પાર્થિવ ॥ ૨૯॥

પ્રભવન્તિ પુનર્વિષ્ણુહરશક્રાદયઃ સુરાઃ ।
તસ્માત્કામાદિકાન્ભાવાન્દેહવાન્પ્રતિપદ્યતે ॥ ૩૦॥

નાત્ર તે વિસ્મયઃ કાર્યઃ કદાચિદપિ પાર્થિવ ।
સંસારોઽયં તુ સન્દિગ્ધઃ કામક્રોધાદિભિર્નૃપ ॥ ૩૧॥

દુર્લભસ્તદ્વિનિર્મુક્તઃ પુરુષઃ પરમાર્થવિત્ ।
યો બિભેતીહ સંસારે સ દારાન્ન કરોત્યપિ ॥ ૩૨॥

વિમુક્તઃ સર્વસઙ્ગેભ્યો વિચરત્યવિશઙ્કિતઃ ।
તસ્માદ્બૃહસ્પતેર્ભાર્યા શશિના લમ્ભિતા પુનઃ ॥ ૩૩॥

ગુરૂણા લમ્ભિતા ભાર્યા તથા ભ્રાતુર્યવીયસઃ ।
એવં સંસારચક્રેઽસ્મિન્ રાગલોભાદિભિર્વૃતઃ ॥ ૩૪॥

ગાર્હસ્થ્યઞ્ચ સમાસ્થાય કથં મુક્તો ભવેન્નરઃ ।
તસ્માત્સર્વપ્રયત્નેન હિત્વા સંસારસારતામ્ ॥ ૩૫॥

આરાધયેન્મહેશાનીં સચ્ચિદાનન્દરૂપિણીમ્ ।
તન્માયાગુણતશ્છન્નં જગદેતચ્ચરાચરમ્ ॥ ૩૬॥

ભ્રમત્યુન્મત્તવત્સર્વં મદિરામત્તવન્નૃપ ।
તસ્યા આરાધનેનૈવ ગુણાન્સર્વાન્વિમૃદ્ય ચ ॥ ૩૭॥

મુક્તિં ભજેત મતિમાન્નાન્યઃ પન્થાસ્ત્વિતઃ પરઃ ।
આરાધિતા મહેશાની ન યાવત્કુરુતે કૃપામ્ ॥ ૩૮॥

તાવદ્ભવેત્સુખં કસ્માત્કોઽન્યોઽસ્તિ દયયા યુતઃ ।
કરુણાસાગરામેતાં ભજેત્તસ્માદમાયયા ॥ ૩૯॥

યસ્યાસ્તુ ભજનેનૈવ જીવન્મુક્તત્વમશ્નુતે ।
માનુષ્યં દુર્લભં પ્રાપ્ય સેવિતા ન મહેશ્વરી ॥ ૪૦॥

નિઃશ્રેણિકાગ્રાત્પતિતા અધ ઇત્યેવ વિદ્મહે ।

અહઙ્કારાવૃતં વિશ્વં ગુણત્રયસમન્વિતમ્ ॥ ૪૧॥

અસત્યેનાપિ સમ્બદ્ધં મુચ્યતે કથમન્યથા ।
હિત્વા સર્વં તતઃ સર્વૈઃ સંસેવ્યા ભુવનેશ્વરી ॥ ૪૨॥

રાજોવાચ ।
કિં કૃતં ગુરૂણા તત્ર કાવ્યરૂપધરેણ ચ ।
કદા શુક્રઃ સમાયાતસ્તન્મે બ્રૂહિ પિતામહ ॥ ૪૩॥

વ્યાસ ઉવાચ ।
શૃણુ રાજન્ પ્રવક્ષ્યામિ યત્કૃતં ગુરુણા તદા ।
કૃત્વા કાવ્યસ્વરૂપઞ્ચ પ્રચ્છન્નેન મહાત્મના ॥ ૪૪॥

ગુરુણા બોધિતા દૈત્યા મત્વા કાવ્યં સ્વકં ગુરુમ્ ।
વિશ્વાસં પરમં કૃત્વા બભૂવુસ્તન્મયાસ્તદા ॥ ૪૫॥

વિદ્યાર્થં શરણં પ્રાપ્તા ભૃગું મત્વાતિમોહિતાઃ ।
ગુરુણા વિપ્રલબ્ધાસ્તે લોભાત્કો વા ન મુહ્યતિ ॥ ૪૬॥

દશવર્ષાત્મકે કાલે સમ્પૂર્ણસમયે તદા ।
જયન્ત્યા સહ ક્રીડિત્વા કાવ્યો યાજ્યાનચિન્તયત્ ॥ ૪૭॥

આશયા મમ માર્ગં તે પશ્યન્તઃ સંસ્થિતાઃ કિલ ।
ગત્વા તાન્વૈ પ્રપશ્યેઽહં યાજ્યાનતિભયાતુરાન્ ॥ ૪૮॥

મા દેવેભ્યો ભયં તેષાં મદ્ભક્તાનાં ભવેદિતિ ।
સઞ્ચિન્ત્ય બુદ્ધિમાસ્થાય જયન્તીં પ્રત્યુવાચ હ ॥ ૪૯॥

દેવાનેવોપસંયાન્તિ પુત્રા મે ચારુલોચને ।
સમયસ્તેઽદ્ય સમ્પૂર્ણો જાતોઽયં દશવાર્ષિકઃ ॥ ૫૦॥

તસ્માદ્ ગચ્છામ્યહં દેવિ દ્રષ્ટું યાજ્યાન્સુમધ્યમે ।
પુનરેવાગમિષ્યામિ તવાન્તિકમનુદ્રુતઃ ॥ ૫૧॥

તથેતિ તમુવાચાથ જયન્તી ધર્મવિત્તમા ।
યથેષ્ટં ગચ્છ ધર્મજ્ઞ ન તે ધર્મં વિલોપયે ॥ ૫૨॥

તચ્છ્રુત્વા વચનં કાવ્યો જગામ ત્વરિતસ્તતઃ ।
અપશ્યદ્દાનવાનાં ચ પાર્શ્વે વાચસ્પતિં તદા ॥ ૫૩॥

છદ્મરૂપધરં સૌમ્યં બોધયન્તં છલેન તાન્ ।

જૈનં ધર્મં કૃતં સ્વેન યજ્ઞનિન્દાપરં તથા ॥ ૫૪॥

ભો દેવરિપવઃ સત્યં બ્રવીમિ ભવતાં હિતમ્ ।
અહિંસા પરમો ધર્મોઽહન્તવ્યા હ્યાતતાયિનઃ ॥ ૫૫॥

દ્વિજૈર્ભોગરતૈર્વેદે દર્શિતં હિંસનં પશોઃ ।
જિહ્વાસ્વાદપરૈઃ કામમહિંસૈવ પરા મતા ॥ ૫૬॥

એવંવિધાનિ વાક્યાનિ વેદશાસ્ત્રપરાણિ ચ ।
બ્રુવાણં ગુરુમાકર્ણ્ય વિસ્મિતોઽસૌ ભૃગોઃ સુતઃ ॥ ૫૭॥

ચિન્તયામાસ મનસા મમ દ્વેષ્યો ગુરુઃ કિલ ।
વઞ્ચિતાઃ કિલ ધૂર્તેન યાજ્યા મે નાત્ર સંશયઃ ॥ ૫૮॥

ધિગ્લોભં પાપબીજં વૈ નરકદ્વારમૂર્જિતમ્ ।
ગુરુરપ્યનૃતં બ્રૂતે પ્રેરિતો યેન પાપ્મના ॥ ૫૯॥

પ્રમાણં વચનં યસ્ય સોઽપિ પાખણ્ડધારકઃ ।
ગુરુઃ સુરાણાં સર્વેષાં ધર્મશાસ્ત્રપ્રવર્તકઃ ॥ ૬૦॥

કિં કિં ન લભતે લોભાન્મલિનીકૃતમાનસઃ ।
અન્યોઽપિ ગુરુરપ્યેવં જાતઃ પાખણ્ડપણ્ડિતઃ ॥ ૬૧॥

શૈલૂષચેષ્ટિતં સર્વં પરિગૃહ્ય દ્વિજોત્તમઃ ।
વઞ્ચયત્યતિસમ્મૂઢાન્દૈત્યાન્યાજ્યાન્મમાપ્યસૌ ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે શુક્રરૂપેણ ગુરુણા દૈત્યવઞ્ચનાવર્ણનં નામ ત્રયોદશોઽધ્યાયઃ ॥ ૪.૧૩॥

## ૪.૧૪ ચતુર્દશોઽધ્યાયઃ । પ્રહ્લાદેન શુક્રકોપસાન્ત્વનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ સઞ્ચિન્ત્ય મનસા તાનુવાચ હસન્નિવ ।
વઞ્ચિતા મત્સ્વરૂપેણ દૈત્યાઃ કિં ગુરુણા કિલ ॥ ૧॥

અહં કાવ્યો ગુરુશ્ચાયં દેવકાર્યપ્રસાધકઃ ।
અનેન વઞ્ચિતા યૂયં મદ્યાજ્યા નાત્ર સંશયઃ ॥ ૨॥

મા શ્રદ્ધ્વં વચોઽસ્યાર્યા દામ્ભિકોઽયં મદાકૃતિઃ ।
અનુગચ્છત માં યાજ્યાસ્ત્યજતૈનં બૃહસ્પતિમ્ ॥ ૩॥

ઇત્યાકર્ણ્ય વચસ્તસ્ય દૃષ્ટ્વા તૌ સદૃશૌ પુનઃ ।
વિસ્મયં પરમં જગ્મુઃ કાવ્યોઽયમિતિ નિશ્ચિતાઃ ॥ ૪॥

સ તાન્વીક્ષ્ય સુસમ્ભ્રાન્તાન્ગુરુર્વાક્યમુવાચ હ ।
ગુરુર્વો વઞ્ચયત્યેવ મદ્રૂપોઽયં બૃહસ્પતિઃ ॥ ૫॥

પ્રાપ્તો વઞ્ચયિતું યુષ્માન્દેવકાર્યાર્થસિદ્ધયે ।
મા વિશ્વાસં વચસ્તસ્ય કુરુધ્વં દૈત્યસત્તમાઃ ॥ ૬॥

પ્રાપ્તા વિદ્યા મયા શમ્ભોર્યુષ્માનધ્યાપયામિ તામ્ ।
દેવેભ્યો વિજયં નૂનં કરિષ્યામિ ન સંશયઃ ॥ ૭॥

ઇતિ શ્રુત્વા ગુરોર્વાક્યં કાવ્યરૂપધરસ્ય તે ।
વિશ્વાસં પરમં જગ્મુઃ કાવ્યોઽયમિતિ નિશ્ચયાત્ ॥ ૮॥

કાવ્યેન બહુધા તત્ર બોધિતાઃ કિલ દાનવાઃ ।
બુબુધુર્ન ગુરોર્માયામોહિતાઃ કાલપર્યયાત્ ॥ ૯॥

એવં તે નિશ્ચયં કૃત્વા તતો ભાર્ગવમબ્રુવન્ ।
અયં ગુરુર્નો ધર્માત્મા બુદ્ધિદશ્ચ હિતે રતઃ ॥ ૧૦॥

દશવર્ષાણિ સતતમયં નઃ શાસ્તિ ભાર્ગવઃ ।
ગચ્છ ત્વં કુહકો ભાસિ નાસ્માકં ગુરુરપ્યુત ॥ ૧૧॥

ઇત્યુક્ત્વા ભાર્ગવં મૂઢા નિર્ભર્ત્સ્ય ચ પુનઃ પુનઃ ।
જગૃહુસ્તં ગુરું પ્રીત્યા પ્રણિપત્યાભિવાદ્ય ચ ॥ ૧૨॥

કાવ્યસ્તુ તન્મયાન્દૃષ્ટ્વા ચુકોપાથ શશાપ ચ ।
દૈત્યાન્વિબોધિતાન્મત્વા ગુરુણા ચાતિવઞ્ચિતાન્ ॥ ૧૩॥

યસ્માન્મયા બોધિતા વૈ ગૃહ્ણીયુર્ન ચ મે વચઃ ।
તસ્માત્પ્રનષ્ટસંજ્ઞા વૈ પરાભવમવાપ્સ્યથ ॥ ૧૪॥

મદવજ્ઞાફલં કામં સ્વલ્પે કાલે હ્યવાપ્સ્યથ ।
તદાસ્ય કપટં સર્વં પરિજ્ઞાતં ભવિષ્યતિ ॥ ૧૫॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વાસૌ જગામાશુ ભાર્ગવઃ ક્રોધસંયુતઃ ।
બૃહસ્પતિર્મુદં પ્રાપ્ય તસ્થૌ તત્ર સમાહિતઃ ॥ ૧૬॥

તતઃ શપ્તાન્ગુરુર્જ્ઞાત્વા દૈત્યાંસ્તાન્ભાર્ગવેણ હિ ।
જગામ તરસા ત્યક્ત્વા સ્વરૂપં સ્વં વિધાય ચ ॥ ૧૭॥

ગત્વોવાચ તદા શક્રં કૃતં કાર્યં મયા ધ્રુવમ્ ।
શપ્તાઃ શુક્રેણ તે દૈત્યા મયા ત્યક્તાઃ પુનઃ કિલ ॥ ૧૮॥

નિરાધારાઃ કૃતા નૂનં યતધ્વં સુરસત્તમાઃ ।
સઙ્ગ્રામાર્થં મહાભાગ શાપદગ્ધા મયા કૃતાઃ ॥ ૧૯॥

ઇતિ શ્રુત્વા ગુરોર્વાક્યં મઘવા મુદમાપ્તવાન્ ।
જહૃષુશ્ચ સુરાઃ સર્વે પ્રતિપૂજ્ય બૃહસ્પતિમ્ ॥ ૨૦॥

સઙ્ગ્રામાય મતિં ચક્રુઃ સંવિચાર્ય મિથઃ પુનઃ ।
નિર્યયુર્મિલિતાઃ સર્વે દાનવાભિમુખાઃ સુરાઃ ॥ ૨૧॥

સુરાન્સમુદ્યતાંજ્ઞાત્વા કૃતોદ્યોગાન્મહાબલાન્ ।
અન્તર્હિતં ગુરું ચૈવ બભૂવુશ્ચિન્તયાન્વિતાઃ ॥ ૨૨॥

પરસ્પરમથોચુસ્તે મોહિતાસ્તસ્ય માયયા ।
સમ્પ્રસાદ્યો મહાત્મા ચ યાતોઽસૌ રુષ્ટમાનસઃ ॥ ૨૩॥

વઞ્ચયિત્વા ગતઃ પાપો ગુરુઃ કપટપણ્ડિતઃ ।
ભ્રાતૃસ્ત્રીલમ્ભનઃ પ્રાયો મલિનોઽન્તર્બહિઃ શુચિઃ ॥ ૨૪॥

કિં કુર્મઃ ક્વ ચ ગચ્છામઃ કથં કાવ્યં પ્રકોપિતમ્ ।
કુર્વીમહિ સહાયાર્થં પ્રસન્નં હૃષ્ટમાનસમ્ ॥ ૨૫॥

ઇતિ સઞ્ચિન્ત્ય તે સર્વે મિલિતા ભયકમ્પિતાઃ ।
પ્રહ્લાદં પુરતઃ કૃત્વા જગ્મુસ્તે ભાર્ગવં પુનઃ ॥ ૨૬॥

પ્રણેમુશ્ચરણૌ તસ્ય મુનેર્મૌનભૃતસ્તદા ।
ભાર્ગવસ્તાનુવાચાથ રોષસંરક્તલોચનઃ ॥ ૨૭॥

મયા પ્રબોધિતા યૂયં મોહિતા ગુરુમાયયા ।
ન ગૃહીતં વચો યોગ્યં તદા યાજ્યા હિતં શુચિ ॥ ૨૮॥

તદાવગણિતશ્ચાહં ભવદ્ભિસ્તદ્વશં ગતૈઃ ।
પ્રાપ્તં નૂનં મદોન્મત્તૈર્મમાવમાનજં ફલમ્ ॥ ૨૯॥

તત્ર ગચ્છત સત્ભ્રષ્ટા યત્રાસૌ કપટાકૃતિઃ ।
વઞ્ચકઃ સુરકાર્યાર્થી નાહં તદ્વદ્ધિ વઞ્ચકઃ ॥ ૩૦॥

વ્યાસ ઉવાચ ।
એવં બ્રુવન્તં શુક્રં તુ વાક્યસન્દિગ્ધયા ગિરા ।
પ્રહ્લાદસ્તં તદોવાચ ગહીત્વા ચરણૌ તતઃ ॥ ૩૧॥

પ્રહ્લાદ ઉવાચ ।
ભાર્ગવાદ્ય સમાયાતાન્યાજ્યાનસ્માંસ્તથાતુરાન્ ।
ત્યક્તું નાર્હસિ સર્વજ્ઞ ત્વદ્ધિતાસ્તનયાન્હિ નઃ ॥ ૩૨॥

ગતે ત્વયિ તુ મન્ત્રાર્થં શૈલૂષેણ દુરાત્મના ।
ત્વદ્વેષમધુરાલાપૈર્વયં તેન પ્રવઞ્ચિતાઃ ॥ ૩૩॥

અજ્ઞાનકૃતદોષેણ નૈવ કુપ્યતિ શાન્તિમાન્ ।
સર્વજ્ઞસ્ત્વં વિજાનાસિ ચિત્તં નઃ પ્રવણં ત્વયિ ॥ ૩૪॥

જ્ઞાત્વા નસ્તપસા ભાવં ત્યજ કોપં મહામતે ।
બ્રુવન્તિ મુનયઃ સર્વે ક્ષણકોપા હિ સાધવઃ ॥ ૩૫॥

જલં સ્વભાવતઃ શીતં વહ્ન્યાતપસમાગમાત્ ।
ભવત્યુષ્ણં વિયોગાચ્ચ શીતત્વમનુગચ્છતિ ॥ ૩૬॥

ક્રોધશ્ચાણ્ડાલરૂપો વૈ ત્યક્તવ્યઃ સર્વથા બુધૈઃ ।
તસ્માદ્રોષં પરિત્યજ્ય પ્રસાદં કુરુ સુવ્રત ॥ ૩૭॥

યદિ ન ત્યજસિ ક્રોધં ત્યજસ્યસ્માન્સુદુઃખિતાન્ ।
ત્વયા ત્યક્તા મહાભાગ ગમિષ્યામો રસાતલમ્ ॥ ૩૮॥

વ્યાસ ઉવાચ ।
પ્રહ્લાદસ્ય વચઃ શ્રુત્વા ભાર્ગવો જ્ઞાનચક્ષુષા ।
વિલોક્ય સુમના ભૂત્વા તાનુવાચ હસન્નિવ ॥ ૩૯॥

ન ભેતવ્યં ન ગન્તવ્યં દાનવા વા રસાતલમ્ ।
રક્ષયિષ્યામિ વો યાજ્યાન્મન્ત્રૈરવિતથૈઃ કિલ ॥ ૪૦॥

હિતં સત્યં બ્રવીમ્યદ્ય શ‍ૃણુધ્વં તત્તુ નિશ્ચયમ્ ।
વચનં મમ ધર્મજ્ઞાઃ શ્રુતં યદ્ બ્રહ્મણઃ પુરા ॥ ૪૧॥

અવશ્યમ્ભાવિનો ભાવાઃ પ્રભવન્તિ શુભાશુભાઃ ।
દૈવં ન ચાન્યથા કર્તું ક્ષમઃ કોઽપિ ધરાતલે ॥ ૪૨॥

અદ્ય મન્દબલા યૂયં કાલયોગાદસંશયમ્ ।
દેવૈર્જિતાઃ સકૃચ્ચાપિ પાતાલં પ્રતિપત્સ્યથ ॥ ૪૩॥

પ્રાપ્તઃ પર્યાયકાલો વ ઇતિ બ્રહ્માભ્યભાષત ।
ભુક્તં રાજ્યં ભવદ્ભિશ્ચ પૂર્ણં સર્વં સમૃદ્ધિમત્ ॥ ૪૪॥

યુગાનિ દશ પૂર્ણાનિ દેવાનાક્રમ્ય મૂર્ધનિ ।
દૈવયોગાચ્ચ યુષ્માભિર્ભુક્તં ત્રૈલોક્યમૂર્જિતમ્ ॥ ૪૫॥

સાવર્ણિકે મનૌ રાજ્યં પુનસ્તત્તુ ભવિષ્યતિ ।
પૌત્રસ્ત્રૈલોક્યવિજયી રાજ્યં પ્રાપ્સ્યતિ તે બલિઃ ॥ ૪૬॥

યદા વામનરૂપેણ હૃતં દેવેન વિષ્ણુના ।
તદૈવ ચ ભવત્પૌત્રઃ પ્રોક્તો દેવેન જિષ્ણુના ॥ ૪૭॥

હૃતં યેન બલે રાજ્યં દેવવાઞ્છાર્થસિદ્ધયે ।
ત્વમિન્દ્રો ભવિતા ચાગ્રે સ્થિતે સાવર્ણિકે મનૌ ॥ ૪૮॥

ભાર્ગવ ઉવાચ ।
ઇત્યુક્તો હરિણા પૌત્રસ્તવ પ્રહ્લાદ સામ્પ્રતમ્ ।
અદૃશ્યઃ સર્વભૂતાનાં ગુપ્તશ્ચરતિ ભીતવત્ ॥ ૪૯॥

એકદા વાસવેનાસૌ બલિર્ગર્દભરૂપભાક્ ।
શૂન્યે ગૃહે સ્થિતઃ કામં ભયભીતઃ શતક્રતોઃ ॥ ૫૦॥

પૃષ્ટશ્ચ બહુધા તેન વાસવેન બલિસ્તદા ।
કિમર્થં ગાર્દભં રૂપં કૃતવાન્દૈત્યપુઙ્ગવ ॥ ૫૧॥

ભોક્તા ત્વં સર્વલોકસ્ય દૈત્યાનાં ચ પ્રશાસિતા ।
(ન લજ્જા ખરરૂપેણ તવ રાક્ષસસત્તમ ।)॥

તસ્ય તદ્વચનં શ્રુત્વા દૈત્યરાજો બલિસ્તદા ॥ ૫૨॥

પ્રોવાચ વચનં શક્રં કોઽત્ર શોકઃ શતક્રતો ।
યથા વિષ્ણુર્મહાતેજા મત્સ્યકચ્છપતાં ગતઃ ॥ ૫૩॥

તથાહં ખરરૂપેણ સંસ્થિતઃ કાલયોગતઃ ।
યથા ત્વં કમલે લીનઃ સંસ્થિતો બ્રહ્મહત્યયા ॥ ૫૪॥

પીડિતશ્ચ તથા હ્યદ્ય સ્થિતોઽહં ખરરૂપધૃક્ ।
દૈવાધીનસ્ય કિં દુઃખં કિં સુખં પાકશાસન ॥ ૫૫॥

કાલઃ કરોતિ વૈ નૂનં યદિચ્છતિ યથા તથા ।
ભાર્ગવ ઉવાચ ।
ઇતિ તૌ બલિદેવેશૌ કૃત્વા સંવિદમુત્તમામ્ ॥ ૫૬॥

પ્રબોધં પ્રાપતુઃ કામં યથાસ્થાનઞ્ચ જગ્મતુઃ ।
ઇત્યેતત્તે સમાખ્યાતા મયા દૈવબલિષ્ઠતા ॥ ૫૭॥

દૈવાધીનં જગત્સર્વં સદેવાસુરમાનુષમ્ ॥ ૫૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પ્રહ્લાદેન શુક્રકોપસાન્ત્વનં નામ ચતુર્દશોઽધ્યાયઃ ॥ ૪.૧૪॥

## ૪.૧૫ પઞ્ચદશોઽધ્યાયઃ । દેવીકથનેન દાનવાનાં રસાતલં પ્રતિ ગમનમ્ ।

વ્યાસ ઉવાચ ।
ઇતિ તસ્ય વચઃ શ્રુત્વા ભાર્ગવસ્ય મહાત્મનઃ ।
પ્રહ્લાદસ્તુ સુસંહૃષ્ટો બભૂવ નૃપનન્દનઃ ॥ ૧॥

જ્ઞાત્વા દૈવં બલિષ્ઠઞ્ચ પ્રહ્લાદસ્તાનુવાચ હ ।
કૃતેઽપિ યુદ્ધે ન જયો ભવિષ્યતિ કદાચન ॥ ૨॥

તદા તે જયિનઃ પ્રોચુર્દાનવા મદગર્વિતાઃ ।
સઙ્ગ્રામસ્તુ પ્રકર્તવ્યો દૈવં કિં ન વિદામહે ॥ ૩॥

નિરુદ્યમાનાં દૈવં હિ પ્રધાનમસુરાધિપ ।
કેન દૃષ્ટં ક્વ વા દૃષ્ટં કીદૃશં કેન નિર્મિતમ્ ॥ ૪॥

તસ્માદ્યુદ્ધં કરિષ્યામો બલમાસ્થાય સામ્પ્રતમ્ ।
ભવાગ્રે દૈત્યવર્ય ત્વં સર્વજ્ઞોઽસિ મહામતે ॥ ૫॥

ઇત્યુક્તસ્તૈસ્તદા રાજન્ પ્રહ્લાદઃ પ્રબલારિહા ।
સેનાનીશ્ચ તદા ભૂત્વા દેવાન્યુદ્ધે સમાહ્વયત્ ॥ ૬॥

તેઽપિ તત્રાસુરાન્દૃષ્ટ્વા સઙ્ગ્રામે સમુપસ્થિતાન્ ।
સર્વે સમ્ભૃતસમ્ભારા દેવાસ્તાન્સમયોધયન્ ॥ ૭॥

સઙ્ગ્રામસ્તુ તદા ઘોરઃ શક્રપ્રહ્લાદયોરભૂત્ ।
પૂર્ણં વર્ષશતં તત્ર મુનીનાં વિસ્મયાવહઃ ॥ ૮॥

વર્તમાને મહાયુદ્ધે શુક્રેણ પ્રતિપાલિતાઃ ।
જયમાપુસ્તદા દૈત્યાઃ પ્રહ્લાદપ્રમુખા નૃપ ॥ ૯॥

તદૈવેન્દ્રો ગુરોર્વાક્યાત્સર્વદુઃખવિનાશિનીમ્ ।
સસ્માર મનસા દેવીં મુક્તિદાં પરમાં શિવામ્ ॥ ૧૦॥

ઇન્દ્ર ઉવાચ ।
જય દેવિ મહામાયે શૂલધારિણિ ચામ્બિકે ।
શઙ્ખચક્રગદાપદ્મખડ્ગહસ્તેઽભયપ્રદે ॥ ૧૧॥

નમસ્તે ભુવનેશાનિ શક્તિદર્શનનાયિકે ।
દશતત્ત્વાત્મિકે માતર્મહાબિન્દુસ્વરૂપિણિ ॥ ૧૨॥

મહાકુણ્ડલિનીરૂપે સચ્ચિદાનન્દરૂપિણિ ।
પ્રાણાગ્નિહોત્રવિદ્યે તે નમો દીપશિખાત્મિકે ॥ ૧૩॥

પઞ્ચકોશાન્તરગતે પુચ્છબ્રહ્મસ્વરૂપિણિ ।
આનન્દકલિકે માતઃ સર્વોપનિષદર્ચિતે ॥ ૧૪॥

માતઃ પ્રસીદ સુમુખી ભવ હીનસત્ત્વાં-
સ્ત્રાયસ્વ નો જનનિ દૈત્યપરાજિતાન્ વૈ ।
ત્વં દેવિ નઃ શરણદા ભુવને પ્રમાણા
શક્તાસિ દુઃખશમનેઽખિલવીર્યયુક્તે ॥ ૧૫॥

ધ્યાયન્તિ યેઽપિ સુખિનો નિતરાં ભવન્તિ
દુઃખાન્વિતાવિગતશોકભયાસ્તથાન્યે ।
મોક્ષાર્થિનો વિગતમાનવિમુક્તસઙ્ગાઃ
સંસારવારિધિજલં પ્રતરન્તિ સન્તઃ ॥ ૧૬॥

ત્વં દેવિ વિશ્વજનનિ પ્રથિતપ્રભાવા
સંરક્ષણાર્થમુદિતાર્તિહરપ્રતાપા ।
સંહર્તુમેતદખિલં કિલ કાલરૂપા
કો વેત્તિ તેઽમ્બ ચરિતં નનુ મન્દબુદ્ધિઃ ॥ ૧૭॥

બ્રહ્મા હરશ્ચ હરિદશ્વરથો હરિશ્ચ
ઇન્દ્રો યમોઽથ વરુણોઽગ્નિસમીરણૌ ચ ।
જ્ઞાતું ક્ષમા ન મુનયોઽપિ મહાનુભાવા
યસ્યાઃ પ્રભાવમતુલં નિગમાગમાશ્ચ ॥ ૧૮॥

ધન્યાસ્ત એવ તવ ભક્તિપરા મહાન્તઃ
સંસારદુઃખરહિતાઃ સુખસિન્ધુમગ્નાઃ ।
યે ભક્તિભાવરહિતા ન કદાપિ દુઃખા- ॥

મ્ભોધિં જનિક્ષયતરઙ્ગમુમે તરન્તિ ॥ ૧૯॥

યે વીજ્યમાનાઃ સિતચામરૈશ્ચ
ક્રીડન્તિ ધન્યાઃ શિબિકાધિરૂઢાઃ ।
તૈઃ પૂજિતા ત્વં કિલ પૂર્વદેહે
નાનોપહારૈરિતિ ચિન્તયામિ ॥ ૨૦॥

યે પૂજ્યમાના વરવારણસ્થા
વિલાસિનીવૃન્દવિલાસયુક્તાઃ ।
સામન્તકૈશ્ચોપનતૈર્વ્રજન્તિ
મન્યે હિ તૈસ્ત્વં કિલ પૂજિતાસિ ॥ ૨૧॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા મઘવતા દેવી વિશ્વેશ્વરી તદા ।
પ્રાદુર્બભૂવ તરસા સિંહારૂઢા ચતુર્ભુજા ॥ ૨૨॥

શઙ્ખચક્રગદાપદ્માન્બિભ્રતી ચારુલોચના ।
રક્તામ્બરધરા દેવી દિવ્યમાલ્યવિભૂષણા ॥ ૨૩॥

તાનુવાચ સુરાન્દેવી પ્રસન્નવદના ગિરા ।
ભયં ત્યજન્તુ ભો દેવાઃ શં વિધાસ્યે કિલાધુના ॥ ૨૪॥

ઇત્યુક્ત્વા સા તદા દેવી સિંહારૂઢાતિસુન્દરી ।
જગામ તરસા તત્ર યત્ર દૈત્યા મદાન્વિતાઃ ॥ ૨૫॥

પ્રહ્લાદપ્રમુખાઃ સર્વે દૃષ્ટ્વા દેવીં પુરઃસ્થિતામ્ ।
ઊચુઃ પરસ્પરં ભીતાઃ કિં કર્તવ્યમિતસ્તદા ॥ ૨૬॥

દેવં નારાયણં ચાત્ર સમ્પ્રાપ્તા ચણ્ડિકા કિલ ।
મહિષાન્તકરી નૂનં ચણ્ડમુણ્ડવિનાશિની ॥ ૨૭॥

નિહનિષ્યતિ નઃ સર્વાનમ્બિકા નાત્ર સંશયઃ ।
વક્રદૃષ્ટ્યા યયા પૂર્વં નિહતૌ મધુકૈટભૌ ॥ ૨૮॥

એવં ચિન્તાતુરાન્વીક્ષ્ય પ્રહ્લાદસ્તાનુવાચ હ ।

યોદ્ધવ્યં નાથ ગન્તવ્યં પલાય્ય દાનવોત્તમાઃ ॥ ૨૯॥

નમુચિસ્તાનુવાચાથ પલાયનપરાન્નિહ ।
હનિષ્યતિ જગન્માતા રુષિતા કિલ હેતિભિઃ ॥ ૩૦॥

તથા કુરુ મહાભાગ યથા દુઃખં ન જાયતે ।
વ્રજામોઽદ્યૈવ પાતાલં તાં સ્તુત્વા તદનુજ્ઞયા ॥ ૩૧॥

પ્રહ્લાદ ઉવાચ ।
સ્તૌમિ દેવીં મહામાયાં સૃષ્ટિસ્થિત્યન્તકારિણીમ્ ।
સર્વેષાં જનનીં શક્તિં ભક્તાનામભયઙ્કરીમ્ ॥ ૩૨॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા વિષ્ણુભક્તસ્તુ પ્રહ્લાદઃ પરમાર્થવિત્ ।
તુષ્ટાવ જગતાં ધાત્રીં કૃતાઞ્જલિપુટસ્તદા ॥ ૩૩॥

માલાસર્પવદાભાતિ યસ્યાં સર્વં ચરાચરમ્ ।
સર્વાધિષ્ઠાનરૂપાયૈ તસ્યૈ હ્રીંમૂર્તયે નમઃ ॥ ૩૪॥

ત્વત્તઃ સર્વમિદં વિશ્વં સ્થાવરં જઙ્ગમં તથા ।
અન્યે નિમિત્તમાત્રાસ્તે કર્તારસ્તવ નિર્મિતાઃ ॥ ૩૫॥

નમો દેવિ મહામાયે સર્વેષાં જનની સ્મૃતા ।
કો ભેદસ્તવ દેવેષુ દૈત્યેષુ સ્વકૃતેષુ ચ ॥ ૩૬॥

માતુઃ પુત્રેષુ કો ભેદોઽપ્યશુભેષુ શુભેષુ ચ ।
તથૈવ દેવેષ્વસ્માસુ ન કર્તવ્યસ્ત્વયાધુના ॥ ૩૭॥

યાદૃશાસ્તાદૃશા માતઃ સુતાસ્તે દાનવાઃ કિલ ।
યતસ્ત્વં વિશ્વજનની પુરાણેષુ પ્રકીર્તિતા ॥ ૩૮॥

તેઽપિ સ્વાર્થપરા નૂનં યથૈવ વયમપ્યુત ।
નાન્તરં દૈત્યસુરયોર્ભેદોઽયં મોહસમ્ભવઃ ॥ ૩૯॥

ધનદારાદિભોગેષુ વયં સક્તા દિવાનિશમ્ ।
તથૈવ દેવા દેવેશિ કો ભેદોઽસુરદેવયોઃ ॥ ૪૦॥

તેઽપિ કશ્યપદાયાદા વયં તત્સમ્ભવાઃ કિલ ।
કુતો વિરોધસમ્ભૂતિર્જાતા માતસ્તવાધુના ॥ ૪૧॥

ન તથા વિહિતં માતસ્ત્વયિ સર્વસમુદ્ભવે ।

સામ્યતૈવ ત્વયા સ્થાપ્યા દેવેષ્વસ્માસુ ચૈવ હિ ॥ ૪૨॥

ગુણવ્યતિકરાત્સર્વે સમુત્પન્નાઃ સુરાસુરાઃ ।
ગુણાન્વિતા ભવેયુસ્તે કથં દેહભૃતોઽમરાઃ ॥ ૪૩॥

કામઃ ક્રોધશ્ચ લોભશ્ચ સર્વદેહેષુ સંસ્થિતાઃ ।
વર્તન્તે સર્વદા તસ્માત્ કોઽવિરોધી ભવેજ્જનઃ ॥ ૪૪॥

ત્વયા મિથો વિરોધોઽયં કલ્પિતઃ કિલ કૌતુકાત્ ।
મન્યામહે વિભેદેન નૂનં યુદ્ધદિદૃક્ષયા ॥ ૪૫॥

અન્યથા ખલુ ભ્રાતૃણાં વિરોધઃ કીદૃશોઽનઘે ।
ત્વં ચેન્નેચ્છસિ ચામુણ્ડે વીક્ષિતું કલહં કિલ ॥ ૪૬॥

જાનામિ ધર્મં ધર્મજ્ઞે વેદ્મિ ચાહં શતક્રતુમ્ ।
તથાપિ કલહોઽસ્માકં ભોગાર્થં દેવિ સર્વદા ॥ ૪૭॥

એકઃ કોઽપિ ન શાસ્તાસ્તિ સંસારે ત્વાં વિનામ્બિકે ।
સ્પૃહાવતસ્તુ કઃ કર્તું ક્ષમતે વચનં બુધઃ ॥ ૪૮॥

દેવાસુરૈરયં સિન્ધુર્મથિતઃ સમયે ક્વચિત્ ।
વિષ્ણુના વિહિતો ભેદઃ સુધારત્નચ્છલેન વૈ ॥ ૪૯॥

ત્વયાસૌ કલ્પિતઃ શૌરિઃ પાલકત્વે જગદ્ગુરુઃ ।
તેન લક્ષ્મીઃ સ્વયં લોભાદ્ ગૃહીતામરસુન્દરી ॥ ૫૦॥

ઐરાવતસ્તથેન્દ્રેણ પારિજાતોઽથ કામધુક્ ।
ઉચ્ચૈઃશ્રવાઃ સુરૈઃ સર્વં ગૃહીતં વૈષ્ણવેચ્છયા ॥ ૫૧॥

અનયં તાદૃશં કૃત્વા જાતા દેવાસ્તુ સાધવઃ ।
(અન્યાયિનઃ સુરા નૂનં પશ્ય ત્વં ધર્મલક્ષણં ।)॥

સંસ્થાપિતાઃ સુરા નૂનં વિષ્ણુના બહુમાનિના ॥ ૫૨॥

નૂનં દૈત્યાઃ પરાભૂવન્પશ્ય ત્વં ધર્મલક્ષણમ્ ।
ક્વ ધર્મઃ કીદૃશો ધર્મઃ ક્વ કાર્યં ક્વ ચ સાધુતા ॥ ૫૩॥

કથયામિ ચ કસ્યાગ્રે સિદ્ધં મૈમાંસિકં મતમ્ ।
તાર્કિકા યુક્તિવાદજ્ઞા વિધિજ્ઞા વેદવાદકાઃ ॥ ૫૪॥

ઉક્તાઃ સકર્તૃકં વિશ્વં વિવદન્તે જડાત્મકાઃ ।

કર્તા ભવતિ ચેદસ્મિન્સંસારે વિતતે કિલ ॥ ૫૫॥

વિરોધઃ કીદૃશસ્તત્ર ચૈકકર્મણિ વૈ મિથઃ ।
વેદે નૈકમતિઃ કસ્માચ્છાસ્ત્રેષ્વપિ તથા પુનઃ ॥ ૫૬॥

નૈકવાક્યં વચસ્તેષામપિ વેદવિદાં પુનઃ ।
યતઃ સ્વાર્થપરં સર્વં જગત્સ્થાવરજઙ્ગમમ્ ॥ ૫૭॥

નિઃસ્પૃહઃ કોઽપિ સંસારે ન ભવેન્ન ભવિષ્યતિ ।
શશિનાથ ગુરોર્ભાર્યા હૃતા જ્ઞાત્વા બલાદપિ ॥ ૫૮॥

ગૌતમસ્ય તથેન્દ્રેણ જાનતા ધર્મનિશ્ચયમ્ ।
ગુરુણાનુજભાર્યા ચ ભુક્તા ગર્ભવતી બલાત્ ॥ ૫૯॥

શપ્તો ગર્ભગતો બાલઃ કૃતશ્ચાન્ધસ્તથા પુનઃ ।
વિષ્ણુના ચ શિરશ્છિન્નં રાહોશ્ચક્રેણ વૈ બલાત્ ॥ ૬૦॥

અપરાધં વિના કામં તદા સત્ત્વવતામ્બિકે ।
પૌત્રો ધર્મવતાં શૂરઃ સત્યવ્રતપરાયણઃ ॥ ૬૧॥

યજ્વા દાનપતિઃ શાન્તઃ સર્વજ્ઞઃ સર્વપૂજકઃ ।
કૃત્વાથ વામનં રૂપં હરિણા છલવેદિના ॥ ૬૨॥

વઞ્ચિતોઽસૌ બલિઃ સર્વં હૃતં રાજ્યં પુરા કિલ ।
તથાપિ દેવાન્ધર્મસ્થાન્પ્રવદન્તિ મનીષિણઃ ॥ ૬૩॥

વદન્તિ ચાટુવાદાંશ્ચ ધર્મવાદાજ્જયં ગતાઃ ।
એવં જ્ઞાત્વા જગન્માતર્યથેચ્છસિ તથા કુરુ ॥ ૬૪॥

શરણા દાનવાઃ સર્વે જહિ વા રક્ષ વા પુનઃ ।
શ્રીદેવ્યુવાચ ।
સર્વે ગચ્છત પાતાલં તત્ર વાસં યથેપ્સિતમ્ ॥ ૬૫॥

કુરુધ્વં દાનવાઃ સર્વે નિર્ભયા ગતમન્યવઃ ।
કાલઃ પ્રતીક્ષ્યો યુષ્માભિઃ કારણં સ શુભેઽશુભે ॥ ૬૬॥

સુનિર્વેદપરાણાં હિ સુખં સર્વત્ર સર્વદા ।
ત્રૈલોક્યસ્ય ચ રાજ્યેઽપિ ન સુખં લોભચેતસામ્ ॥ ૬૭॥

કૃતેઽપિ ન સુખં પૂર્ણં સસ્પૃહાણાં ફલૈરપિ ।
તસ્માત્ત્યક્ત્વા મહીમેતાં પ્રયાન્ત્વદ્ય મહીતલમ્ ॥ ૬૮॥

મમાજ્ઞાં પુરતઃ કૃત્વા સર્વે વિગતકલ્મષાઃ ।
વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં દેવ્યાસ્તથેત્યુક્ત્વા રસાતલમ્ ॥ ૬૯॥

પ્રણમ્ય દાનવાઃ સર્વે ગતાઃ શક્ત્યાભિરક્ષિતાઃ ।
અન્તર્દધે તતો દેવી દેવાઃ સ્વભુવનં ગતાઃ ॥ ૭૦॥

ત્યક્ત્વા વૈરં સ્થિતાઃ સર્વે તે તદા દેવદાનવાઃ ।
એતદાખ્યાનમખિલં યઃ શ‍ૃણોતિ વદત્યથ ॥ ૭૧॥

સર્વદુઃખવિનિર્મુક્તઃ પ્રયાતિ પદમુત્તમમ્ ॥ ૭૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ચતુર્થસ્કન્ધે
દેવીકથનેન દાનવાનાં રસાતલં પ્રતિ ગમનં નામ પઞ્ચદશોઽધ્યાયઃ ॥ ૪.૧૫॥

## ૪.૧૬ ષોડશોઽધ્યાયઃ । હરેર્નાનાવતારવર્ણનમ્ ।

જનમેજય ઉવાચ ।
ભૃગુશાપાન્મુનિશ્રેષ્ઠ હરેરદ્ભુતકર્મણઃ ।
અવતારાઃ કથં જાતાઃ કસ્મિન્મન્વન્તરે વિભો ॥ ૧॥

વિસ્તરાદ્વદ ધર્મજ્ઞ અવતારકથા હરેઃ ।
પાપનાશકરીં બ્રહ્મઞ્છ્રુતાં સર્વસુખાવહામ્ ॥ ૨॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્ પ્રવક્ષ્યામિ અવતારાન્ હરેર્યથા ।
યસ્મિન્મન્વન્તરે જાતા યુગે યસ્મિન્નરાધિપ ॥ ૩॥

યેન રૂપેણ યત્કાર્યં કૃતં નારાયણેન વૈ ।
તત્સર્વં નૃપ વક્ષ્યામિ સઙ્ક્ષેપેણ તવાધુના ॥ ૪॥

ધર્મસ્યૈવાવતારોઽભૂચ્ચાક્ષુષે મનુસમ્ભવે ।
નરનારાયણૌ ધર્મપુત્રૌ ખ્યાતૌ મહીતલે ॥ ૫॥

અથ વૈવસ્વતાખ્યેઽસ્મિન્દ્વિતીયે તુ યુગે પુનઃ ।
દત્તાત્રેયાવતારોઽત્રેઃ પુત્રત્વમગમદ્ધરિઃ ॥ ૬॥

બ્રહ્મા વિષ્ણુસ્તથા રુદ્રસ્ત્રયોઽમી દેવસત્તમાઃ ।

પુત્રત્વમગમન્દેવાસ્તસ્યાત્રેર્ભાર્યયા વૃતાઃ ॥ ૭॥

અનસૂયાત્રિપત્ની ચ સતીનામુત્તમા સતી ।
યયા સમ્પ્રાર્થિતા દેવાઃ પુત્રત્વમગમંસ્ત્રયઃ ॥ ૮॥

બ્રહ્માભૂત્સોમરૂપસ્તુ દત્તાત્રેયો હરિઃ સ્વયમ્ ।
દુર્વાસા રુદ્રરૂપોઽસૌ પુત્રત્વં તે પ્રપેદિરે ॥ ૯॥

નૃસિંહસ્યાવતારસ્તુ દેવકાર્યાર્થસિદ્ધયે ।
ચતુર્થે તુ યુગે જાતો દ્વિધારૂપો મનોહરઃ ॥ ૧૦॥

હિરણ્યકશિપોઃ સમ્યગ્વધાય ભગવાન્ હરિઃ ।
ચક્રે રૂપં નારસિંહં દેવાનાં વિસ્મયપ્રદમ્ ॥ ૧૧॥

બલેર્નિયમનાર્થાય શ્રેષ્ઠે ત્રેતાયુગે તથા ।
ચકાર રૂપં ભગવાન્ વામનં કશ્યપાન્મુનેઃ ॥ ૧૨॥

છલયિત્વા મખે ભૂપં રાજ્યં તસ્ય જહાર હ ।
પાતાલે સ્થાપયામાસ બલિં વામનરૂપધૃક્ ॥ ૧૩॥

યુગે ચૈકોનવિંશેઽથ ત્રેતાખ્યે ભગવાન્ હરિઃ ।
જમદગ્નિસુતો જાતો રામો નામ મહાબલઃ ॥ ૧૪॥

ક્ષત્રિયાન્તકરઃ શ્રીમાન્સત્યવાદી જિતેન્દ્રિયઃ ।
દત્તવાન્મેદિનીં કૃત્સ્નાં કશ્યપાય મહાત્મને ॥ ૧૫॥

યો વૈ પરશુરામાખ્યો હરેરદ્ભુતકર્મણઃ ।
અવતારસ્તુ રાજેન્દ્ર કથિતઃ પાપનાશનઃ ॥ ૧૬॥

ત્રેતાયુગે રઘોર્વંશે રામો દશરથાત્મજઃ ।
નરનારાયણાંશૌ દ્વૌ જાતૌ ભુવિ મહાબલૌ ॥ ૧૭॥

અષ્ટાવિંશે યુગે શસ્તૌ દ્વાપરેઽર્જુનશૌરિણૌ ।
ધરાભારાવતારાર્થં જાતૌ કૃષ્ણાર્જુનૌ ભુવિ ॥ ૧૮॥

કૃતવન્તૌ મહાયુદ્ધં કુરુક્ષેત્રેઽતિદારુણમ્ ।
એવં યુગે યુગે રાજન્નવતારા હરેઃ કિલ ॥ ૧૯॥

ભવન્તિ બહવઃ કામં પ્રકૃતેરનુરૂપતઃ ।
પ્રકૃતેરખિલં સર્વં વશમેતજ્જગત્ત્રયમ્ ॥ ૨૦॥

યથેચ્છતિ તથૈવેયં ભ્રામયત્યનિશં જગત્ ।
પુરુષસ્ય પ્રિયાર્થં સા રચયત્યખિલં જગત્ ॥ ૨૧॥

સૃષ્ટ્વા પુરા હિ ભગવાઞ્જગદેતચ્ચરાચરમ્ ।
સર્વાદિઃ સર્વગશ્ચાસૌ દુર્જ્ઞેયઃ પરમોઽવ્યયઃ ॥ ૨૨॥

નિરાલમ્બો નિરાકારો નિઃસ્પૃહશ્ચ પરાત્પરઃ ।
ઉપાધિતસ્ત્રિધા ભાતિ યસ્યાઃ સા પ્રકૃતિઃ પરા ॥ ૨૩॥

ઉત્પત્તિકાલયોગાત્સા ભિન્ના ભાતિ શિવા તદા ।
સા વિશ્વં કુરુતે કામં સા પાલયતિ કામદા ॥ ૨૪॥

કલ્પાન્તે સંહરત્યેવ ત્રિરૂપા વિશ્વમોહિની ।
તયા યુક્તોઽસૃજ દ્બ્રહ્મા વિષ્ણુઃ પાતિ તયાન્વિતઃ ॥ ૨૫॥

રુદ્રઃ સંહરતે કામં તયા સમ્મિલિતઃ શિવઃ ।
સા ચૈવોત્પાદ્ય કાકુત્સ્થં પુરા વૈ નૃપસત્તમમ્ ॥ ૨૬॥

કુત્રચિત્સ્થાપયામાસ દાનવાનાં જયાય ચ ।
એવમસ્મિંશ્ચ સંસારે સુખદુઃખાન્વિતાઃ કિલ ॥ ૨૭॥

ભવન્તિ પ્રાણિનઃ સર્વે વિધિતન્ત્રનિયન્ત્રિતાઃ ॥ ૨૮॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે હરેર્નાનાવતારવર્ણનં નામ ષોડશોઽધ્યાયઃ ॥ ૪.૧૬॥

## ૪.૧૭ સપ્તદશોઽધ્યાયઃ । નારાયણવરદાનમ્ ।

જનમેજય ઉવાચ ।
વારાઙ્ગનાસ્ત્વયાખ્યાતા નરનારાયણાશ્રમે ।
એકં નારાયણં શાન્તં કામયાના સ્મરાતુરાઃ ॥ ૧॥

શપ્તુકામસ્તદા જાતો મુનિર્નારાયણશ્ચ તાઃ ।
નિવારિતો નરેણાથ ભ્રાત્રા ધર્મવિદા નૃપ ॥ ૨॥

કિં કૃતં મુનિના તેન વ્યસને સમુપસ્થિતે ।
તાભિઃ સઙ્કલ્પિતેનાથ કામાર્થાભિર્ભૃશં મુને ॥ ૩॥

શક્રેણોત્પાદિતાભિશ્ચ બહુપ્રાર્થનયા પુનઃ ।
યાચિતેન વિવાહાર્થં કિં કૃતં તેન જિષ્ણુના ॥ ૪॥

ઇત્યેતચ્છ્રોતુમિચ્છામિ ચરિતં તસ્ય મોક્ષદમ્ ।
નારાયણસ્ય મે બ્રૂહિ વિસ્તરેણ પિતામહ ॥ ૫॥

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્પ્રવક્ષ્યામિ યથા તસ્ય મહાત્મનઃ ।
ધર્મપુત્રસ્ય ધર્મજ્ઞ વિસ્તરેણ વદામિ તે ॥ ૬॥

શપ્તુકામસ્તુ સન્દૃષ્ટો નરેણાથ યદા હરિઃ ।
વારિતોઽસૌ સમાશ્વાસ્ય મુનિર્નારાયણસ્તદા ॥ ૭॥

શાન્તકોપસ્તદોવાચ તાસ્તપસ્વી મહામુનિઃ ।
સ્મિતપૂર્વમિદં વાક્યં મધુરં ધર્મનન્દનઃ ॥ ૮॥

અસ્મિઞ્જન્મનિ ચાર્વઙ્ગ્યઃ કૃતસઙ્કલ્પવાનહમ્ ।
આવાભ્યાઞ્ચ ન કર્તવ્યઃ સર્વથા દારસઙ્ગ્રહઃ ॥ ૯॥

તસ્માદ્ ગચ્છન્તુ ત્રિદિવં કૃપાં કૃત્વા મમોપરિ ।
ધર્મજ્ઞા ન પ્રકુર્વન્તિ વ્રતભઙ્ગં પરસ્ય વૈ ॥ ૧૦॥

શ‍ૃઙ્ગારેઽસ્મિન્ રસે નૂનં સ્થાયીભાવો રતિઃ સ્મૃતઃ ।
કથં કરોમિ સમ્બન્ધં તદભાવે સુલોચનાઃ ॥ ૧૧॥

કારણેન વિના કાર્યં ન ભવેદિતિ નિશ્ચયઃ ।
કવિભિઃ કથિતં શાસ્ત્રે સ્થાયીભાવો રસઃ કિલ ॥ ૧૨॥

ધન્યઃ સુચારુસર્વાઙ્ગઃ સભાગ્યોઽહં ધરાતલે ।
પ્રીતિપાત્રં યતો જાતો ભવતીનામકૃત્રિમમ્ ॥ ૧૩॥

ભવતીભિઃ કૃપાં કૃત્વા રક્ષણીયં વ્રતં મમ ।
ભવિષ્યામિ મહાભાગાઃ પતિરપ્યન્યજન્મનિ ॥ ૧૪॥

અષ્ટાવિંશે વિશાલાક્ષ્યો દ્વાપરેઽસ્મિન્ધરાતલે ।
દેવાનાં કાર્યસિદ્ધ્યર્થં પ્રભવિષ્યામિ સર્વથા ॥ ૧૫॥

તદા ભવત્યો મદ્દારાઃ પ્રાપ્ય જન્મ પૃથક્પૃથક્ ।
ભૂપતીનાં સુતા ભૂત્વા પત્નીભાવં ગમિષ્યથ ॥ ૧૬॥

ઇત્યાશ્વાસ્ય હરિસ્તાસ્તુ પ્રતિશ્રુત્ય પરિગ્રહમ્ ।
વ્યસર્જયત્સ ભગવાઞ્જગ્મુશ્ચ વિગતજ્વરાઃ ॥ ૧૭॥

એવં વિસર્જિતાસ્તેન ગતાઃ સ્વર્ગં તદાઙ્ગનાઃ ।
શક્રાય કથયામાસુઃ કારણં સકલં પુનઃ ॥ ૧૮॥

આશ્રુત્ય મઘવાંસ્તાભ્યો વૃત્તાન્તં તસ્ય વિસ્તરાત્ ।
તુષ્ટાવ તં મહાત્માનં નારીર્દૃષ્ટ્વા તથોર્વશીઃ ॥ ૧૯॥

ઇન્દ્ર ઉવાચ ।
અહો ધૈર્યં મુનેઃ કામં તથૈવ ચ તપોબલમ્ ।
યેનોર્વશ્યઃ સ્વતપસા તાદૃગ્રૂપાઃ પ્રકલ્પિતાઃ ॥ ૨૦॥

ઇતિ સ્તુત્વા પ્રસન્નાત્મા બભૂવ સુરરાટ્ તતઃ ।
નારાયણોઽપિ ધર્માત્મા તપસ્યભિરતોઽભવત્ ॥ ૨૧॥

ઇત્યેતત્સર્વમાખ્યાતં મુનેર્વૃત્તાન્તમદ્ભુતમ્ ।
નારાયણસ્ય સકલં નરસ્ય ચ મહામુનેઃ ॥ ૨૨॥

તૌ હિ કૃષ્ણાર્જુનૌ વીરૌ ભૂભારહરણાય ચ ।
જાતૌ તૌ ભરતશ્રેષ્ઠ ભૃગોઃ શાપવશાદિહ ॥ ૨૩॥

રાજોવાચ ।
કૃષ્ણાવતારચરિતં વિસ્તરેણ વદસ્વ મે ।
સન્દેહો મમ ચિત્તેઽસ્તિ તં નિવારય માનદ ॥ ૨૪॥

યયોઃ પુત્રત્વમાપન્નૌ હર્યનન્તૌ મહાબલૌ ।
દેવકીવસુદેવૌ તૌ દુઃખભાજૌ કથં મુને ॥ ૨૫॥

કંસેન નિગડે બદ્ધૌ પીડિતૌ બહુવત્સરાન્ ।
યયોઃ પુત્રો હરિઃ સાક્ષાત્તપસા તોષિતોઽભવત્ ॥ ૨૬॥

જાતોઽસૌ મથુરાયાં તુ ગોકુલે સ કથં ગતઃ ।
કંસં હત્વા દ્વારવત્યાં નિવાસં કૃતવાન્કથમ્ ॥ ૨૭॥

પિત્રાદિસેવિતં દેશં સમૃદ્ધં પાવનં કિલ ।
ત્યક્ત્વા દેશાન્તરેઽનાર્યે ગતવાન્સ કથં હરિઃ ॥ ૨૮॥

કુલઞ્ચ દ્વિજશાપેન કથમુત્સાદિતં હરેઃ ।
ભારાવતારણં કૃત્વા વાસુદેવઃ સનાતનઃ ॥ ૨૯॥

દેહં મુમોચ તરસા જગામ ચ દિવં હરિઃ ।
પાપિષ્ઠાનાઞ્ચ ભારેણ વ્યાકુલાભૂચ્ચ મેદિની ॥ ૩૦॥

તે હતા વાસુદેવેન પાર્થેનામિતકર્મણા ।
લુણ્ઠિતા યૈર્હરેઃ પત્ન્યસ્તે કથં ન નિપાતિતાઃ ॥ ૩૧॥

ભીષ્મો દ્રોણસ્તથા કર્ણો બાહ્લિકોઽપ્યથ પાર્થિવઃ ।
વૈરાટોઽથ વિકર્ણશ્ચ ધૃષ્ટદ્યુમ્નશ્ચ પાર્થિવઃ ॥ ૩૨॥

સોમદત્તાદયઃ સર્વે નિહતાઃ સમરે નૃપાઃ ।
તેષામુત્તારિતો ભારશ્ચૌરાણાં ન હૃતઃ કથમ્ ॥ ૩૩॥

કૃષ્ણપત્ન્યઃ કથં દુઃખં પ્રાપ્તાઃ પ્રાન્તે પતિવ્રતાઃ ।
સન્દેહોઽયં મુનિશ્રેષ્ઠ ચિત્તે મે પરિવર્તતે ॥ ૩૪॥

વસુદેવસ્તુ ધર્માત્મા પુત્રદુઃખેન તાપિતઃ ।
ત્યક્તવાન્સ કથં પ્રાણાનપમૃત્યું જગામ હ ॥ ૩૫॥

પાણ્ડવા ધર્મસંયુક્તાઃ કૃષ્ણે ચ નિરતાઃ સદા ।
તે કથં દુઃખભોક્તારો હ્યભવન્મુનિસત્તમ ॥ ૩૬॥

દ્રૌપદી ચ મહાભાગા કથં દુઃખસ્ય ભાગિની ।
વેદીમધ્યાચ્ચ સઞ્જાતા લક્ષ્મ્યંશસમ્ભવા કિલ ॥ ૩૭॥

સભાયાં સા સમાનીતા રજોદોષસમન્વિતા ।
બાલા દુઃશાસનેનાથ કેશગ્રહણકર્શિતા ॥ ૩૮॥

પીડિતા સિન્ધુરાજ્ઞાથ વનમધ્યગતા સતી ।
તથૈવ કીચકેનાપિ પીડિતા રુદતી ભૃશમ્ ॥ ૩૯॥

પુત્રાઃ પઞ્ચૈવ તસ્યાસ્તુ નિહતા દ્રૌણિના ગૃહે ।
સુભદ્રાયાઃ સુતો યુદ્ધે બાલ એવ નિપાતિતઃ ॥ ૪૦॥

તથા ચ દેવકીપુત્રા ષટ્ કંસેન નિષૂદિતાઃ ।
સમર્થેનાપિ હરિણા દૈવં ન કૃતમન્યથા । ૪૧॥

યાદવાનાં તથા શાપઃ પ્રભાસે નિધનં પુનઃ ।
કુલક્ષયસ્તથા તીવ્રસ્તત્પત્નીનાઞ્ચ લુણ્ઠનમ્ ॥ ૪૨॥

વિષ્ણુના ચેશ્વરેણાપિ સાક્ષાન્નારાયણેન ચ ।
ઉગ્રસેનસ્ય સેવા વૈ દાસવત્સતતં કૃતા ॥ ૪૩॥

સન્દેહોઽયં મહાભાગ તત્ર નારાયણે મુનૌ ।
સર્વજન્તુસમાનત્વં વ્યવહારે નિરન્તરમ્ ॥ ૪૪॥

હર્ષશોકાદયો ભાવાઃ સર્વેષાં સદૃશાઃ કથમ્ ।
ઈશ્વરસ્ય હરેર્જાતા કથમપ્યન્યથા ગતિઃ ॥ ૪૫॥

તસ્માદ્વિસ્તરતો બ્રૂહિ કૃષ્ણસ્ય ચરિતં મહત્ ।
અલૌકિકેન હરિણા કૃતં કર્મ મહીતલે ॥ ૪૬॥

હતા આયુઃક્ષયે દૈત્યાઃ ક્લેશેન મહતા પુનઃ ।
ક્વૈશ્વર્યશક્તિઃ પ્રથિતા હરિણા મુનિસત્તમ ॥ ૪૭॥

રુક્મિણીહરણે નૂનં ગૃહીત્વાથ પલાયનમ્ ।
કૃતં હિ વાસુદેવેન ચૌરવચ્ચરિતં તદા ॥ ૪૮॥

મથુરામણ્ડલં ત્યક્ત્વા સમૃદ્ધં કુલસમ્મતમ્ ।
જરાસન્ધભયાત્તેન દ્વારકાગમનં કૃતમ્ ॥ ૪૯॥

તદા કેનાપિ ન જ્ઞાતો ભગવાન્હરિરીશ્વરઃ ।
કિઞ્ચિત્પ્રબ્રૂહિ મે બ્રહ્મન્ કારણં વ્રજગોપનમ્ ॥ ૫૦॥

એતે ચાન્યે ચ બહવઃ સન્દેહા વાસવીસુત ।
નાશયાદ્ય મહાભાગ સર્વજ્ઞોઽસિ દ્વિજોત્તમ ॥ ૫૧॥

ગોપ્યસ્તથૈકઃ સન્દેહો હૃદયાન્ન નિવર્તતે ।
પાઞ્ચાલ્યાઃ પઞ્ચભર્તૃત્વં લોકે કિં ન જુગુપ્સિતમ્ ॥ ૫૨॥

સદાચારં પ્રમાણં હિ પ્રવદન્તિ મનીષિણઃ ।
પશુધર્મઃ કથં તૈસ્તુ સમર્થૈરપિ સંશ્રિતઃ ॥ ૫૩॥

ભીષ્મેણાપિ કૃતં કિં વા દેવરૂપેણ ભૂતલે ।
ગોલકૌ તૌ સમુત્પાદ્ય યત્તુ વંશસ્ય રક્ષણમ્ ॥ ૫૪॥

ધિગ્ધર્મનિર્ણયઃ કામં મુનિભિઃ પરિદર્શિતઃ ।
યેન કેનાપ્યુપાયેન પુત્રોત્પાદનલક્ષણઃ ॥ ૫૫॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં ચતુર્થસ્કન્ધે
સુરાઙ્ગનાનાં પ્રતિ નારાયણવરદાનં નામ સપ્તદશોઽધ્યાયઃ ॥ ૪.૧૭॥

# ૪.૧૮ અષ્ટાદશોઽધ્યાયઃ । બ્રહ્માણં પ્રતિ વિષ્ણુવાક્યમ્ ।

વ્યાસ ઉવાચ ।
શ‍ૃણુ રાજન્પ્રવક્ષ્યામિ કૃષ્ણસ્ય ચરિતં મહત્ ।
અવતારકારણં ચૈવ દેવ્યાશ્ચરિતમદ્ભુતમ્ ॥ ૧॥

ધરૈકદા ભરાક્રાન્તા રુદતી ચાતિકર્શિતા ।
ગોરૂપધારિણી દીના ભીતાગચ્છત્ત્રિવિષ્ટપમ્ ॥ ૨॥

પૃષ્ટા શક્રેણ કિં તેઽદ્ય વર્તતે ભયમિત્યથ ।
કેન વૈ પીડિતાસિ ત્વં કિં તે દુઃખં વસુન્ધરે ॥ ૩॥

તચ્છ્રુત્વેલા તદોવાચ શ‍ૃણુ દેવેશ મેઽખિલમ્ ।
દુઃખં પૃચ્છસિ યત્ત્વં મે ભારાક્રાન્તોઽસ્મિ માનદ ॥ ૪॥

જરાસન્ધો મહાપાપી માગધેષુ પતિર્મમ ।
શિશુપાલસ્તથા ચૈદ્યઃ કાશિરાજઃ પ્રતાપવાન્ ॥ ૫॥

રુક્મી ચ બલવાન્કંસો નરકશ્ચ મહાબલઃ ।
શાલ્વઃ સૌભપતિઃ ક્રૂરઃ કેશી ધેનુકવત્સકૌ ॥ ૬॥

સર્વે ધર્મવિહીનાશ્ચ પરસ્પરવિરોધિનઃ ।
પાપાચારા મદોન્મત્તાઃ કાલરૂપાશ્ચ પાર્થિવાઃ ॥ ૭॥

તૈરહં પીડિતા શક્ર ભારાક્રાન્તાક્ષમા વિભો ।
કિં કરોમિ ક્વ ગચ્છામિ ચિન્તા મે મહતી સ્થિતા ॥ ૮॥

પીડિતાહં વરાહેણ વિષ્ણુના પ્રભવિષ્ણુના ।
શક્ર જાનીહિ હરિણા દુઃખાદ્દુઃખતરં ગતા ॥ ૯॥

યતોઽહં દુષ્ટદૈત્યેન કશ્યપસ્યાત્મજેન વૈ ।
હૃતાહં હિરણ્યાક્ષેણ મગ્ના તસ્મિન્મહાર્ણવે ॥ ૧૦॥

તદા સૂકરરૂપેણ વિષ્ણુના નિહતોઽપ્યસૌ ।
ઉદ્ધૃતાહં વરાહેણ સ્થાપિતા હિ સ્થિરા કૃતા ॥ ૧૧॥

નોચેદ્રસાતલે સ્વસ્થા સ્થિતા સ્યાં સુખશાયિની ।
ન શક્તાસ્મ્યદ્ય દેવેશ ભારં વોઢું દુરાત્મનામ્ ॥ ૧૨॥

અગ્રે દુષ્ટઃ સમાયાતિ હ્યષ્ટાવિંશસ્તથા કલિઃ ।
તદાહં પીડિતા શક્ર ગન્તાસ્મ્યાશુ રસાતલમ્ ॥ ૧૩॥

તસ્માત્ત્વં દેવદેવેશ દુઃખરૂપાર્ણવસ્ય ચ ।
પારદો ભવ ભારં મે હર પાદૌ નમામિ તે ॥ ૧૪॥

ઇન્દ્ર ઉવાચ ।
ઇલે કિં તે કરોમ્યદ્ય બ્રહ્માણં શરણં વ્રજ ।
અહં તત્રાગમિષ્યામિ સ તે દુઃખં હરિષ્યતિ ॥ ૧૫॥

તચ્છ્રુત્વા ત્વરિતા પૃથ્વી બ્રહ્મલોકં ગતા તદા ।
શક્રોઽપિ પૃષ્ઠતઃ પ્રાપ્તઃ સર્વદેવપુરઃસરઃ ॥ ૧૬॥

સુરભીમાગતાં તત્ર દૃષ્ટ્વોવાચ પ્રજાપતિઃ ।
મહીં જ્ઞાત્વા મહારાજ ધ્યાનેન સમુપસ્થિતામ્ ॥ ૧૭॥

કસ્માદ્રુદસિ કલ્યાણિ કિં તે દુઃખં વદાધુના ।
પીડિતાસિ ચ કેન ત્વં પાપાચારેણ ભૂર્વદ ॥ ૧૮॥

ધરોવાચ ।
કલિરાયાતિ દુષ્ટોઽયં બિભેમિ તદ્ભયાદહમ્ ।
પાપાચારાઃ પ્રજાસ્તત્ર ભવિષ્યન્તિ જગત્પતે ॥ ૧૯॥

રાજાનશ્ચ દુરાચારાઃ પરસ્પરવિરોધિનઃ ।
ચૌરકર્મરતાઃ સર્વે રાક્ષસાઃ પૂર્ણવૈરિણઃ ॥ ૨૦॥

તાન્હત્વા નૃપતીન્ભારં હર મેઽદ્ય પિતામહ ।
પીડિતાસ્મિ મહારાજ સૈન્યભારેણ ભૂભૃતામ્ ॥ ૨૧॥

બ્રહ્મોવાચ ।
નાહં શક્તસ્તથા દેવિ ભારાવતરણે તવ ।
ગચ્છાવઃ સદનં વિષ્ણોર્દેવદેવસ્ય ચક્રિણઃ ॥ ૨૨॥

સ તે ભારાપનોદં વૈ કરિષ્યતિ જનાર્દનઃ ।
પૂર્વં મયાપિ તે કાર્યં ચિન્તિતં સુવિચાર્ય ચ ॥ ૨૩॥

તત્ર ગચ્છ સુરશ્રેષ્ઠ યત્ર દેવો જનાર્દનઃ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા વેદકર્તાસૌ પુરસ્કૃત્ય સુરાંશ્ચ ગામ્ ॥ ૨૪॥

જગામ વિષ્ણુસદનં હંસારૂઢશ્ચતુર્મુખઃ ।

તુષ્ટાવ વેદવાક્યૈશ્ચ ભક્તિપ્રવણમાનસઃ ॥ ૨૫॥

બ્રહ્મોવાચ ।
સહસ્રશીર્ષાસ્ત્વમસિ સહસ્રાક્ષઃ સહસ્રપાત્ ।
ત્વં વેદપુરુષઃ પૂર્વં દેવદેવઃ સનાતનઃ ॥ ૨૬॥

ભૂતપૂર્વં ભવિષ્યચ્ચ વર્તમાનં ચ યદ્વિભો ।
અમરત્વં ત્વયા દત્તમસ્માકં ચ રમાપતે ॥ ૨૭॥

એતાવાન્મહિમા તેઽસ્તિ કો ન વેત્તિ જગત્ત્રયે ।
ત્વં કર્તાપ્યવિતા હન્તા ત્વં સર્વગતિરીશ્વરઃ ॥ ૨૮॥

વ્યાસ ઉવાચ ।
ઇતીડિતઃ પ્રભુર્વિષ્ણુઃ પ્રસન્નો ગરુડધ્વજઃ ।
દર્શનઞ્ચ દદૌ તેભ્યો બ્રહ્માદિભ્યોઽમલાશયઃ ॥ ૨૯॥

પપ્રચ્છ સ્વાગતં દેવાન્પ્રસન્નવદનો હરિઃ ।
તતસ્ત્વાગમને તેષાં કારણઞ્ચ સવિસ્તરમ્ ॥ ૩૦॥

તમુવાચાબ્જજો નત્વા ધરાદુઃખઞ્ચ સંસ્મરન્ ।
ભારાવતરણં વિષ્ણો કર્તવ્યં તે જનાર્દન ॥ ૩૧॥

ભુવિ ધૃત્વાવતારં ત્વં દ્વાપરાન્તે સમાગતે ।
હત્વા દુષ્ટાન્નૃપાનુર્વ્યા હર ભારં દયાનિધે ॥ ૩૨॥

વિષ્ણુરુવાચ ।
નાહં સ્વતન્ત્ર એવાત્ર ન બ્રહ્મા ન શિવસ્તથા ।
નેન્દ્રોઽગ્નિર્ન યમસ્ત્વષ્ટા ન સૂર્યો વરુણસ્તથા ॥ ૩૩॥

યોગમાયાવશે સર્વમિદં સ્થાવરજઙ્ગમમ્ ।
બ્રહ્માદિસ્તમ્બપર્યન્તં ગ્રથિતં ગુણસૂત્રતઃ ॥ ૩૪॥

યથા સા સ્વેચ્છયા પૂર્વં કર્તુમિચ્છતિ સુવ્રત ।
તથા કરોતિ સુહિતા વયં સર્વેઽપિ તદ્વશાઃ ॥ ૩૫॥

યદ્યહં સ્યાં સ્વતન્ત્રો વૈ ચિન્તયન્તુ ધિયા કિલ ।
કુતોઽભવં મત્સ્યવપુઃ કચ્છપો વા મહાર્ણવે ॥ ૩૬॥

તિર્યગ્યોનિષુ કો ભોગઃ કા કીર્તિઃ કિં સુખં પુનઃ ।
કિં પુણ્યં કિં ફલં તત્ર ક્ષુદ્રયોનિગતસ્ય મે ॥ ૩૭॥

કોલો વાથ નૃસિંહો વા વામનો વાભવં કુતઃ ।
જમદગ્નિસુતઃ કસ્માત્સમ્ભવેયં પિતામહ ॥ ૩૮॥

નૃશંસં વા કથં કર્મ કૃતવાનસ્મિ ભૂતલે ।
ક્ષતજૈસ્તુ હ્રદાન્સર્વાન્પૂરયેયં કથં પુનઃ ॥ ૩૯॥

તત્કથં જમદગ્નેશ્ચ પુત્રો ભૂત્વા દ્વિજોત્તમઃ ।
ક્ષત્રિયાન્હતવાનાજૌ નિર્દયો ગર્ભગાનપિ ॥ ૪૦॥

રામો ભૂત્વાથ દેવેન્દ્ર પ્રાવિશદ્દણ્ડકં વનમ્ ।
પદાતિશ્ચીરવાસાશ્ચ જટાવલ્કલવાન્પુનઃ ॥ ૪૧॥

અસહાયો હ્યપાથેયો ભીષણે નિર્જને વને ।
કુર્વન્નાખેટકં તત્ર વ્યચરં વિગતત્રપઃ ॥ ૪૨॥

ન જ્ઞાતવાન્મૃગં હૈમં માયયા પિહિતસ્તદા ।
ઉટજે જાનકીં ત્યક્ત્વા નિર્ગતસ્તત્પદાનુગઃ ॥ ૪૩॥

લક્ષ્મણોઽપિ ચ તાં ત્યક્ત્વા નિર્ગતો મત્પદાનુગઃ ।
વારિતોઽપિ મયાત્યર્થં મોહિતઃ પ્રાકૃતૈર્ગુણૈઃ ॥ ૪૪॥

ભિક્ષુરૂપં તતઃ કૃત્વા રાવણઃ કપટાકૃતિઃ ।
જહાર તરસા રક્ષો જાનકીં શોકકર્શિતામ્ ॥ ૪૫॥

દુઃખાર્તેન મયા તત્ર રુદિતઞ્ચ વને વને ।
સુગ્રીવેણ ચ મિત્રત્વં કૃતં કાર્યવશાન્મયા ॥ ૪૬॥

અન્યાયેન હતો વાલી શાપાઞ્ચૈવ નિવારિતઃ ।
સહાયાન્વાનરાન્ કૃત્વા લઙ્કાયાં ચલિતઃ પુનઃ ॥ ૪૭॥

બદ્ધોઽહં નાગપાશૈશ્ચ લક્ષ્મણશ્ચ મમાનુજઃ ।
વિસંજ્ઞૌ પતિતૌ દૃષ્ટ્વા વાનરા વિસ્મયં ગતાઃ ॥ ૪૮॥

ગરુડેન તદાઽઽગત્ય મોચિતૌ ભ્રાતરૌ કિલ ।
ચિન્તા મે મહતી જાતા દૈવં કિં વા કરિષ્યતિ ॥ ૪૯॥

હૃતં રાજ્યં વને વાસો મૃતસ્તાતઃ પ્રિયા હૃતા ।
યુદ્ધં કષ્ટં દદાત્યેવમગ્રે કિં વા કરિષ્યતિ ॥ ૫૦॥

પ્રથમં તુ મહદ્દુઃખમરાજ્યસ્ય વનાશ્રયમ્ ।
રાજપુત્ર્યાન્વિતસ્યૈવ ધનહીનસ્ય મે સુરાઃ ॥ ૫૧॥

વરાટિકાપિ પિત્રા મે ન દત્તા વનનિર્ગમે ।
પદાતિરસહાયોઽહં ધનહીનશ્ચ નિર્ગતઃ ॥ ૫૨॥

ચતુર્દશૈવ વર્ષાણિ નીતાનિ ચ તદા મયા ।
ક્ષાત્રં ધર્મં પરિત્યજ્ય વ્યાધવૃત્ત્યા મહાવને ॥ ૫૩॥

દૈવાદ્યુદ્ધે જયઃ પ્રાપ્તો નિહતોઽસૌ મહાસુરઃ ।
આનીતા ચ પુનઃ સીતા પ્રાપ્તાયોધ્યા મયા તથા ॥ ૫૪॥

વર્ષાણિ કતિચિત્તત્ર સુખં સંસારસમ્ભવમ્ ।
પ્રાપ્તં રાજ્યઞ્ચ સમ્પૂર્ણં કોસલાનધિતિષ્ઠતા ॥ ૫૫॥

પુરૈવં વર્તમાનેન પ્રાપ્તરાજ્યેન વૈ તદા ।
લોકાપવાદભીતેન ત્યક્તા સીતા વને મયા ॥ ૫૬॥

કાન્તાવિરહજં દુઃખં પુનઃ પ્રાપ્તં દુરાસદમ્ ।
પાતાલં સા ગતા પશ્ચાદ્ધરાં ભિત્ત્વા ધરાત્મજા ॥ ૫૭॥

એવં રામાવતારેઽપિ દુઃખં પ્રાપ્તં નિરન્તરમ્ ।
પરતન્ત્રેણ મે નૂનં સ્વતન્ત્રઃ કો ભવેત્તદા ॥ ૫૮॥

પશ્ચાત્કાલવશાત્પ્રાપ્તઃ સ્વર્ગો મે ભ્રાતૃભિઃ સહ ।
પરતન્ત્રસ્ય કા વાર્તા વક્તવ્યા વિબુધેન વૈ ॥ ૫૯॥

પરતન્ત્રોઽસ્મ્યહં નૂનં પદ્મયોને નિશામય ।
તથા ત્વમપિ રુદ્રશ્ચ સર્વે ચાન્યે સુરોત્તમાઃ ॥ ૬૦॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે બ્રહ્માણં પ્રતિ વિષ્ણુવાક્યં નામાષ્ટાદશોઽધ્યાયઃ ॥ ૪.૧૮॥

## ૪.૧૯ એકોનવિંશોઽધ્યાયઃ । દેવાન્ પ્રતિ દેવીવાક્યવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા ભગવાન્વિષ્ણુઃ પુનરાહ પ્રજાપતિમ્ ।
યન્માયામોહિતઃ સર્વસ્તત્ત્વં જાનાતિ નો જનઃ ॥ ૧॥

વયં માયાવૃતાઃ કામં ન સ્મરામો જગદ્ગુરુમ્ ।
પરમં પુરુષં શાન્તં સચ્ચિદાનન્દમવ્યયમ્ ॥ ૨॥

અહં વિષ્ણુરહં બ્રહ્મા શિવોઽહમિતિ મોહિતાઃ ।
ન જાનીમો વયં ધાતઃ પરં વસ્તુ સનાતનમ્ ॥ ૩॥

યન્માયામોહિતશ્ચાહં સદા વર્તે પરાત્મનઃ ।
પરવાન્દારુપાઞ્ચાલી માયિકસ્ય યથા વશે ॥ ૪॥

ભવતાપિ તથા દૃષ્ટા વિભૂતિસ્તસ્ય ચાદ્ભુતા ।
કલ્પાદૌ ભવયુક્તેન મયાપિ ચ સુધાર્ણવે ॥ ૫॥

મણિદ્વીપેઽથ મન્દારવિટપે રાસમણ્ડલે ।
સમાજે તત્ર સા દૃષ્ટા શ્રુતા ન વચસાપિ ચ ॥ ૬॥

તસ્માત્તાં પરમાં શક્તિં સ્મરન્ત્વદ્ય સુરાઃ શિવામ્ ।
સર્વકામપ્રદાં માયામાદ્યાં શક્તિં પરાત્મનઃ ॥ ૭॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા હરિણા દેવા બ્રહ્માદ્યા ભુવનેશ્વરીમ્ ।
સસ્મરુર્મનસા દેવીં યોગમાયાં સનાતનીમ્ ॥ ૮॥

સ્મૃતમાત્રા તદા દેવી પ્રત્યક્ષં દર્શનં દદૌ ।
પાશાઙ્કુશવરાભીતિધરા દેવી જપારુણા ।
દૃષ્ટ્વા પ્રમુદિતા દેવાસ્તુષ્ટુવુસ્તાં સુદર્શનામ્ ॥ ૯॥

દેવા ઊચુઃ ।
ઊર્ણનાભાદ્યથા તન્તુર્વિસ્ફુલિઙ્ગા વિભાવસોઃ ।
તથા જગદ્યદેતસ્યા નિર્ગતં તાં નતા વયમ્ ॥ ૧૦॥

યન્માયાશક્તિસઙ્ક્લૃપ્તં જગત્સર્વં ચરાચરમ્ ।
તાં ચિતં ભુવનાધીશાં સ્મરામઃ કરુણાર્ણવામ્ ॥ ૧૧॥

યદજ્ઞાનાદ્ભવોત્પત્તિર્યજ્જ્ઞાનાદ્ભવનાશનમ્ ।
સંવિદ્રૂપાં ચ તાં દેવીં સ્મરામઃ સા પ્રચોદયાત્ ॥ ૧૨॥

મહાલક્ષ્મ્યૈ ચ વિદ્મહે સર્વશક્ત્યૈ ચ ધીમહિ ।
તન્નો દેવી પ્રચોદયાત્ ॥ ૧૩॥

માતર્નતાઃ સ્મ ભુવનાર્તિહરે પ્રસીદ
શન્તો વિધેહિ કુરુ કાર્યમિદં દયાર્દ્રે ।
ભારં હરસ્વ વિનિહત્ય સુરારિવર્ગં

મહ્યા મહેશ્વરિ સતાં કુરુ શં ભવાનિ ॥ ૧૪॥

યદ્યમ્બુજાક્ષિ દયસે ન સુરાન્કદાચિત્
કિં તે ક્ષમા રણમુખેઽસિશરૈઃ પ્રહર્તુમ્ ।
એતત્ત્વયૈવ ગદિતં નનુ યક્ષરૂપં
ધૃત્વા તૃણં દહ હુતાશ પદાભિલાષૈઃ ॥ ૧૫॥

કંસઃ કુજોઽથ યવનેન્દ્રસુતશ્ચ કેશી
બાર્હદ્રથો બકબકીખરશાલ્વમુખ્યાઃ ।
યેઽન્યે તથા નૃપતયો ભુવિ સન્તિ તાંસ્ત્વં
હત્વા હરસ્વ જગતો ભરમાશુ માતઃ ॥ ૧૬॥

યે વિષ્ણુના ન નિહતાઃ કિલ શઙ્કરેણ
યે વા વિગૃહ્ય જલજાક્ષિ પુરન્દરેણ ।
તે તે મુખં સુખકરં સુસમીક્ષમાણાઃ
સઙ્ખ્યે શરૈર્વિનિહતા નિજલીલયા તે ॥ ૧૭॥

શક્તિં વિના હરિહરપ્રમુખાઃ સુરાશ્ચ ॥

નૈવેશ્વરા વિચલિતું તવ દેવદેવિ ।
કિં ધારણાવિરહિતઃ પ્રભુરપ્યનન્તો
ધર્તું ધરાઞ્ચ રજનીશકલાવતંસે ॥ ૧૮॥

ઇન્દ્ર ઉવાચ ।
વાચા વિના વિધિરલં ભવતીહ વિશ્વં
કર્તું હરિઃ કિમુ રમારહિતોઽથ પાતુમ્ ।
સંહર્તુમીશ ઉમયોજ્ઝિત ઈશ્વરઃ કિં
તે તાભિરેવ સહિતાઃ પ્રભવઃ પ્રજેશાઃ ॥ ૧૯॥

વિષ્ણુરુવાચ ।
કર્તું પ્રભુર્ન દ્રુહિણો ન કદાચનાહં
નાપીશ્વરસ્તવ કલારહિતસ્ત્રિલોક્યાઃ ।
કર્તું પ્રભુત્વમનઘેઽત્ર તથા વિહર્તું
ત્વં વૈ સમસ્તવિભવેશ્વરિ ભાસિ નૂનમ્ ॥ ૨૦॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા તદા દેવી તાનાહ વિબુધેશ્વરાન્ ।

કિં તત્કાર્યં વદન્ત્વદ્ય કરોમિ વિગતજ્વરાઃ ॥ ૨૧॥

અસાધ્યમપિ લોકેઽસ્મિંસ્તત્કરોમિ સુરેપ્સિતમ્ ।
શંસન્તુ ભવતાં દુઃખં ધરાયાશ્ચ સુરોત્તમાઃ ॥ ૨૨॥

દેવા ઊચુઃ ।
વસુધેયં ભરાક્રાન્તા સમ્પ્રાપ્તા વિબુધાન્પ્રતિ ।
રુદતી વેપમાના ચ પીડિતા દુષ્ટભૂભુજૈઃ ॥ ૨૩॥

ભારાપહરણં ચાસ્યાઃ કર્તવ્યં ભુવનેશ્વરિ ।
દેવાનામીપ્સિત કાર્યમેતદેવાધુના શિવે ॥ ૨૪॥

ઘાતિતસ્તુ પુરા માતસ્ત્વયા મહિષરૂપભૃત્ ।
દાનવોઽતિબલાક્રાન્તસ્તત્સહાયાશ્ચ કોટિશઃ ॥ ૨૫॥

તથા શુમ્ભો નિશુમ્ભશ્ચ રક્તબીજસ્તથાપરઃ ।
ચણ્ડમુણ્ડૌ મહાવીર્યૌ તથૈવ ધૂમ્રલોચનઃ ॥ ૨૬॥

દુર્મુખો દુઃસહશ્ચૈવ કરાલશ્ચાતિ વીર્યવાન્ ।
અન્યે ચ બહવઃ ક્રૂરાસ્ત્વયૈવ ચ નિપાતિતાઃ ॥ ૨૭॥

તથૈવ ચ સુરારીંશ્ચ જહિ સર્વાન્મહીશ્વરાન્ ।
(ભારં હર ધરાયાશ્ચ દુર્ધરં દુષ્ટભૂભુજાં ।)॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વા સા તદા દેવી દેવાનાહામ્બિકા શિવા ॥ ૨૮॥

સમ્પ્રહસ્યાસિતાપાઙ્ગી મેઘગમ્ભીરયા ગિરા ।
શ્રીદેવ્યુવાચ ।
મયેદં ચિન્તિતં પૂર્વમંશાવતરણં સુરાઃ ॥ ૨૯॥

ભારાવતરણં ચૈવ યથા સ્યાદ્દુષ્ટભૂભુજામ્ ।
મયા સર્વે નિહન્તવ્યા દૈત્યેશા યે મહીભુજઃ ॥ ૩૦॥

માગધાદ્યા મહાભાગાઃ સ્વશક્ત્યા મન્દતેજસઃ ।
ભવદ્ભિરપિ સ્વૈરંશૈરવતીર્ય ધરાતલે ॥ ૩૧॥

મચ્છક્તિયુક્તૈઃ કર્તવ્યં ભારાવતરણં સુરાઃ ।
કશ્યપો ભાર્યયા સાર્ધં દિવિજાનાં પ્રજાપતિઃ ॥ ૩૨॥

યાદવાનાં કુલે પૂર્વં ભવિતાઽઽનકદુન્દુભિઃ ।

તથૈવ ભૃગુશાપાદ્વૈ ભગવાન્વિષ્ણુરવ્યયઃ ॥ ૩૩॥

અંશેન ભવિતા તત્ર વસુદેવસુતો હરિઃ ।
તદાહં પ્રભવિષ્યામિ યશોદાયાં ચ ગોકુલે ॥ ૩૪॥

કાર્યં સર્વં કરિષ્યામિ સુરાણાં સુરસત્તમાઃ ।
કારાગારે ગતં વિષ્ણું પ્રાપયિષ્યામિ ગોકુલે ॥ ૩૫॥

શેષં ચ દેવકીગર્ભાત્પ્રાપયિષ્યામિ રોહિણીમ્ ।
મચ્છક્ત્યોપચિતૌ તૌ ચ કર્તારૌ દુષ્ટસઙ્ક્ષયમ્ ॥ ૩૬॥

દુષ્ટાનાં ભૂભુજાં કામં દ્વાપરાન્તે સુનિશ્ચિતમ્ ।
ઇન્દ્રાંશોઽપ્યર્જુનઃ સાક્ષાત્કરિષ્યતિ બલક્ષયમ્ ॥ ૩૭॥

ધર્માંશોઽપિ મહારાજો ભવિષ્યતિ યુધિષ્ઠિરઃ ।
વાય્વંશો ભીમસેનશ્ચાશ્વિન્યંશૌ ચ યમાવપિ ॥ ૩૮॥

વસોરંશોઽથ ગાઙ્ગેયઃ કરિષ્યતિ બલક્ષયમ્ ।
વ્રજન્તુ ચ ભવન્તોઽદ્ય ધરા ભવતુ સુસ્થિરા ॥ ૩૯॥

ભારાવતરણં નૂનં કરિષ્યામિ સુરોત્તમાઃ ।
કૃત્વા નિમિત્તમાત્રાંસ્તાન્સ્વશક્ત્યાહં ન સંશયઃ ॥ ૪૦॥

કુરુક્ષેત્રે કરિષ્યામિ ક્ષત્રિયાણાં ચ સઙ્ક્ષયમ્ ।
અસૂયેર્ષ્યા મતિસ્તૃષ્ણા મમતાભિમતા સ્પૃહા ॥ ૪૧॥

જિગીષા મદનો મોહો દોષૈર્નક્ષ્યન્તિ યાદવાઃ ।
બ્રાહ્મણસ્ય ચ શાપેન વંશનાશો ભવિષ્યતિ ॥ ૪૨॥

ભગવાનપિ શાપેન ત્યક્ષ્યત્યેતત્કલેવરમ્ ।
ભવન્તોઽપિ નિજાઙ્ગૈશ્ચ સહાયાઃ શાર્ઙ્ગધન્વનઃ ॥ ૪૩॥

પ્રભવન્તુ સનારીકા મથુરાયાં ચ ગોકુલે ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વાન્તર્દધે દેવી યોગમાયા પરાત્મનઃ ॥ ૪૪॥

સધરા વૈ સુરાઃ સર્વે જગ્મુઃ સ્વાન્યાલયાનિ ચ ।
ધરાપિ સુસ્થિરા જાતા તસ્યા વાક્યેન તોષિતા ॥ ૪૫॥

ઓષધીવીરુધોપેતા બભૂવ જનમેજય ।
પ્રજાશ્ચ સુખિનો જાતા દ્વિજાશ્ચાપુર્મહોદયમ્ ।

સન્તુષ્ટા મુનયઃ સર્વે બભૂબુર્ધર્મતત્પરાઃ ॥ ૪૬॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે દેવાન્ પ્રતિ દેવીવાક્યવર્ણનં નામકોનવિંશોઽધ્યાયઃ ॥ ૪.૧૯॥

## ૪.૨૦ વિંશોઽધ્યાયઃ । કૃષ્ણાવતારકથોપક્રમવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
શ‍ૃણ ભારત વક્ષ્યામિ ભારાવતરણં તથા ।
કુરુક્ષેત્રે પ્રભાસે ચ ક્ષપિતં યોગમાયયા ॥ ૧॥

યદુવંશે સમુત્પત્તિર્વિષ્ણોરમિતતેજસઃ ।
ભૃગુશાપપ્રતાપેન મહામાયાબલેન ચ ॥ ૨॥

ક્ષિતિભારસમુત્તારનિમિત્તમિતિ મે મતિઃ ।
માયયા વિહિતો યોગો વિષ્ણોર્જન્મ ધરાતલે ॥ ૩॥

કિં ચિત્રં નૃપ દેવી સા બ્રહ્મવિષ્ણુસુરાનપિ ।
નર્તયત્યનિશં માયા ત્રિગુણાનપરાન્કિમુ ॥ ૪॥

ગર્ભવાસોદ્ભવં દુઃખં વિણ્મૂત્રસ્નાયુસંયુતમ્ ।
વિષ્ણોરાપાદિતં સમ્યગ્યયા વિગતલીલયા ॥ ૫॥

પુરા રામાવતારેઽપિ નિર્જરા વાનરાઃ કૃતાઃ ।
વિદિતં તે યથા વિષ્ણુર્દુઃખપાશેન મોહિતઃ ॥ ૬॥

અહં મમેતિ પાશેન સુદૃઢેન નરાધિપ ।
યોગિનો મુક્તસઙ્ગાશ્ચ ભુક્તિકામા મુમુક્ષવઃ ॥ ૭॥

તામેવ સમુપાસન્તે દેવીં વિશ્વેશ્વરીં શિવામ્ ।
યદ્ભક્તિલેશલેશાંશલેશલેશલવાંશકમ્ ॥ ૮॥

લબ્ધ્વા મુક્તો ભવેજ્જન્તુસ્તાં ન સેવેત કો જનઃ ।
ભુવનેશીત્યેવ વક્ત્રે દદાતિ ભુવનત્રયમ્ ॥ ૯॥

માં પાહીત્યસ્ય વચસો દેયાભાવાદૃણાન્વિતા ।
વિદ્યાવિદ્યેતિ તસ્યા દ્વે રૂપે જાનીહિ પાર્થિવ ॥ ૧૦॥

વિદ્યયા મુચ્યતે જન્તુર્બધ્યતેઽવિદ્યયા પુનઃ ।
બ્રહ્મા વિષ્ણુશ્ચ રુદ્રશ્ચ સર્વે તસ્યા વશાનુગાઃ ॥ ૧૧॥

અવતારાઃ સર્વ એવ યન્ત્રિતા ઇવ દામભિઃ ।
કદાચિચ્ચ સુખં ભુઙ્ક્તે વૈકુણ્ઠે ક્ષીરસાગરે ॥ ૧૨॥

કદાચિત્કુરુતે યુદ્ધં દાનવૈર્બલવત્તરૈઃ ।
હરિઃ કદાચિદ્યજ્ઞાન્વૈ વિતતાન્પ્રકરોતિ ચ ॥ ૧૩॥

કદાચિચ્ચ તપસ્તીવ્રં તીર્થે ચરતિ સુવ્રત ।
કદાચિચ્છયને શેતે યોગનિદ્રામુપાશ્રિતઃ ॥ ૧૪॥

ન સ્વતન્ત્રઃ કદાચિચ્ચ ભગવાન્મધુસૂદનઃ ।
તથા બ્રહ્મા તથા રુદ્રસ્તથેન્દ્રો વરુણો યમઃ ॥ ૧૫॥

કુબેરોઽગ્ની રવીન્દૂ ચ તથાન્યે સુરસત્તમાઃ ।
મુનયઃ સનકાદ્યાશ્ચ વસિષ્ઠાદ્યાસ્તથાપરે ॥ ૧૬॥

સર્વેઽમ્બાવશગા નિત્યં પાઞ્ચાલીવ નરસ્ય ચ ।
નસિ પ્રોતા યથા ગાવો વિચરન્તિ વશાનુગાઃ ॥ ૧૭॥

તથૈવ દેવતાઃ સર્વાઃ કાલપાશનિયન્ત્રિતાઃ ।
હર્ષશોકાદયો ભાવા નિદ્રાતન્દ્રાલસાદયઃ ॥ ૧૮॥

સર્વેષાં સર્વદા રાજન્દેહિનાં દેહસંશ્રિતાઃ ।
અમરા નિર્જરાઃ પ્રોક્તા દેવાશ્ચ ગ્રન્થકારકૈઃ ॥ ૧૯॥

અભિધાનતશ્ચાર્થતો ન તે નૂનં તાદૃશાઃ ક્વચિત્ ।
ઉત્પત્તિસ્થિતિનાશાખ્યા ભાવા યેષાં નિરન્તરમ્ ॥ ૨૦॥

અમરાસ્તે કથં વાચ્યા નિર્જરાશ્ચ કથં પુનઃ ।
કથં દુઃખાભિભૂતા વા જાયન્તે વિબુધોત્તમાઃ ॥ ૨૧॥

કથં દેવાશ્ચ વક્તવ્યા વ્યસને ક્રીડનં કથમ્ ।
ક્ષણાદુત્પત્તિનાશશ્ચ દૃશ્યતેઽસ્મિન્ન સંશયઃ ॥ ૨૨॥

જલજાનાં ચ કીટાનાં મશકાનાં તથા પુનઃ ।
ઉપમા ન કથં ચૈષામાયુષોઽન્તે મરાઃ સ્મૃતાઃ ॥ ૨૩॥

તતો વર્ષાયુષશ્ચાપિ શતવર્ષાયુષસ્તથા ।
મનુષ્યા હ્યમરા દેવાસ્તસ્માદ્ બ્રહ્માપરઃ સ્મૃતઃ ॥ ૨૪॥

રુદ્રસ્તથા તથા વિષ્ણુઃ ક્રમશશ્ચ ભવન્તિ હિ ।

નશ્યન્તિ ક્રમશશ્ચૈવ વર્ધન્તિ ચોત્તરોત્તરમ્ ॥ ૨૫॥

નૂનં દેહવતો નાશો મૃતસ્યોત્પત્તિરેવ ચ ।
ચક્રવદ્ ભ્રમણં રાજન્ સર્વેષાં નાત્ર સંશયઃ ॥ ૨૬॥

મોહજાલાવૃતો જન્તુર્મુચ્યતે ન કદાચન ।
માયાયાં વિદ્યમાનાયાં મોહજાલં ન નશ્યતિ ॥ ૨૭॥

ઉત્પિત્સુકાલ ઉત્પત્તિઃ સર્વેષાં નૃપ જાયતે ।
તથૈવ નાશઃ કલ્પાન્તે બ્રહ્માદીનાં યથાક્રમમ્ ॥ ૨૮॥

નિમિત્તં યસ્તુ યન્નાશે સ ઘાતયતિ તં નૃપ ।
નાન્યથા તદ્ભવેન્નૂનં વિધિના નિર્મિતં તુ યત્ ॥ ૨૯॥

જન્મમૃત્યુજરાવ્યાધિદુઃખં વા સુખમેવ વા ।
તત્તથૈવ ભવેત્કામં નાન્યથેહ વિનિર્ણયઃ ॥ ૩૦॥

સર્વેષાં સુખદૌ દેવૌ પ્રત્યક્ષૌ શશિભાસ્કરૌ ।
ન નશ્યતિ તયોઃ પીડા ક્વચિત્તદ્વૈરિસમ્ભવા ॥ ૩૧॥

ભાસ્કરસ્ય સુતો મન્દઃ ક્ષયી ચન્દ્રઃ કલઙ્કવાન્ ।
પશ્ય રાજન્ વિધેઃ સૂત્રં દુર્વારં મહતામપિ ॥ ૩૨॥

વેદકર્તા જગત્સ્રષ્ટા બુદ્ધિદસ્તુ ચતુર્મુખઃ ।
સોઽપિ વિક્લવતાં પ્રાપ્તો દૃષ્ટ્વા પુત્રીં સરસ્વતીમ્ ॥ ૩૩॥

શિવસ્યાપિ મૃતા ભાર્યા સતી દગ્ધ્વા કલેવરમ્ ।
સોઽભવદ્દુઃખસન્તપ્તઃ કામાર્તશ્ચ જનાર્તિહા ॥ ૩૪॥

કામાગ્નિદગ્ધદેહસ્તુ કાલિન્દ્યાં પતિતઃ શિવઃ ।
સાપિ શ્યામજલા જાતા તન્નિદાઘવશાન્નૃપ ॥ ૩૫॥

કામાર્તો રમમાણસ્તુ નગ્નઃ સોઽપિ ભૃગોર્વનમ્ ।
ગતઃ પ્રાપ્તોઽથ ભૃગુણા શપ્તઃ કામાતુરો ભૃશમ્ ॥ ૩૬॥

પતત્વદ્યૈવ તે લિઙ્ગં નિર્લજ્જેતિ ભૃશં કિલ ।
પપૌ ચામૃતવાપીઞ્ચ દાનવૈર્નિર્મિતાં મુદે ॥ ૩૭॥

ઇન્દ્રોઽપિ ચ વૃષો ભૂત્વા વાહનત્વં ગતઃ ક્ષિતૌ ।
આદ્યસ્ય સર્વલોકસ્ય વિષ્ણોરેવ વિવેકિનઃ ॥ ૩૮॥

સર્વજ્ઞત્વં ગતં કુત્ર પ્રભુશક્તિઃ કુતો ગતા ।
યદ્ધેમમૃગવિજ્ઞાનં ન જ્ઞાતં હરિણા કિલ ॥ ૩૯॥

રાજન્ માયાબલં પશ્ય રામો હિ કામમોહિતઃ ।
રામો વિરહસન્તપ્તો રુરોદ ભૃશમાતુરઃ ॥ ૪૦॥

યોઽપૃચ્છત્પાદપાન્મૂઢઃ ક્વ ગતા જનકાત્મજા ।
ભક્ષિતા વા હૃતા કેન રુદન્નુચ્ચતરં તતઃ ॥ ૪૧॥

લક્ષ્મણાહં મરિષ્યામિ કાન્તાવિરહદુઃખિતઃ ।
ત્વં ચાપિ મમ દુઃખેન મરિષ્યસિ વનેઽનુજ ॥ ૪૨॥

આવયોર્મરણં જ્ઞાત્વા માતા મમ મરિષ્યતિ ।
શત્રુઘ્નોઽપ્યતિદુઃખાર્તઃ કથં જીવિતુમર્હતિ ॥ ૪૩॥

સુમિત્રા જીવિતં જહ્યાત્પુત્રવ્યસનકર્શિતા ।
પૂર્ણકામાથ કૈકેયી ભવેત્પુત્રસમન્વિતા ॥ ૪૪॥

હા સીતે ક્વ ગતાસિ ત્વં માં વિહાય સ્મરાતુરા ।
એહ્યેહિ મૃગશાવાક્ષિ માં જીવય કૃશોદરિ ॥ ૪૫॥

કિં કરોમિ ક્વ ગચ્છામિ ત્વદધીનઞ્ચ જીવિતમ્ ।
સમાશ્વાસય દીનં માં પ્રિયં જનકનન્દિનિ ॥ ૪૬॥

એવં વિલપતા તેન રામેણામિતતેજસા ।
વને વને ચ ભ્રમતા નેક્ષિતા જનકાત્મજા ॥ ૪૭॥

શરણ્યઃ સર્વલોકાનાં રામઃ કમલલોચનઃ ।
શરણં વાનરાણાં સ ગતો માયાવિમોહિતઃ ॥ ૪૮॥

સહાયાન્વાનરાન્કૃત્વા બબન્ધ વરુણાલયમ્ ।
જઘાન રાવણં વીરં કુમ્ભકર્ણં મહોદરમ્ ॥ ૪૯॥

આનીય ચ તતઃ સીતાં રામો દિવ્યમકારયત્ ।
સર્વજ્ઞોઽપિ હૃતાં મત્વા રાવણેન દુરાત્મના ॥ ૫૦॥

કિં બ્રવીમિ મહારાજ યોગમાયાબલં મહત્ ।
યયા વિશ્વમિદં સર્વં ભ્રામિતં ભ્રમતે કિલ ॥ ૫૧॥

એવં નાનાવતારેઽત્ર વિષ્ણુઃ શાપવશં ગતઃ ।
કરોતિ વિવિધાશ્ચેષ્ટા દૈવાધીનઃ સદૈવ હિ ॥ ૫૨॥

તવાહં કથયિષ્યામિ કૃષ્ણસ્યાપિ વિચેષ્ટિતમ્ ।
પ્રભવં માનુષે લોકે દેવકાર્યાર્થસિદ્ધયે ॥ ૫૩॥

કાલિન્દીપુલિને રમ્યે હ્યાસીન્મધુવનં પુરા ।
લવણો મધુપુત્રસ્તુ તત્રાસીદ્દાનવો બલી ॥ ૫૪॥

દ્વિજાનાં દુઃખદઃ પાપો વરદાનેન ગર્વિતઃ ।
નિહતોઽસૌ મહાભાગ લક્ષ્મણસ્યાનુજેન વૈ ॥ ૫૫॥

શત્રુઘ્નેનાથ સઙ્ગ્રામે તં નિહત્ય મદોત્કટમ્ ।
વાસિતા મથુરા નામ પુરી પરમશોભના ॥ ૫૬॥

સ તત્ર પુષ્કરાક્ષૌ દ્વૌ પુત્રૌ શત્રુનિષૂદનઃ ।
નિવેશ્ય રાજ્યે મતિમાન્કાલે પ્રાપ્તે દિવં ગતઃ ॥ ૫૭॥

સૂર્યવંશક્ષયે તાં તુ યાદવાઃ પ્રતિપેદિરે ।
મથુરાં મુક્તિદા રાજન્ યયાતિતનયઃ પુરા ॥ ૫૮॥

શૂરસેનાભિધઃ શૂરસ્તત્રાભૂન્મેદિનીપતિઃ ।
માથુરાઞ્છૂરસેનાંશ્ચ બુભુજે વિષયાન્નૃપ ॥ ૫૯॥

તત્રોત્પન્નઃ કશ્યપાંશઃ શાપાચ્ચ વરુણસ્ય વૈ ।
વસુદેવોઽતિવિખ્યાતઃ શૂરસેનસુતસ્તદા ॥ ૬૦॥

વૈશ્યવૃત્તિરતઃ સોઽભૂન્મૃતે પિતરિ માધવઃ ।
ઉગ્રસેનો બભૂવાથ કંસસ્તસ્યાત્મજો મહાન્ ॥ ૬૧॥

અદિતિર્દેવકી જાતા દેવકસ્ય સુતા તદા ।
શાપાદ્વૈ વરુણસ્યાથ કશ્યપાનુગતા કિલ ॥ ૬૨॥

દત્તા સા વસુદેવાય દેવકેન મહાત્મના ।
વિવાહે રચિતે તત્ર વાગભૂદ્ ગગને તદા ॥ ૬૩॥

કંસ કંસ મહાભાગ દેવકીગર્ભસમ્ભવઃ ।
અષ્ટમસ્તુ સુતઃ શ્રીમાંસ્તવ હન્તા ભવિષ્યતિ ॥ ૬૪॥

તચ્છ્રુત્વા વચનં કંસો વિસ્મિતોઽભૂન્મહાબલઃ ।
દેવવાચં તુ તાં મત્વા સત્યાં ચિન્તામવાપ સઃ ॥ ૬૫॥

કિં કરોમીતિ સઞ્ચિન્ત્ય વિમર્શમકરોત્તદા ।

નિહત્યૈનાં ન મે મૃત્યુર્ભવેદદ્યૈવ સત્વરમ્ ॥ ૬૬॥

ઉપાયો નાન્યથા ચાસ્મિન્કાર્યે મૃત્યુભયાવહે ।
ઇયં પિતૃષ્વસા પૂજ્યા કથં હન્મીત્યચિન્તયત્ ॥ ૬૭॥

પુનર્વિચારયામાસ મરણં મેઽસ્ત્યહો સ્વસા ।
પાપેનાપિ પ્રકર્તવ્યા દેહરક્ષા વિપશ્ચિતા ॥ ૬૮॥

પ્રાયશ્ચિત્તેન પાપસ્ય શુદ્ધિર્ભવતિ સર્વદા ।
પ્રાણરક્ષા પ્રકર્તવ્યા બુધૈરપ્યેનસા તથા ॥ ૬૯॥

વિચિન્ત્ય મનસા કંસઃ ખડ્ગમાદાય સત્વરઃ ।
જગ્રાહ તાં વરારોહાં કેશેષ્વાકૃષ્ય પાપકૃત્ ॥ ૭૦॥

કોશાત્ખડ્ગમુપાકૃષ્ય હન્તુકામો દુરાશયઃ ।
પશ્યતાં સર્વલોકાનાં નવોઢાં તાં ચકર્ષ હ ॥ ૭૧॥

હન્યમાનાઞ્ચ તાં દૃષ્ટ્વા હાહાકારો મહાનભૂત્ ।
વસુદેવાનુગા વીરા યુદ્ધાયોદ્યતકાર્મુકાઃ ॥ ૭૨॥

મુઞ્ચ મુઞ્ચેતિ પ્રોચુસ્તં તે તદાદ્ભુતસાહસાઃ ।
કૃપયા મોચયામાસુર્દેવકીં દેવમાતરમ્ ॥ ૭૩॥

તદ્યુદ્ધમભવદ્ ઘોરં વીરાણાઞ્ચ પરસ્પરમ્ ।
વસુદેવસહાયાનાં કંસેન ચ મહાત્મના ॥ ૭૪॥

વર્તમાને તથા યુદ્ધે દારુણે લોમહર્ષણે ।
કંસં નિવારયામાસુર્વૃદ્ધા યે યદુસત્તમાઃ ॥ ૭૫॥

પિતૃષ્વસેયં તે વીર પૂજનીયા ચ બાલિશા ।
ન હન્તવ્યા ત્વયા વીર વિવાહોત્સવસઙ્ગમે ॥ ૭૬॥

સ્ત્રીહત્યા દુઃસહા વીર કીર્તિઘ્ની પાપકૃત્તમા ।
ભૂતભાષિતમાત્રેણ ન કર્તવ્યા વિજાનતા ॥ ૭૭॥

અન્તર્હિતેન કેનાપિ શત્રુણા તવ ચાસ્ય વા ।
ઉદિતેતિ કુતો ન સ્યાદ્વાગનર્થકરી વિભો ॥ ૭૮॥

યશસસ્તે વિઘાતાય વસુદેવગૃહસ્ય ચ ।
અરિણા રચિતા વાણી ગુણમાયાવિદા નૃપ ॥ ૭૯॥

બિભેષિ વીરસ્ત્વં ભૂત્વા ભૂતભાષિતભાષયા ।
યશોમૂલવિઘાતાર્થમુપાયસ્ત્વરિણા કૃતઃ ॥ ૮૦॥

પિતૃષ્વસા ન હન્તવ્યા વિવાહસમયે પુનઃ ।
ભવિતવ્યં મહારાજ ભવેચ્ચ કથમન્યથા ॥ ૮૧॥

એવં તૈર્બોધ્યમાનોઽસૌ નિવૃત્તો નાભવદ્યદા ।
તદા તં વસુદેવોઽપિ નીતિજ્ઞઃ પ્રત્યભાષત ॥ ૮૨॥

કંસ સત્યં બ્રવીમ્યદ્ય સત્યાધારં જગત્ત્રયમ્ ।
દાસ્યામિ દેવકીપુત્રાનુત્પન્નાંસ્તવ સર્વશઃ ॥ ૮૩॥

જાતં જાતં સુતં તુભ્યં ન દાસ્યામિ યદિ પ્રભો ।
કુમ્ભીપાકે તદા ઘોરે પતન્તુ મમ પૂર્વજાઃ ॥ ૮૪॥

શ્રુત્વાથ વચનં સત્યં પૌરવા યે પુરઃસ્થિતાઃ ।
ઊચુસ્તે ત્વરિતાઃ કંસં સાધુ સાધુ પુનઃ પુનઃ ॥ ૮૫॥

ન મિથ્યા ભાષતે ક્વાપિ વસુદેવો મહામનાઃ ।
કેશં મુઞ્ચ મહાભાગ સ્ત્રીહત્યા પાતકં તથા ॥ ૮૬॥

વ્યાસ ઉવાચ ।
એવં પ્રબોધિતઃ કંસો યદુવૃદ્ધૈર્મહાત્મભિઃ ।
ક્રોધં ત્યક્ત્વા સ્થિતસ્તત્ર સત્યવાક્યાનુમોદિતઃ ॥ ૮૭॥

તતો દુન્દુભયો નેદુર્વાદિત્રાણિ ચ સસ્વનુઃ ।
જયશબ્દસ્તુ સર્વેષામુત્પન્નસ્તત્ર સંસદિ ॥ ૮૮॥

પ્રસાદ્ય કંસં પ્રતિમોચ્ય દેવકીં
મહાયશાઃ શૂરસુતસ્તદાનીમ્ ।
જગામ ગેહં સ્વજનાનુવૃત્તો
નવોઢયા વીતભયસ્તરસ્વી ॥ ૮૯॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે કૃષ્ણાવતારકથોપક્રમવર્ણનં નામ વિંશોઽધ્યાયઃ ॥ ૪.૨૦॥

## ૪.૨૧ એકવિંશોઽધ્યાયઃ । કંસેન દેવકીપ્રથમપુત્રવધવર્ણનમ્ ।

વ્યાસ ઉવાચ ।
અથ કાલે તુ સમ્પ્રાપ્તે દેવકી દેવરૂપિણી ।
ગર્ભં દધાર વિધિવદ્વસુદેવેન સઙ્ગતા ॥ ૧॥

પૂર્ણેઽથ દશમે માસે સુષુવે સુતમુત્તમમ્ ।
રૂપાવયવસમ્પન્નં દેવકી પ્રથમં યદા ॥ ૨॥

તદાઽઽહ વસુદેવસ્તાં સત્યવાક્યાનુમોદિતઃ ।
ભાવિત્વાચ્ચ મહાભાગો દેવકીં દેવમાતરમ્ ॥ ૩॥

વરોરુ સમયં મે ત્વં જાનાસિ સ્વસુતાર્પણે ।
મોચિતા ત્વં મહાભાગે શપથેન મયા તદા ॥ ૪॥

ઇમં પુત્રં સુકેશાન્તે દાસ્યામિ ભ્રાતૃસૂનવે ।
(ખલે કંસે વિનાશાર્થં દૈવે કિં વા કરિષ્યસિ ।)॥

વિચિત્રકર્મણાં પાકો દુર્જ્ઞેયો હ્યકૃતાત્મભિઃ ॥ ૫॥

સર્વેષાં કિલ જીવાનાં કાલપાશાનુવર્તિનામ્ ।
ભોક્તવ્યં સ્વકૃતં કર્મ શુભ વા યદિ વાશુભમ્ ॥ ૬॥

પ્રારબ્ધં સર્વથૈવાત્ર જીવસ્ય વિધિનિર્મિતમ્ ।
દેવક્યુવાચ ।
સ્વામિન્ પૂર્વં કૃતં કર્મ ભોક્તવ્યં સર્વથા નૃભિઃ ॥ ૭॥

તીર્થૈસ્તપોભિર્દાનૈર્વા કિં ન યાતિ ક્ષયં હિ તત્ ।
લિખિતો ધર્મશાસ્ત્રેષુ પ્રાયશ્ચિત્તવિધિર્નૃપ ॥ ૮॥

પૂર્વાર્જિતાનાં પાપાનાં વિનાશાય મહાત્મભિઃ ।
બ્રહ્મહા હેમહારી ચ સુરાપો ગુરુતલ્પગઃ ॥ ૯॥

દ્વાદશાબ્દવ્રતે ચીર્ણે શુદ્ધિં યાતિ યતસ્તતઃ ।
મન્વાદિભિર્યથોદ્દિષ્ટં પ્રાયશ્ચિત્તં વિધાનતઃ ॥ ૧૦॥

તથા કૃત્વા નરઃ પાપાન્મુચ્યતે વા ન વાનઘ ।
વિગીતવચનાસ્તે કિં મુનયસ્તત્ત્વદર્શિનઃ ॥ ૧૧॥

યાજ્ઞવલ્ક્યાદયઃ સર્વે ધર્મશાસ્ત્રપ્રવર્તકાઃ ।
ભવિતવ્યં ભવત્યેવ યદ્યેવં નિશ્ચયઃ પ્રભો ॥ ૧૨॥

આયુર્વેદઃ સ મિથ્યૈવ મન્ત્રવાદાસ્તથાખિલાઃ ।
ઉદ્યમસ્તુ વૃથા સર્વમેવં ચેદ્દૈવનિર્મિતમ્ ॥ ૧૩॥

ભવિતવ્યં ભવત્યેવ પ્રવૃત્તિસ્તુ નિરર્થિકા ।
અગ્નિષ્ટોમાદિકં વ્યર્થં નિયતં સ્વર્ગસાધનમ્ ॥ ૧૪॥

યદા તદા પ્રમાણં હિ વૃથૈવ પરિભાષિતમ્ ।
વિતથે તત્પ્રમાણે તુ ધર્મોચ્છેદઃ કુતો ન હિ ॥ ૧૫॥

ઉદ્યમે ચ કૃતે સિદ્ધિઃ પ્રત્યક્ષેણૈવ સાધ્યતે ।
તસ્માદત્ર પ્રકર્તવ્યઃ પ્રપઞ્ચશ્ચિત્તકલ્પિતઃ ॥ ૧૬॥

યથાયં બાલકઃ ક્ષેમં પ્રાપ્નોતિ મમ પુત્રકઃ ।
મિથ્યા યદિ પ્રકર્તવ્યં વચનં શુભમિચ્છતા ॥ ૧૭॥

ન તત્ર દૂષણં કિઞ્ચિત્પ્રવદન્તિ મનીષિણઃ ।
વસુદેવ ઉવાચ ।
નિશામય મહાભાગે સત્યમેતદ્ બ્રવીમિ તે ॥ ૧૮॥

ઉદ્યમઃ ખલુ કર્તવ્યઃ ફલં દૈવવશાનુગમ્ ।
ત્રિવિધાનીહ કર્માણિ સંસારેઽત્ર પુરાવિદઃ ॥ ૧૯॥

પ્રવદન્તીહ જીવાનાં પુરાણેષ્વાગમેષુ ચ ।
સઞ્ચિતાનિ ચ જીર્ણાનિ પ્રારબ્ધાનિ સુમધ્યમે ॥ ૨૦॥

વર્તમાનાનિ વામોરુ વિવિધાનીહ દેહિનામ્ ।
શુભાશુભાનિ કર્માણિ બીજભૂતાનિ યાનિ ચ ॥ ૨૧॥

બહુજન્મસમુત્થાનિ કાલે તિષ્ઠન્તિ સર્વથા ।
પૂર્વદેહં પરિત્યજ્ય જીવઃ કર્મવશાનુગઃ ॥ ૨૨॥

સ્વર્ગં વા નરકં વાપિ પ્રાપ્નોતિ સ્વકૃતેન વૈ ।
દિવ્યં દેહઞ્ચ સમ્પ્રાપ્ય યાતનાદેહમર્થજમ્ ॥ ૨૩॥

ભુનક્તિ વિવિધાન્ ભોગાન્સ્વર્ગે વા નરકેઽથવા ।
ભોગાન્તે ચ યદોત્પત્તેઃ સમયસ્તસ્ય જાયતે ॥ ૨૪॥

લિઙ્ગદેહેન સહિતં જાયતે જીવસંજ્ઞિતમ્ ।
તદૈવ સઞ્ચિતેભ્યશ્ચ કર્મભ્યઃ કર્મભિઃ પુનઃ ॥ ૨૫॥

યોજયત્યેવ તં કાલં કર્માણિ પ્રાક્કૃતાનિ ચ ।
દેહેનાનેન ભાવ્યાનિ શુભાનિ ચાશુભાનિ ચ ॥ ૨૬॥

પ્રારબ્ધાનિ ચ જીવેન ભોક્તવ્યાનિ સુલોચને ।
પ્રાયશ્ચિત્તેન નશ્યન્તિ વર્તમાનાનિ ભામિનિ ॥ ૨૭॥

સઞ્ચિતાનિ તથૈવાશુ યથાર્થં વિહિતેન ચ ।
પ્રારબ્ધકર્મણાં ભોગાત્સઙ્ક્ષયો નાન્યથા ભવેત્ ॥ ૨૮॥

તેનાયં તે કુમારો વૈ દેયઃ કંસાય સર્વથા ।
ન મિથ્યા વચનં મેઽસ્તિ લોકનિન્દાભિદૂષિતમ્ ॥ ૨૯॥

અનિત્યેઽસ્મિંસ્તુ સંસારે ધર્મસારે મહાત્મનામ્ ।
દૈવાધીનં હિ સર્વેષાં મરણં જનનં તથા ॥ ૩૦॥

તસ્માચ્છોકો ન કર્તવ્યો દેહિના હિ નિરર્થકઃ ।
સત્યં યસ્ય ગતં કાન્તે વૃથા તસ્યૈવ જીવિતમ્ ॥ ૩૧॥

ઇહલોકો ગતો યસ્માત્પરલોકઃ કુતસ્તતઃ ।
અતો દેહિ સુતં સુભ્રુ કંસાય પ્રદદામ્યહમ્ ॥ ૩૨॥

સત્યસંસ્તરણાદ્દેવિ શુભમગ્રે ભવિષ્યતિ ।
કર્તવ્યં સુકૃતં પુમ્ભિઃ સુખે દુઃખે સતિ પ્રિયે ॥ ૩૩॥

(સત્યસંરક્ષણાદ્દેવિ શુભમેવ ભવિષ્યતિ)॥

વ્યાસ ઉવાચ ।
ઇત્યુક્તવતિ કાન્તે સા દેવકી શોકસંયુતા ।
દદૌ પુત્રં પ્રસૂતં ચ વેપમાના મનસ્વિની ॥ ૩૪॥

વસુદેવોઽપિ ધર્માત્મા આદાય સ્વસુતં શિશુમ્ ।
જગામ કંસસદનં માર્ગે લોકૈરભિષ્ટુતઃ ॥ ૩૫॥

લોકા ઊચુઃ ।
પશ્યન્તુ વસુદેવં ભો લોકા એવં મનસ્વિનમ્ ।
સ્વવાક્યમનુરુધ્યૈવ બાલમાદાય યાત્યસૌ ॥ ૩૬॥

મૃત્યવે દાતુકામોઽદ્ય સત્યવાગનસૂયકઃ ।
સફલં જીવિતં ચાસ્ય ધર્મં પશ્યન્તુ ચાદ્ભુતમ્ ॥ ૩૭॥

યઃ પુત્રં યાતિ કંસાય દાતું કાલાત્મનેઽપિ હિ ।

વ્યાસ ઉવાચ ।
ઇતિ સંસ્તૂયમાનસ્તુ પ્રાપ્તઃ કંસાલયં નૃપ ॥ ૩૮॥

દદાવસ્મૈ કુમારં તં જાતમાત્રમમાનુષમ્ ।
કંસોઽપિ વિસ્મયં પ્રાપ્તો દૃષ્ટ્વા ધૈર્યં મહાત્મનઃ ॥ ૩૯॥

ગૃહીત્વા બાલકં પ્રાહ સ્મિતપૂર્વમિદં વચઃ ।
ધન્યસ્ત્વં શૂરપુત્રાદ્ય જ્ઞાતઃ પુત્રસમર્પણાત્ ॥ ૪૦॥

મમ મૃત્યુર્ન ચાયં વૈ ગિરા પ્રોક્તસ્તુ ચાષ્ટમઃ ।
ન હન્તવ્યો મયા કામં બાલોઽયં યાતુ તે ગહમ્ ॥ ૪૧॥

અષ્ટમસ્તુ પ્રદાતવ્યસ્ત્વયા પુત્રો મહામતે ।
ઇત્યુક્ત્વા વસુદેવાય દદાવાશુ ખલઃ શિશુમ્ ॥ ૪૨॥

ગચ્છત્વયં ગૃહે બાલઃ ક્ષેમં વ્યાહૃતવાન્નૃપઃ ।
તમાદાય તદા શૌરિર્જગામ સ્વગૃહં મુદા ॥ ૪૩॥

કંસોઽપિ સચિવાનાહ વૃથા કિં ઘાતયે શિશુમ્ ।
અષ્ટમાદ્દેવકીપુત્રાન્મમ મૃત્યુરુદાહૃતઃ ॥ ૪૪॥

અતઃ કિં પ્રથમં બાલં હત્વા પાપં કરોમ્યહમ્ ।
સાધુસાધ્વિતિ તેઽપ્યુક્ત્વા સંસ્થિતા મન્ત્રિસત્તમાઃ ॥ ૪૫॥

વિસર્જિતાસ્તુ કંસેન જગ્મુસ્તે સ્વગૃહાન્પ્રતિ ।
ગતેષુ તેષુ સમ્પ્રાપ્તો નારદો મુનિસત્તમઃ ॥ ૪૬॥

અભ્યુત્થાનાર્ઘ્યપાદ્યાદિ ચકારોગ્રસુતસ્તદા ।
પપ્રચ્છ કુશલં રાજા તત્રાગમનકારણમ્ ॥ ૪૭॥

નારદસ્તં તદોવાચ સ્મિતપૂર્વમિદં વચઃ ।
કંસ કંસ મહાભાગ ગતોઽહં હેમપર્વતમ્ ॥ ૪૮॥

તત્ર બ્રહ્માદયો દેવા મન્ત્રં ચક્રુઃ સમાહિતાઃ ।
દેવક્યાં વસુદેવસ્ય ભાર્યાયાં સુરસત્તમઃ ॥ ૪૯॥

વધાર્થં તવ વિષ્ણુશ્ચ જન્મ ચાત્ર કરિષ્યતિ ।
તત્કથં ન હતઃ પુત્રસ્ત્વયા નીતિં વિજાનતા ॥ ૫૦॥

કંસ ઉવાચ ।
અષ્ટમં ચ હનિષ્યેઽહં મૃત્યું મે દેવભાષિતમ્ ।

નારદ ઉવાચ ।
ન જાનાસિ નૃપશ્રેષ્ઠ રાજનીતિં શુભાશુભા । ૫૧॥

માયાબલં ચ દેવાનાં ન ત્વં વેત્સિ વદામિ કિમ્ ।
રિપુરલ્પોઽપિ શૂરેણ નોપેક્ષ્યઃ શુભમિચ્છતા ॥ ૫૨॥

સમ્મેલનક્રિયાયાં તુ સર્વે તે હ્યષ્ટમાઃ સ્મૃતાઃ ।
મૂર્ખસ્ત્વમરિસન્ત્યાગઃ કૃતોઽયં જાનતા ત્વયા ॥ ૫૩॥

ઇત્યુક્ત્વાશુ ગતઃ શ્રીમાન્નારદો દેવદર્શનઃ ।
ગતેઽથ નારદે કંસઃ સમાહૂયાથ બાલકમ્ ।
પાષાણે પોથયામાસ સુખં પ્રાપ ચ મન્દધીઃ ॥ ૫૪॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
કંસેન દેવકીપ્રથમપુત્રવધવર્ણનં નામૈકવિંશોઽધ્યાયઃ ॥ ૪.૨૧॥

## ૪.૨૨ દ્વાવિંશોઽધ્યાયઃ । દેવદાનવાનામંશાવતરણવર્ણનમ્ ।

જનમેજય ઉવાચ ।
કિં કૃતં પાતકં તેન બાલકેન પિતામહ ।
યજ્જાતમાત્રો નિહતસ્તથા તેન દુરાત્મના ॥ ૧॥

નારદોઽપિ મુનિશ્રેષ્ઠો જ્ઞાનવાન્ધર્મતત્પરઃ ।
કથમેવંવિધં પાપં કૃતવાન્બ્રહ્મવિત્તમઃ ॥ ૨॥

કર્તા કારયિતા પાપે તુલ્યપાપૌ સ્મૃતૌ બુધૈઃ ।
સ કથં પ્રેરયામાસ મુનિઃ કંસં ખલં તદા ॥ ૩॥

સંશયોઽયં મહાન્મેઽત્ર બ્રૂહિ સર્વં સવિસ્તરમ્ ।
યેન કર્મવિપાકેન બાલકો નિધનં ગતઃ ॥ ૪॥

વ્યાસ ઉવાચ ।
નારદઃ કૌતુકપ્રેક્ષી સર્વદા કલહપ્રિયઃ ।
દેવકાર્યાર્થમાગત્ય સર્વમેતચ્ચકાર હ ॥ ૫॥

ન મિથ્યાભાષણે બુદ્ધિર્મુનેસ્તસ્ય કદાચન ।
સત્યવક્તા સુરાણાં સ કર્તવ્યે નિરતઃ શુચિઃ ॥ ૬॥

એવં ષડ્ બાલકાસ્તેન જાતા જાતા નિપાતિતાઃ ।

ષડ્ ગર્ભાઃ શાપયોગેન સમ્ભૂય મરણં ગતાઃ ॥ ૭॥

શ‌ૃણુ રાજન્પ્રવક્ષ્યામિ તેષાં શાપસ્ય કારણમ્ ।
સ્વાયમ્ભુવેઽન્તરે પુત્રા મરીચેઃ ષણ્મહાબલાઃ ॥ ૮॥

ઊર્ણાયાં ચૈવ ભાર્યાયામાસન્ધર્મવિચક્ષણાઃ ।
બ્રહ્માણં જહસુર્વીક્ષ્ય સુતાં યભિતુમુદ્યતમ્ ॥ ૯॥

શશાપ તાંસ્તદા બ્રહ્મા દૈત્યયોનિં વિશન્ત્વધઃ ।
કાલનેમિસુતા જાતાસ્તે ષડ્ગર્ભા વિશામ્પતે ॥ ૧૦॥

અવતારે પરે તે તુ હિરણ્યકશિપોઃ સુતાઃ ।
જાતાસ્તે જ્ઞાનસંયુક્તાઃ પૂર્વશાપભયાન્નૃપ ॥ ૧૧॥

તસ્મિઞ્જન્મનિ શાન્તાશ્ચ તપશ્ચક્રુઃ સમાહિતાઃ ।
તેષાં પ્રીતોઽભવદ્ બ્રહ્મા ષડ્ગર્ભાણાં વરાન્દદૌ ॥ ૧૨॥

બ્રહ્મોવાચ ।
શપ્તા યૂયં મયા પૂર્વં ક્રોધયુક્તેન પુત્રકાઃ ।
તુષ્ટોઽસ્મિ વો મહાભાગા બ્રુવન્તુ વાઞ્છિતં વરમ્ ॥ ૧૩॥

વ્યાસ ઉવાચ ।
તે તુ શ્રુત્વા વચસ્તસ્ય બ્રહ્મણઃ પ્રીતમાનસાઃ ।
બ્રહ્માણમબ્રુવન્કામં સર્વે કાર્યાર્થતત્પરાઃ ॥ ૧૪॥

ગર્ભા ઊચુઃ ।
પિતામહાદ્ય તુષ્ટોઽસિ દેહિ નો વાઞ્છિતં વરમ્ ।
અવધ્યા દૈવતૈઃ સર્વૈર્માનવૈશ્ચ મહોરગૈઃ ॥ ૧૫॥

ગન્ધર્વસિદ્ધપતિભિર્વધો માભૂત્પિતામહ ।
વ્યાસ ઉવાચ ।
તાનુવાચ તતો બ્રહ્મા સર્વમેતદ્ભવિષ્યતિ ॥ ૧૬॥

ગચ્છન્તુ વો મહાભાગાઃ સત્યમેવ ન સંશયઃ ।
દત્ત્વા વરં ગતો બ્રહ્મા મુદિતાસ્તે તદાભવન્ ॥ ૧૭॥

હિરણ્યકશિપુઃ ક્રુદ્ધસ્તાનુવાચ કુરૂદ્વહ ।
યસ્માદ્વિહાય માં પુત્રાસ્તોષિતો વૈ પિતામહઃ ॥ ૧૮॥

વરેણ પ્રાર્થિતોઽત્યર્થં બલવન્તો યતોઽભવન્ ।

યુષ્માભિર્હાપિતઃ સ્નેહસ્તતો યુષ્માંસ્ત્યજામ્યહમ્ ॥ ૧૯॥

યૂયં વ્રજન્તુ પાતાલે ષડ્ગર્ભા વિશ્રુતા ભુવિ ।
પાતાલે નિદ્રયાવિષ્ટાસ્તિષ્ઠન્તુ બહુવત્સરાન્ ॥ ૨૦॥

તતસ્તુ દેવકીગર્ભે વર્ષે વર્ષે પુનઃ પુનઃ ।
પિતા વઃ કાલનેમિસ્તુ તત્ર કંસો ભવિષ્યતિ ॥ ૨૧॥

સ એવ જાતમાત્રાન્વો વધિષ્યતિ સુદારુણઃ ।
વ્યાસ ઉવાચ ।
એવં શપ્તાંસ્તદા તેન ગર્ભે જાતાન્પુનઃ પુનઃ ॥ ૨૨॥

જઘાન દેવકીપુત્રાન્ષડ્ગર્ભાઞ્છાપનોદિતઃ ।
શેષાંશઃ સપ્તમસ્તત્ર દેવકીગર્ભસંસ્થિતઃ ॥ ૨૩॥

વિસ્રંસિતશ્ચ ગર્ભોઽસૌ યોગેન યોગમાયયા ।
નીતશ્ચ રોહિણીગર્ભે કૃત્વા સઙ્કર્ષણં બલાત્ ॥ ૨૪॥

પતિતઃ પઞ્ચમે માસિ લોકખ્યાતિં ગતસ્તદા ।
કંસોઽપિ જ્ઞાતવાંસ્તત્ર દેવકીગર્ભપાતનમ્ ॥ ૨૫॥

મુદં પ્રાપ સ દુષ્ટાત્મા શ્રુત્વા વાર્તાં સુખાવહામ્ ।
અષ્ટમે દેવકીગર્ભે ભગવાન્સાત્વતાં પતિઃ ॥ ૨૬॥

ઉવાસ દેવકાર્યાર્થં ભારાવતરણાય ચ ।
રાજોવાચ ।
વસુદેવઃ કશ્યપાંશઃ શેષાંશશ્ચ તદાભવત્ ॥ ૨૭॥

હરેરંશસ્તથા પ્રોક્તો ભવતા મુનિસત્તમ ।
અન્યે ચ યેંઽશા દેવાનાં તત્ર જાતાસ્તુ તાન્વદ ॥ ૨૮॥

ભારાવવતારણાર્થં વૈ ક્ષિતેઃ પ્રાર્થનયાનઘ ।
વ્યાસ ઉવાચ ।
સુરાણામસુરાણાં ચ યે યેંઽશા ભુવિ વિશ્રુતાઃ ॥ ૨૯॥

તાનહં સમ્પ્રવક્ષ્યામિ સઙ્ક્ષેપેણ શૃણુષ્વ તાન્ ।
વસુદેવઃ કશ્યપાંશો દેવકી ચ તથાદિતિઃ ॥ ૩૦॥

બલદેવસ્ત્વનન્તાંશો વર્તમાનેષુ તેષુ ચ ।
યોઽસૌ ધર્મસુતઃ શ્રીમાન્નારાયણ ઇતિ શ્રુતઃ ॥ ૩૧॥

તસ્યાંશો વાસુદેવસ્તુ વિદ્યમાને મુનૌ તદા ।
નરસ્તસ્યાનુજો યસ્તુ તસ્યાંશોઽર્જુન એવ ચ ॥ ૩૨॥

યુધિષ્ઠિરસ્તુ ધર્માંશો વાય્વંશો ભીમ ઇત્યુત ।
અશ્વિન્યંશૌ તતઃ પ્રોક્તૌ માદ્રીપુત્રૌ મહાબલૌ ॥ ૩૩॥

સૂર્યાંશઃ કર્ણ આખ્યાતો ધર્માંશો વિદુરઃ સ્મૃતઃ ।
દ્રોણો બૃહસ્પતેરંશસ્તત્સતસ્તુ શિવાંશજઃ ॥ ૩૪॥

સમુદ્રઃ શન્તનુઃ પ્રોક્તો ગઙ્ગા ભાર્યા મતા બુધૈઃ ।
દેવકસ્તુ સમાખ્યાતો ગન્ધર્વપતિરાગમે ॥ ૩૫॥

વસુર્ભીષ્મો વિરાટસ્તુ મરુદ્ગણ ઇતિ સ્મૃતઃ ।
અરિષ્ટસ્ય સુતો હંસો ધૃતરાષ્ટ્રઃ પ્રકીર્તિતઃ ॥ ૩૬॥

મરુદ્ગણઃ કૃપઃ પ્રોક્તઃ કૃતવર્મા તથાપરઃ ।
દુર્યોધનઃ કલેરંશઃ શકુનિં વિદ્ધિ દ્વાપરમ્ ॥ ૩૭॥

સોમપુત્રઃ સુવર્ચાખ્યઃ સોમપ્રરુરુદાહૃતઃ ।
પાવકાંશો ધૃષ્ટદ્યુમ્નઃ શિખણ્ડી રાક્ષસસ્તથા ॥ ૩૮॥

સનત્કુમારસ્યાંશસ્તુ પ્રદ્યુમ્નઃ પરિકીર્તિતઃ ।
દ્રુપદો વરુણસ્યાંશો દ્રૌપદી ચ રમાંશજા ॥ ૩૯॥

દ્રૌપદીતનયાઃ પઞ્ચ વિશ્વેદેવાંશજાઃ સ્મૃતાઃ ।
કુન્તિઃ સિદ્ધિર્ધૃતિર્માદ્રી મતિર્ગાન્ધારરાજજા ॥ ૪૦॥

કૃષ્ણપત્ન્યસ્તથા સર્વા દેવવારાઙ્ગનાઃ સ્મૃતાઃ ।
રાજાનશ્ચ તથા સર્વે અસુરાઃ શક્રનોદિતાઃ ॥ ૪૧॥

હિરણ્યકશિપોરંશઃ શિશુપાલ ઉદાહૃતઃ ।
વિપ્રચિત્તિર્જરાસન્ધઃ શલ્યઃ પ્રહ્લાદ ઇત્યપિ ॥ ૪૨॥

કાલનેમિસ્તથા કંસઃ કેશી હયશિરાસ્તથા ।
અરિષ્ટો બલિપુત્રસ્તુ કકુદ્મી ગોકુલે હતઃ ॥ ૪૩॥

અનુહ્લાદો ધૃષ્ટકેતુર્ભગદત્તોઽથ બાષ્કલઃ ।
લમ્બઃ પ્રલમ્બઃ સઞ્ચાતઃ ખરોઽસૌ ધેનુકોઽભવત્ ॥ ૪૪॥

વારાહશ્ચ કિશોરશ્ચ દૈત્યૌ પરમદારુણૌ ।
મલ્લૌ તાવેવ સઞ્જાતૌ ખ્યાતૌ ચાણૂરમુષ્ટિકૌ ॥ ૪૫॥

દિતિપુત્રસ્તથારિષ્ટો ગજઃ કુવલયાભિધઃ ।
બલિપુત્રી બકી ખ્યાતા બકસ્તદનુજઃ સ્મૃતઃ ॥ ૪૬॥

યમો રુદ્રસ્તથા કામઃ ક્રોધશ્ચૈવ ચતુર્થકઃ ।
તેષામંશૈસ્તુ સઞ્જાતો દ્રોણપુત્રો મહાબલઃ ॥ ૪૭॥

અંશાવતરણે પૂર્વં દૈતેયા રાક્ષસાસ્તથા ।
જાતાઃ સર્વે સુરાંશાસ્તે ક્ષિતિભારાવતારણે ॥ ૪૮॥

એતેષાં કથિતં રાજન્નંશાવતરણં નૃપ ।
સુરાણાં ચાસુરાણાં ચ પુરાણેષુ પ્રકીર્તિતમ્ ॥ ૪૯॥

યદા બ્રહ્માદયો દેવાઃ પ્રાર્થનાર્થં હરિં ગતાઃ ।
હરિણા ચ તદા દત્તૌ કેશૌ ખલુ સિતાસિતૌ ॥ ૫૦॥

શ્યામવર્ણસ્તતઃ કૃષ્ણઃ શ્વેતઃ સઙ્કર્ષણસ્તથા ।
ભારાવતારણાર્થં તૌ જાતૌ દેવાંશસમ્ભવૌ ॥ ૫૧॥

અંશાવતરણં ચૈતચ્છૃણોતિ ભક્તિભાવતઃ ।
સર્વપાપવિનિર્મુક્તો મોદતે સ્વજનૈર્વૃતઃ ॥ ૫૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે દેવદાનવાનામંશાવતરણવર્ણનં નામ દ્વાવિંશોઽધ્યાયઃ ॥ ૪.૨૨॥

## ૪.૨૩ ત્રયોવિંશોઽધ્યાયઃ । કંસં પ્રતિ યોગમાયાવાક્યમ્ ।

વ્યાસ ઉવાચ ।
હતેષુ ષટ્સુ પુત્રેષુ દેવક્યા ઔગ્રસેનિના ।
સપ્તમે પતિતે ગર્ભે વચનાન્નારદસ્ય ચ ॥ ૧॥

અષ્ટમસ્ય ચ ગર્ભસ્ય રક્ષણાર્થમતન્દ્રિતઃ ।
પ્રયત્નમકરોદ્રાજા મરણં સ્વં વિચિન્તયન્ ॥ ૨॥

સમયે દેવકીગર્ભે પ્રવેશમકરોદ્ધરિઃ ।
અંશેન વસુદેવે તુ સમાગત્ય યથાક્રમમ્ ॥ ૩॥

તદૈવં યોગમાયા ચ યશોદાયાં યથેચ્છયા ।
પ્રવેશમકરોદ્દેવી દેવકાર્યાર્થસિદ્ધયે ॥ ૪॥

રોહિણ્યાસ્તનયો રામો ગોકુલે સમજાયત ।
યતઃ કંસભયોદ્વિગ્ના સંસ્થિતા સા ચ કામિની ॥ ૫॥

કારાગારે તતઃ કંસો દેવકીં દેવસંસ્તુતામ્ ।
સ્થાપયામાસ રક્ષાર્થં સેવકાન્સમકલ્પયત્ ॥ ૬॥

વસુદેવસ્તુ કામિન્યાઃ પ્રેમતન્તુનિયન્ત્રિતઃ ।
પુત્રોત્પત્તિં ચ સઞ્ચિન્ત્ય પ્રવિષ્ટઃ સહ ભાર્યયા ॥ ૭॥

દેવકીગર્ભગો વિષ્ણુર્દેવકાર્યાર્થસિદ્ધયે ।
સંસ્તુતોઽમરસઙ્ઘૈશ્ચ વ્યવર્ધત યથાક્રમમ્ ॥ ૮॥

સઞ્જાતે દશમે તત્ર માસેઽથ શ્રાવણે શુભે ।
પ્રાજાપત્યર્ક્ષસંયુક્તે કૃષ્ણપક્ષેઽષ્ટમીદિને ॥ ૯॥

કંસસ્તુ દાનવાન્સર્વાનુવાચ ભયવિહ્વલઃ ।
રક્ષણીયા ભવદ્ભિશ્ચ દેવકી ગર્ભમન્દિરે ॥ ૧૦॥

અષ્ટમો દેવકીગર્ભઃ શત્રુર્મે પ્રભવિષ્યતિ ।
રક્ષણીયઃ પ્રયત્નેન મૃત્યુરૂપઃ સ બાલકઃ ॥ ૧૧॥

હત્વૈનં બાલકં દૈત્યાઃ સુખં સ્વપ્સ્યામિ મન્દિરે ।
નિવૃત્તિવર્જિતે દુઃખે નાશિતે ચાષ્ટમે સુતે ॥ ૧૨॥

ખડ્ગપ્રાસધરાઃ સર્વે તિષ્ઠન્તુ ધૃતકાર્મુકાઃ ।
નિદ્રાતન્દ્રાવિહીનાશ્ચ સર્વત્ર નિહિતેક્ષણાઃ ॥ ૧૩॥

વ્યાસ ઉવાચ ।
ઇત્યાદિશ્યાસુરગણાન્ કૃશોઽતિભયવિહ્વલઃ ।
મન્દિરં સ્વં જગામાશુ ન લેભે દાનવઃ સુખમ્ ॥ ૧૪॥

નિશીથે દેવકી તત્ર વસુદેવમુવાચ હ ।
કિં કરોમિ મહારાજ પ્રસવાવસરો મમ ॥ ૧૫॥

બહવો રક્ષપાલાશ્ચ તિષ્ઠન્ત્યત્ર ભયાનકાઃ ।
નન્દપત્ન્યા મયા સાર્ધં કૃતોઽસ્તિ સમયઃ પુરા ॥ ૧૬॥

પ્રેષિતવ્યસ્ત્વયા પુત્રો મન્દિરે મમ માનિનિ ।
પાલયિષ્યામ્યહં તત્ર તવાતિમનસા કિલ ॥ ૧૭॥

અપત્યં તે પ્રદાસ્યામિ કંસસ્ય પ્રત્યયાય વૈ ।

કિં કર્તવ્યં પ્રભો ચાત્ર વિષમે સમુપસ્થિતે ॥ ૧૮॥

વ્યત્યયઃ સન્તતેઃ શૌરે કથં કર્તું ક્ષમો ભવેઃ ।
દૂરે તિષ્ઠસ્વ કાન્તાદ્ય લજ્જા મેઽતિદુરત્યયા ॥ ૧૯॥

પરાવૃત્ય મુખં સ્વામિન્નન્યથા કિં કરોમ્યહમ્ ।
ઇત્યુક્ત્વા તં મહાભાગં દેવકી દેવસમ્મતમ્ ॥ ૨૦॥

બાલકં સુષુવે તત્ર નિશીથે પરમાદ્ભુતમ્ ।
તં દૃષ્ટ્વા વિસ્મયં પ્રાપ દેવકી બાલકં શુભમ્ ॥ ૨૧॥

પતિં પ્રાહ મહાભાગા હર્ષોત્ફુલ્લકલેવરા ।
પશ્ય પુત્રમુખં કાન્ત દુર્લભં હિ તવ પ્રભો ॥ ૨૨॥

અદ્યૈનં કાલરૂપોઽસૌ ઘાતયિષ્યતિ ભ્રાતૃજઃ ।
વસુદેવસ્તથેત્યુક્ત્વા તમાદાય કરે સુતમ્ ॥ ૨૩॥

અપશ્યચ્ચાનનં તસ્ય સુતસ્યાદ્ભુતકર્મણઃ ।
વીક્ષ્ય પુત્રમુખં શૌરિશ્ચિન્તાવિષ્ટો બભૂવ હ ॥ ૨૪॥

કિં કરોમિ કથં ન સ્યાદ્દુઃખમસ્ય કૃતે મમ ।
એવં ચિન્તાતુરે તસ્મિન્વાગુવાચાશરીરિણી ॥ ૨૫॥

વસુદેવં સમાભાષ્ય ગગને વિશદાક્ષરા ।
વસુદેવ ગૃહીત્વૈનં ગોકુલં નય સત્વરઃ ॥ ૨૬॥

રક્ષપાલાસ્તથા સર્વે મયા નિદ્રાવિમોહિતાઃ ।
વિવૃતાનિ કૃતાન્યષ્ટ કપાટાનિ ચ શ ृ ङ्खલાઃ ॥ ૨૭॥

મુક્ત્વૈનં નન્દગેહે ત્વં યોગમાયાં સમાનય ।
શ્રુત્વૈવં વસુદેવસ્તુ તસ્મિન્કારાગૃહે ગતઃ ॥ ૨૮॥

વિવૃતં દ્વારમાલોક્ય બભૂવ તરસા નૃપ ।
તમાદાય યયાવાશુ દ્વારપાલૈરલક્ષિતઃ ॥ ૨૯॥

કાલિન્દીતટમાસાદ્ય પૂરં દૃષ્ટ્વા સુનિશ્ચિતમ્ ।
તદૈવ કટિદઘ્ની સા બભૂવાશુ સરિદ્વરા ॥ ૩૦॥

યોગમાયાપ્રભાવેણ તતારાનકદુન્દુભિઃ ।
ગત્વા તુ ગોકુલં શૌરિર્નિશીથે નિર્જને પથિ ॥ ૩૧॥

નન્દદ્વારે સ્થિતઃ પશ્યન્વિભૂતિં પશુસંજ્ઞિતામ્ ।
તદૈવ તત્ર સઞ્જાતા યશોદા ગર્ભસમ્ભવા ॥ ૩૨॥

યોગમાયાંશજા દેવી ત્રિગુણા દિવ્યરૂપિણી ।
જાતાં તાં બાલિકાં દિવ્યાં ગૃહીત્વા કરપઙ્કજે ॥ ૩૩॥

તત્રાગત્ય દદૌ દેવી સૈરન્ધ્રીરૂપધારિણી ।
વસુદેવઃ સુતં દત્ત્વા સૈરન્ધ્રીકરપઙ્કજે ॥ ૩૪॥

તામાદાય યયૌ શીઘ્રં બાલિકાં મુદિતાશયઃ ।
કારાગારે તતો ગત્વા દેવક્યાઃ શયને સુતામ્ ॥ ૩૫॥

નિઃક્ષિપ્ય સંસ્થિતઃ પાર્શ્વે ચિન્તાવિષ્ટો ભયાતુરઃ ।
રુરોદ સુસ્વરં કન્યા તદૈવાગતસંજ્ઞકાઃ ॥ ૩૬॥

ઉત્તસ્થુઃ સેવકા રાજ્ઞઃ શ્રુત્વા તદ્રુદિતં નિશિ ।
તમૂચુર્ભૂપતિં ગત્વા ત્વરિતાસ્તેઽતિવિહ્વલાઃ ॥ ૩૭॥

દેવક્યાશ્ચ સુતો જાતઃ શીઘ્રમેહિ મહામતે ।
તદાકર્ણ્ય વચસ્તેષાં શીઘ્રં ભોજપતિર્યયૌ ॥ ૩૮॥

પ્રાવૃતં દ્વારમાલોક્ય વસુદેવમથાહ્વયત્ ।
કંસ ઉવાચ ।
સુતમાનય દેવક્યા વસુદેવ મહામતે ॥ ૩૯॥

મૃત્યુર્મે ચાષ્ટમો ગર્ભસ્તન્નિહન્મિ રિપું હરિમ્ ।
વ્યાસ ઉવાચ ।
શ્રુત્વા કંસવચઃ શૌરિર્ભયત્રસ્તવિલોચનઃ ॥ ૪૦॥

તામાદાય સુતાં પાણૌ દદૌ ચાશુ રુદન્નિવ ।
દૃષ્ટ્વાથ દારિકાં રાજા વિસ્મયં પરમં ગતઃ ॥ ૪૧॥

દેવવાણી વૃથા જાતા નારદસ્ય ચ ભાષિતમ્ ।
વસુદેવઃ કથં કુર્યાદનૃતં સઙ્કટે સ્થિતઃ ॥ ૪૨॥

રક્ષપાલાશ્ચ મે સર્વે સાવધાના ન સંશયઃ ।
કુતોઽત્ર કન્યકા કામં ક્વ ગતઃ સ સુતઃ કિલ ॥ ૪૩॥

સન્દેહોઽત્ર ન કર્તવ્યઃ કાલસ્ય વિષમા ગતિઃ ।
ઇતિ સઞ્ચિન્ત્ય તાં બાલાં ગૃહીત્વા પાદયોઃ ખલઃ ॥ ૪૪॥

પોથયામાસ પાષાણે નિર્ઘૃણઃ કુલપાંસનઃ ।
સા કરાન્નિઃસૃતા બાલા યયાવાકાશમણ્ડલમ્ ॥ ૪૫॥

દિવ્યરૂપા તદા ભૂત્વા તમુવાચ મૃદુસ્વના ।
કિં મયા હતયા પાપ જાતસ્તે બલવાન્ રિપુઃ ॥ ૪૬॥

હનિષ્યતિ દુરારાધ્યઃ સર્વથા ત્વાં નરાધમમ્ ।
ઇત્યુક્ત્વા સા ગતા કન્યા ગગનં કામગા શિવા ॥ ૪૭॥

કંસસ્તુ વિસ્મયાવિષ્ટો ગતો નિજગૃહં તદા ।
આનાય્ય દાનવાન્સર્વાનિદં વચનમબ્રવીત્ ॥ ૪૮॥

બકધેનુકવત્સાદીન્ક્રોધાવિષ્ટો ભયાતુરઃ ।
ગચ્છન્તુ દાનવાઃ સર્વે મમ કાર્યાર્થસિદ્ધયે ॥ ૪૯॥

જાતમાત્રાશ્ચ હન્તવ્યા બાલકા યત્ર કુત્રચિત્ ।
પૂતનૈષા વ્રજત્વદ્ય બાલઘ્ની નન્દગોકુલમ્ ॥ ૫૦॥

જાતમાત્રાન્વિનિઘ્નન્તી શિશૂંસ્તત્ર મમાજ્ઞયા ।
ધેનુકો વત્સકઃ કેશી પ્રલમ્બો બક એવ ચ ॥ ૫૧॥

સર્વે તિષ્ઠન્તુ તત્રૈવ મમ કાર્યચિકીર્ષયા ।
ઇત્યાજ્ઞાપ્યાસુરાન્કંસો યયૌ નિજગૃહં ખલઃ ॥ ૫૨॥

ચિન્તાવિષ્ટોઽતિદીનાત્મા ચિન્તયિત્વૈવ તં પુનઃ ॥ ૫૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે કંસં પ્રતિ યોગમાયાવાક્યં નામ ત્રયોવિંશોઽધ્યાયઃ ॥ ૪.૨૩॥

## ૪.૨૪ ચતુર્વિંશોઽધ્યાયઃ । દેવ્યા કૃષ્ણશોકાયનોદનમ્ ।

વ્યાસ ઉવાચ ।
પ્રાતર્નન્દગૃહે જાતઃ પુત્રજન્મમહોત્સવઃ ।
કિંવદન્ત્યથ કંસેન શ્રુતા ચારમુખાદપિ ॥ ૧॥

જાનાતિ વસુદેવસ્ય દારાસ્તત્ર વસન્તિ હિ ।
પશવો દાસવર્ગશ્ચ સર્વે તે નન્દગોકુલે ॥ ૨॥

તેન શઙ્કાસમાવિષ્ટો ગોકુલં પ્રતિ ભારત ।
નારદેનાપિ તત્સર્વં કથિતં કારણં પુરા ॥ ૩॥

ગોકુલે યે ચ નન્દાદ્યાસ્તત્પત્ન્યશ્ચ સુરાંશજાઃ ।
દેવકીવસુદેવાદ્યાઃ સર્વે તે શત્રવઃ કિલ ॥ ૪॥

ઇતિ નારદવાક્યેન બોધિતોઽસૌ કુલાધમઃ ।
જાતઃ કોપમના રાજન્ કંસઃ પરમપાપકૃત્ ॥ ૫॥

પૂતના નિહતા તત્ર કૃષ્ણેનામિતતેજસા ।
બકો વત્સાસુરશ્ચાપિ ધેનુકશ્ચ મહાબલઃ ॥ ૬॥

પ્રલમ્બો નિહતસ્તેન તથા ગોવર્ધનો ધૃતઃ ।
શ્રુત્વૈતત્કર્મ કંસસ્તુ મેને મરણમાત્મનઃ ॥ ૭॥

તથા વિનિહતઃ કેશી જ્ઞાત્વા કંસોઽતિદુર્મનાઃ ।
ધનુર્યાગમિષેણાશુ તાવાનેતું પ્રચક્રમે ॥ ૮॥

અક્રૂરં પ્રેષયામાસ ક્રૂરઃ પાપમતિસ્તદા ।
આનેતું રામકૃષ્ણૌ ચ વધાયામિતવિક્રમૌ ॥ ૯॥

રથમારોપ્ય ગોપાલૌ ગોકુલાદ્ ગાન્દિનીસુતઃ ।
આગતો મથુરાયાં તુ કંસાદેશે સ્થિતઃ કિલ ॥ ૧૦॥

તાવાગત્ય તદા તત્ર ધનુર્ભઙ્ગઞ્ચ ચક્રતુઃ ।
હત્વાથ રજકં કામં ગજં ચાણૂરમુષ્ટિકમ્ ॥ ૧૧॥

શલં ચ તોશલં ચૈવ નિજઘાન હરિસ્તદા ।
જઘાન કંસં દેવેશઃ કેશેષ્વાકૃષ્ય લીલયા ॥ ૧૨॥

પિતરૌ મોચયિત્વાથ ગતદુઃખૌ ચકાર હ ।
ઉગ્રસેનાય રાજ્યં તદ્દાવરિનિષૂદનઃ ॥ ૧૩॥

વસુદેવસ્તયોસ્તત્ર મૌઞ્જીબન્ધનપૂર્વકમ્ ।
કારયામાસ વિધિવદ્ વ્રતબન્ધં મહામનાઃ ॥ ૧૪॥

ઉપનીતૌ તદા તૌ તુ ગતૌ સાન્દીપનાલયમ્ ।
વિદ્યાઃ સર્વાઃ સમભ્યસ્ય મથુરામાગતૌ પુનઃ ॥ ૧૫॥

જાતૌ દ્વાદશવર્ષીયૌ કૃતવિદ્યૌ મહાબલૌ ।
મથુરાયાં સ્થિતૌ વીરૌ સુતાવાનકદુન્દુભેઃ ॥ ૧૬॥

માગધસ્તુ જરાસન્ધો જામાતૃવધદુઃખિતઃ ।

કૃત્વા સૈન્યસમાજં સ મથુરામાગતઃ પુરીમ્ ॥ ૧૭॥

સ સપ્તદશવારં તુ કૃષ્ણેન કૃતબુદ્ધિના ।
જિતઃ સઙ્ગ્રામમાસાદ્ય મધુપુર્યાં નિવાસિના ॥ ૧૮॥

પશ્ચાચ્ચ પ્રેરિતસ્તેન સ કાલયવનાભિધઃ ।
સર્વમ્લેચ્છાધિપઃ શૂરો યાદવાનાં ભયઙ્કરઃ ॥ ૧૯॥

શ્રુત્વા યવનમાયાન્તં કૃષ્ણઃ સર્વાન્ યદૂત્તમાન્ ।
આનાય્ય ચ તથા રામમુવાચ મધુસૂદનઃ ॥ ૨૦॥

ભયં નોઽત્ર સમુત્પન્નં જરાસન્ધાન્મહાબલાત્ ।
કિં કર્તવ્યં મહાભાગ યવનઃ સમુપૈતિ વૈ ॥ ૨૧॥

પ્રાણત્રાણં પ્રકર્તવ્યં ત્યક્ત્વા ગેહં બલં ધનમ્ ।
સુખેન સ્થીયતે યત્ર સ દેશઃ ખલુ પૈતૃકઃ ॥ ૨૨॥

સદોદ્વેગકરઃ કામં કિં કર્તવ્યઃ કુલોચિતઃ ।
શૈલસાગરસાન્નિધ્યે સ્થાતવ્યં સુખમિચ્છતા ॥ ૨૩॥

યત્ર વૈરિભયં ન સ્યાત્સ્થાતવ્યં તત્ર પણ્ડિતૈઃ ।
શેષશય્યાં સમાશ્રિત્ય હરિઃ સ્વપિતિ સાગરે ॥ ૨૪॥

તથૈવ ચ ભયાદ્ભીતઃ કૈલાસે ત્રિપુરાર્દનઃ ।
તસ્માન્નાત્રૈવ સ્થાતવ્યમસ્માભિઃ શત્રુતાપિતૈઃ ॥ ૨૫॥

દ્વારવત્યાં ગમિષ્યામઃ સહિતાઃ સર્વ એવ વૈ ।
કથિતા ગરુડેનાદ્ય રમ્યા દ્વારવતી પુરી ॥ ૨૬॥

રૈવતાચલસાનિધ્યે સિન્ધુકૂલે મનોહરા ।
વ્યાસ ઉવાચ ।
તચ્છ્રુત્વા વચનં તથ્યં સર્વે યાદવપુઙ્ગવાઃ ॥ ૨૭॥

ગમનાય મતિં ચક્રુઃ સકુટુમ્બાઃ સવાહનાઃ ।
શકટાનિ તથોષ્ટ્રાશ્ચ વામ્યશ્ચ મહિષાસ્તથા ॥ ૨૮॥

ધનપૂર્ણાનિ કૃત્વા તે નિર્યયુર્નગરાદ્બહિઃ ।
રામકૃષ્ણૌ પુરસ્કૃત્ય સર્વે તે સપરિચ્છદાઃ ॥ ૨૯॥

અગ્રે કૃત્વા પ્રજાઃ સર્વાશ્ચેલુઃ સર્વે યદૂત્તમાઃ ।
કતિચિદ્દિવસૈઃ પ્રાપુઃ પુરીં દ્વારવતીં કિલ ॥ ૩૦॥

શિલ્પિભિઃ કારયામાસ જીર્ણોદ્ધારં હિ માધવઃ ।
સંસ્થાપ્ય યાદવાંસ્તત્ર તાવેતૌ બલકેશવૌ ॥ ૩૧॥

તરસા મથુરામેત્ય સંસ્થિતૌ નિર્જનાં પુરીમ્ ।
તદા તત્રૈવ સમ્પ્રાપ્તો બલવાન્ યવનાધિપઃ ॥ ૩૨॥

જ્ઞાત્વૈનમાગતં કૃષ્ણો નિર્યયૌ નગરાદ્બહિઃ ।
પદાતિરગ્રે તસ્યાભૂદ્યવનસ્ય જનાર્દનઃ ॥ ૩૩॥

પીતામ્બરધરઃ શ્રીમાન્પ્રાહસન્મધુસૂદનઃ ।
તં દૃષ્ટ્વા પુરતો યાન્તં કૃષ્ણં કમલલોચનમ્ ॥ ૩૪॥

યવનોઽપિ પદાતિઃ સન્પૃષ્ઠતોઽનુગતઃ ખલઃ ।
પ્રસુપ્તો યત્ર રાજર્ષિર્મુચુકુન્દો મહાબલઃ ॥ ૩૫॥

પ્રયયૌ ભગવાંસ્તત્ર સકાલયવનો હરિઃ ।
તત્રૈવાન્તર્દધે વિષ્ણુર્મુચુકુન્દં સમીક્ષ્ય ચ ॥ ૩૬॥

તત્રૈવ યવનઃ પ્રાપ્તઃ સુપ્તભૂતમપશ્યત ।
મત્વા તં વાસુદેવં સ પાદેનાતાડયન્નૃપમ્ ॥ ૩૭॥

પ્રબુદ્ધઃ ક્રોધરક્તાક્ષસ્તં દદાહ મહાબલઃ ।
તં દગ્ધ્વા મુચુકુન્દોઽથ દદર્શ કમલેક્ષણમ્ ॥ ૩૮॥

વાસુદેવં સુદેવેશં પ્રણમ્ય પ્રસ્થિતો વનમ્ ।
જગામ દ્વારકાં કૃષ્ણો બલદેવસમન્વિતઃ ॥ ૩૯॥

ઉગ્રસેનં નૃપં કૃત્વા વિજહાર યથારુચિ ।
અહરદ્રુક્મિણી કામં શિશુપાલસ્વયંવરાત્ ॥ ૪૦॥

રાક્ષસેન વિવાહેન ચક્રે દારવિધિં હરિઃ ।
તતો જામ્બવતીં સત્યાં મિત્રવિન્દાઞ્ચ ભામિનીમ્ ॥ ૪૧॥

કાલિન્દીં લક્ષણાં ભદ્રાં તથા નાગ્નજિતીં શુભામ્ ।
પૃથક્પૃથક્સમાનીયાપ્યુપયેમે જનાર્દનઃ ॥ ૪૨॥

અષ્ટાવેવ મહીપાલ પત્ન્યઃ પરમશોભનાઃ ।
પ્રાસૂત રુક્મિણી પુત્રં પ્રદ્યુમ્નં ચારુદર્શનમ્ ॥ ૪૩॥

જાતકર્માદિકં તસ્ય ચકાર મધુસૂદનઃ ।

હૃતોઽસૌ સૂતિકાગેહાચ્છમ્બરેણ બલીયસા ॥ ૪૪॥

નીતશ્ચ સ્વપુરીં બાલો માયાવત્યૈ સમર્પિતઃ ।
વાસુદેવો હૃતં દૃષ્ટ્વા પુત્રં શોકસમન્વિતઃ ॥ ૪૫॥

જગામ શરણં દેવીં ભક્તિયુક્તેન ચેતસા ।
વૃત્રાસુરાદયો દૈત્યા લીલયૈવ યયા હતાઃ ॥ ૪૬॥

તતોઽસૌ યોગમાયાયાશ્ચકાર પરમાં સ્મૃતિમ્ ।
વચોભિઃ પરમોદારૈરક્ષરૈઃ સ્તવનૈઃ શુભૈઃ ॥ ૪૭॥

શ્રીકૃષ્ણ ઉવાચ ।
માતર્મયાતિતપસા પરિતોષિતા ત્વં
પ્રાગ્જન્મનિ પ્રસુમનાદિભિરર્ચિતાસિ ।
ધર્માત્મજેન બદરીવનખણ્ડમધ્યે
કિં વિસ્મૃતો જનનિ તે ત્વયિ ભક્તિભાવઃ ॥ ૪૮॥

સૂતીગૃહાદપહૃતઃ કિમુ બાલકો મે
કેનાપિ દુષ્ટમનસાપ્યથ કૌતુકાદ્વા ।
માનાપહારકરણાય મમાદ્ય નૂનં
લજ્જા તવામ્બ ખલુ ભક્તજનસ્ય યુક્તા ॥ ૪૯॥

દુર્ગો મહાનતિતરાં નગરી સુગુપ્તા
તત્રાપિ મેઽસ્તિ સદનં કિલ મધ્યભાગે ।
અન્તઃપુરે ચ પિહિતં નનુ સૂતિગેહં
બાલો હૃતઃ ખલુ તથાપિ મમૈવ દોષાત્ ॥ ૫૦॥

નાહં ગતઃ પરપુરં ન ચ યાદવાશ્ચ
રક્ષાવતીવ નગરી કિલ વીરવર્યૈઃ ।
માયા તવૈવ જનનિ પ્રકટપ્રભાવા
મે બાલકઃ પરિહૃતઃ કુહકેન કેન ॥ ૫૧॥

નો વેદ્મ્યહં જનનિ તે ચરિતં સુગુપ્તં
કો વેદ મન્દમતિરલ્પવિદેવ દેહી ।
ક્વાસૌ ગતો મમ ભટૈર્ન ચ વીક્ષિતો વા
હર્તામ્બિકે જવનિકા તવ કલ્પિતેયમ્ ॥ ૫૨॥

ચિત્રં ન તેઽત્ર પુરતો મમ માતૃગર્ભો

નીતસ્ત્વયાર્ધસમયે કિલ માયયાસૌ ।
યં રોહિણી હલધરં સુષુવે પ્રસિદ્ધં
દૂરે સ્થિતા પતિપરા મિથુનં વિનાપિ ॥ ૫૩॥

સૃષ્ટિં કરોષિ જગતામનુપાલનં ચ
નાશં તથૈવ પુનરપ્યનિશં ગુણૈસ્ત્વમ્ ।
કો વેદ તેઽમ્બ ચરિતં દુરિતાન્તકારિ
પ્રાયેણ સર્વમખિલં વિહિતં ત્વયૈતત્ ॥ ૫૪॥

ઉત્પાદ્ય પુત્રજનનપ્રભવં પ્રમોદં
દત્ત્વા પુનર્વિરહજં કિલ દુઃખભારમ્ ।
ત્વં ક્રીડસે સુલલિતૈઃ ખલુ તૈર્વિહારૈ-
ર્નો ચેત્કથં મમ સુતાપ્તિરતિર્વૃથા સ્યાત્ ॥ ૫૫॥

માતાસ્ય રોદિતિ ભૃશં કુરરીવ બાલા
દુઃખં તનોતિ મમ સન્નિધિગા સદૈવ ।
કષ્ટં ન વેત્સિ લલિતેઽપ્રમિતપ્રભાવે
માતસ્ત્વમેવ શરણં ભવપીડિતાનામ્ ॥ ૫૬॥

સીમા સુખસ્ય સુતજન્મ તદીયનાશો
દુઃખસ્ય દેવિ ભવને વિબુધા વદન્તિ ।
તત્કિં કરોમિ જનનિ પ્રથમે પ્રનષ્ટે
પુત્રે મમાદ્ય હૃદયં સ્ફુટતીવ માતઃ ॥ ૫૭॥

યજ્ઞં કરોમિ તવ તુષ્ટિકરં વ્રતં વા
દૈવં ચ પૂજનમથાખિલદુઃખહા ત્વમ્ ।
માતઃ સુતોઽત્ર યદિ જીવતિ દર્શયાશુ
ત્વં વૈ ક્ષમા સકલશોકવિનાશનાય ॥ ૫૮॥

વ્યાસ ઉવાચ ।
એવં સ્તુતા તદા દેવી કૃષ્ણેનાક્લિષ્ટકર્મણા ।
પ્રત્યક્ષદર્શના ભૂત્વા તમુવાચ જગદ્ગુરુમ્ ॥ ૫૯॥

શ્રીદેવ્યુવાચ ।
શોકં મા કુરુ દેવેશ શાપોઽયં તે પુરાતનઃ ।
તસ્ય યોગેન પુત્રસ્તે શમ્બરેણ હૃતો બલાત્ ॥ ૬૦॥

અતસ્તે ષોડશે વર્ષે હત્વા તં શમ્બરં બલાત્ ।
આગમિષ્યતિ પુત્રસ્તે મત્પ્રસાદાન્ન સંશયઃ ॥ ૬૧॥

વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વાન્તર્દધે દેવી ચણ્ડિકા ચણ્ડવિક્રમા ।
ભગવાનપિ પુત્રસ્ય શોકં ત્યક્ત્વાભવત્સુખી ॥ ૬૨॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે દેવ્યા કૃષ્ણશોકાપનોદનં નામ ચતુર્વિંશોઽધ્યાયઃ ॥ ૪.૨૪॥

## ૪.૨૫ પઞ્ચવિંશોઽધ્યાયઃ । પરાશક્તેઃ સર્વજ્ઞત્વકથનમ્ ।

રાજોવાચ ।
સન્દેહો મે મુનિશ્રેષ્ઠ જાયતે વચનાત્તવ ।
વૈષ્ણવાંશે ભગવતિ દુઃખોત્પત્તિં વિલોક્ય ચ ॥ ૧॥

નારાયણાંશસમ્ભૂતો વાસુદેવઃ પ્રતાપવાન્ ।
કથં સ સૂતિકાગારાદ્ધૃતો બાલો હરેરપિ ॥ ૨॥

સુગુપ્તનગરે રમ્યે ગુપ્તેઽથ સૂતિકાગૃહે ।
પ્રવિશ્ય તેન દૈત્યેન ગૃહીતોઽસૌ કથં શિશુઃ ॥ ૩॥

ન જ્ઞાતો વાસુદેવેન ચિત્રમેતન્મમાદ્ભુતમ્ ।
જાયતે મહદાશ્ચર્યં ચિત્તે સત્યવતીસુત ॥ ૪॥

બ્રૂહિ તત્કારણં બ્રહ્મન્ન જ્ઞાતં કેશવેન યત્ ।
હરણં તત્રસંસ્થેન શિશોર્વા સૂતિકાગૃહાત્ ॥ ૫॥

વ્યાસ ઉવાચ ।
માયા બલવતી રાજન્નરાણાં બુદ્ધિમોહિની ।
શામ્ભવી વિશ્રુતા લોકે કો વા મોહં ન ગચ્છતિ ॥ ૬॥

માનુષં જન્મ સમ્પ્રાપ્ય ગુણાઃ સર્વેઽપિ માનુષાઃ ।
ભવન્તિ દેહજા કામં ન દેવા નાસુરાસ્તદા ॥ ૭॥

ક્ષુત્તૃણ્નિદ્રા ભયં તન્દ્રા વ્યામોહઃ શોકસંશયઃ ।
હર્ષશ્ચૈવાભિમાનશ્ચ જરામરણમેવ ચ ॥ ૮॥

અજ્ઞાનં ગ્લાનિરપ્રીતિરીર્ષ્યાસૂયા મદઃ શ્રમઃ ।

એતે દેહભવા ભાવાઃ પ્રભવન્તિ નરાધિપ ॥ ૯॥

યથા હેમમૃગં રામો ન બુબોધ પુરોગતમ્ ।
જાનક્યા હરણઞ્ચૈવ જટાયુમરણં તથા ॥ ૧૦॥

અભિષેકદિને રામો વનવાસં ન વેદ ચ ।
તથા ન જ્ઞાતવાન્ રામઃ સ્વશોકાન્મરણં પિતુઃ ॥ ૧૧॥

અજ્ઞવદ્વિચચારાસૌ પશ્યમાનો વને વને ।
જાનકીં ન વિવેદાથ રાવણેન હૃતાં બલાત્ ॥ ૧૨॥

સહાયાન્ વાનરાન્કૃત્વા હત્વા શક્રસુતં બલાત્ ।
સાગરે સેતુબન્ધઞ્ચ કૃત્વોત્તીર્ય સરિત્પતિમ્ ॥ ૧૩॥

પ્રેષયામાસ સર્વાસુ દિક્ષુ તાન્કપિકુઞ્જરાન્ ।
સઙ્ગ્રામં કૃતવાન્ઘોરં દુઃખં પ્રાપ રણાજિરે ॥ ૧૪॥

બન્ધનં નાગપાશેન પ્રાપ રામો મહાબલઃ ।
ગરુડાન્મોક્ષણં પશ્ચાદન્વભૂદ્રઘુનન્દનઃ ॥ ૧૫॥

અહનદ્રાવણં સઙ્ખ્યે કુમ્ભકર્ણં મહાબલમ્ ।
મેઘનાદં નિકુમ્ભઞ્ચ કુપિતો રઘુનન્દનઃ ॥ ૧૬॥

અદૂષ્યત્વઞ્ચ જાનક્યા ન વિવેદ જનાર્દનઃ ।
દિવ્યઞ્ચ કારયામાસ જ્વલિતેઽગ્નૌ પ્રવેશનમ્ ॥ ૧૭॥

લોકાપવાદાચ્ચ પરં તતસ્તત્યાજ તાં પ્રિયામ્ ।
અદૂષ્યાં દૂષિતાં મત્વા સીતાં દશરથાત્મજઃ ॥ ૧૮॥

ન જ્ઞાતૌ સ્વસુતૌ તેન રામેણ ચ કુશીલવૌ ।
મુનિના કથિતૌ તૌ તુ તસ્ય પુત્રૌ મહાબલૌ ॥ ૧૯॥

પાતાલગમનં ચૈવ જાનક્યા જ્ઞાતવાન્ન ચ ।
રાઘવઃ કોપસંયુક્તો ભ્રાતરં હન્તુમુદ્યતઃ ॥ ૨૦॥

કાલસ્યાગમનઞ્ચૈવ ન વિવેદ ખરાન્તકઃ ।
માનુષં દેહમાશ્રિત્ય ચક્રે માનુષચેષ્ટિતમ્ ॥ ૨૧॥

તથૈવ માનુષાન્ભાવાન્નાત્ર કાર્યા વિચારણા ।
પૂર્વં કંસભયાત્પ્રાપ્તો ગોકુલે યદુનન્દનઃ ॥ ૨૨॥

જરાસન્ધભયાત્પશ્ચાદ્ દ્વારવત્યાં ગતો હરિઃ ।
અધર્મં કૃતવાન્કૃષ્ણો રુક્મિણ્યા હરણઞ્ચ યત્ ॥ ૨૩॥

શિશુપાલવૃતાયાશ્ચ જાનન્ધર્મં સનાતનમ્ ।
શુશોચ બાલકં કૃષ્ણઃ શમ્બરેણ હૃતં બલાત્ ॥ ૨૪॥

મુમોદ જાનન્પુત્રં તં હર્ષશોકયુતસ્તતઃ ।
સત્યભામાજ્ઞયા યત્તુ યુયુધે સ્વર્ગતઃ કિલ ॥ ૨૫॥

ઇન્દ્રેણ પાદપાર્થં તુ સ્ત્રીજિતત્વં પ્રકાશયન્ ।
જહાર કલ્પવૃક્ષં યઃ પરાભૂય શતક્રતુમ્ ॥ ૨૬॥

માનિનીમાનરક્ષાર્થં હરિશ્ચિત્રધરઃ પ્રભુઃ ।
બદ્ધ્વા વૃક્ષે હરિં સત્યા નારદાય દદૌ પતિમ્ ॥ ૨૭॥

દત્ત્વાથ કાનકં કૃષ્ણં મોચયામાસ ભામિની ।
દૃષ્ટ્વા પુત્રાન્પુરુગુણાન્પ્રદ્યુમ્નપ્રમુખાનથ ॥ ૨૮॥

કૃષ્ણં જામ્બવતી દીના યયાચે સન્તતિં શુભામ્ ।
સ યયૌ પર્વતં કૃષ્ણસ્તપસ્યાકૃતનિશ્ચયઃ ॥ ૨૯॥

ઉપમન્યુર્મુનિર્યત્ર શિવભક્તઃ પરન્તપઃ ।
ઉપમન્યું ગુરું કૃત્વા દીક્ષાં પાશુપતો હરિઃ ॥ ૩૦॥

જગ્રાહ પુત્રકામસ્તુ મુણ્ડી દણ્ડી બભૂવ હ ।
ઉગ્રં તત્ર તપસ્તેપે માસમેકં ફલાશનઃ ॥ ૩૧॥

જજાપ શિવમન્ત્રં તુ શિવધ્યાનપરો હરિઃ ।
દ્વિતીયે તુ જલાહારસ્તિષ્ઠન્નેકપદા હરિઃ ॥ ૩૨॥

તૃતીયે વાયુભક્ષસ્તુ પાદાઙ્ગુષ્ઠાગ્રસંસ્થિતઃ ।
ષષ્ઠે તુ ભગવાન્ રુદ્રઃ પ્રસન્નો ભક્તિભાવતઃ ॥ ૩૩॥

દર્શનઞ્ચ દદૌ તત્ર સોમઃ સોમકલાધરઃ ।
આજગામ વૃષારૂઢઃ સુરૈરિન્દ્રાદિભિર્ભૃતઃ ॥ ૩૪॥

બ્રહ્મવિષ્ણુયુતઃ સાક્ષાદ્યક્ષગન્ધર્વસેવિતઃ ।
સમ્બોધયન્વાસુદેવં શઙ્કરસ્તમુવાચ હ ॥ ૩૫॥

તુષ્ટોઽસ્મિ કૃષ્ણ તપસા તવોગ્રેણ મહામતે ।
દદામિ વાઞ્છિતાન્કામાન્બ્રૂહિ યાદવનન્દન ॥ ૩૬॥

મયિ દૃષ્ટે કામપૂરે કામશેષો ન સમ્ભવેત્ ।
વ્યાસ ઉવાચ ।
તં દૃષ્ટ્વા શઙ્કરં તુષ્ટં ભગવાન્દેવકીસુતઃ ॥ ૩૭॥

પપાત પાદયોસ્તસ્ય દણ્ડવત્પ્રેમસંયુતઃ ।
સ્તુતિં ચકાર દેવેશો મેઘગમ્ભીરયા ગિરા ॥ ૩૮॥

સ્થિતસ્તુ પુરતઃ શમ્ભોર્વાસુદેવઃ સનાતનઃ ।
શ્રીકૃષ્ણ ઉવાચ ।
દેવદેવ જગન્નાથ સર્વભૂતાર્તિનાશન ॥ ૩૯॥

વિશ્વયોને સુરારિઘ્ન નમસ્ત્રૈલોક્યકારક ।
નીલકણ્ઠ નમસ્તુભ્યં શૂલિને તે નમો નમઃ ॥ ૪૦॥

શૈલજાવલ્લભાયાશ્ચ યજ્ઞઘ્નાય નમોઽસ્તુ તે ।
ધન્યોઽહં કૃતકૃત્યોઽહં દર્શનાત્તવ સુવ્રત ॥ ૪૧॥

જન્મ મે સફલં જાતં નત્વા તે પાદપઙ્કજમ્ ।
બદ્ધોઽહં સ્ત્રીમયૈઃ પાશૈઃ સંસારેઽસ્મિઞ્જગદ્ગુરો ॥ ૪૨॥

શરણં તેઽદ્ય સમ્પ્રાપ્તો રક્ષણાર્થં ત્રિલોચન ।
સમ્પ્રાપ્ય માનુષં જન્મ ખિન્નોઽહં દુઃખનાશન ॥ ૪૩॥

ત્રાહિ માં શરણં પ્રાપ્તં ભવભીતં ભવાધુના ।
ગર્ભવાસે મહદ્દુઃખં પ્રાપ્તં મદનદાહક ॥ ૪૪॥

જન્મતઃ કંસભયજમનુભૂતં ચ ગોકુલે ।
જાતોઽહં નન્દગોપાલો બલ્લવાજ્ઞાકરસ્તથા ॥ ૪૫॥

ગોરજઃકીર્ણકેશસ્તુ ભ્રમન્વૃન્દાવને ઘને ।
મ્લેચ્છરાજભયત્રસ્તો ગતો દ્વારવતીં પુનઃ ॥ ૪૬॥

ત્યક્ત્વા પિત્ર્યં શુભં દેશં માધુરં દુર્લભં વિભો ।
યયાતિશાપબદ્ધેન તસ્મૈ દત્તં ભયાદ્વિભો ॥ ૪૭॥

રાજ્યં સુપુષ્ટમપિ ચ ધર્મરક્ષાપરેણ ચ ।
ઉગ્રસેનસ્ય દાસત્વં કૃતં વૈ સર્વદા મયા ॥ ૪૮॥

રાજાસૌ યાદવાનાં વૈ કૃતો નઃ પૂર્વજૈઃ કિલ ।

ગાર્હસ્થ્યં દુઃખદં શમ્ભો સ્ત્રીવશ્યં ધર્મખણ્ડનમ્ ॥ ૪૯॥

પારતન્ત્ર્યં સદા બન્ધમોક્ષવાર્તાત્ર દુર્લભા ।
રુક્મિણ્યાસ્તનયાન્દૃષ્ટ્વા ભાર્યા જામ્બવતી મમ ॥ ૫૦॥

પ્રેરયામાસ પુત્રાર્થં તપસે મદનાન્તક ।
સકામેન મયા તપ્તં તપઃ પુત્રાર્થમદ્ય વૈ ॥ ૫૧॥

લજ્જા ભવતિ દેવેશ પ્રાર્થનાયાં જગદ્ગુરો ।
કસ્ત્વામારાધ્ય દેવેશં મુક્તિદં ભક્તવત્સલમ્ ॥ ૫૨॥

પ્રસન્નં યાચતે મૂઢઃ ફલં તુચ્છં વિનાશિ યત્ ।
સોઽયં માયાવિમૂઢાત્મા યાચે પુત્રસુખં વિભો ॥ ૫૩॥

કામિન્યા પ્રેરિતઃ શમ્ભો મુક્તિદં ત્વાં જગત્પતે ।
જાનામિ દુઃખદં શમ્ભો સંસારં દુઃખસાધનમ્ ॥ ૫૪॥

અનિત્યં નાશધર્માણં તથાપિ વિરતિર્ન મે ।
શાપાન્નારાયણાંશોઽહં જાતોઽસ્મિ ક્ષિતિમણ્ડલે ॥ ૫૫॥

ભોક્તું બહુતરં દુઃખં માયાપાશેન યન્ત્રિતઃ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્તવન્તં ગોવિન્દં પ્રત્યુવાચ મહેશ્વરઃ ॥ ૫૬॥

બહવસ્તે ભવિષ્યન્તિ પુત્રાઃ શત્રુનિષૂદન ।
સ્ત્રીણાં ષોડશસાહસ્રં ભવિષ્યતિ શતાર્ધકમ્ ॥ ૫૭॥

તાસુ પુત્રા દશ દશ ભવિષ્યન્તિ મહાબલાઃ ।
ઇત્યુક્ત્વોપરરામાશુ શઙ્કરઃ પ્રિયદર્શનઃ ॥ ૫૮॥

ઉવાચ ગિરિજા દેવી પ્રણતં મધુસૂદનમ્ ।
કૃષ્ણ કૃષ્ણ મહાબાહો સંસારેઽસ્મિન્નરાધિપ ॥ ૫૯॥

ગૃહસ્થપ્રવરો લોકે ભવિષ્યતિ ભવાનિહ ।
તતો વર્ષશતાન્તે તુ દ્વિજશાપાજ્જનાર્દન ॥ ૬૦॥

ગાન્ધાર્યાશ્ચ તથા શાપાદ્ભવિતા તે કુલક્ષયઃ ।
પરસ્પરં નિહત્યાજૌ પુત્રાસ્તે શાપમોહિતાઃ ॥ ૬૧॥

ગમિષ્યન્તિ ક્ષયં સર્વે યાદવાશ્ચ તથાપરે ।
સાનુજસ્ત્વં તથા દેહં ત્યક્ત્વા યાસ્યસિ વૈ દિવમ્ ॥ ૬૨॥

શોકસ્તત્ર ન કર્તવ્યો ભવિતવ્યં પ્રતિ પ્રભો ।
અવશ્યમ્ભાવિભાવાનાં પ્રતીકારો ન વિદ્યતે ॥ ૬૩॥

તત્ર શોકો ન કર્તવ્યો નૂનં મમ મતં સદા ।
અષ્ટાવક્રસ્ય શાપેન ભાર્યાસ્તે મધુસૂદન ॥ ૬૪॥

ચૌરેભ્યો ગ્રહણં કૃષ્ણ ગમિષ્યન્તિ મૃતે ત્વયિ ।
વ્યાસ ઉવાચ ।
ઇત્યુક્ત્વાન્તર્દધે શમ્ભુઃ સોમઃ સસુરમણ્ડલઃ ॥ ૬૫॥

ઉપમન્યું પ્રણમ્યાથ કૃષ્ણોઽપિ દ્વારકાં યયૌ ।
યસ્માદ્ બ્રહ્માદયો રાજન્ સન્તિ યદ્યપ્યધીશ્વરાઃ ॥ ૬૬॥

તથાપિ માયાકલ્લોલયોગસઙ્ક્ષુભિતાન્તરાઃ ।
તદધીનાઃ સ્થિતાઃ સર્વે કાષ્ઠપુત્તલિકોપમાઃ ॥ ૬૭॥

યથા યથા પૂર્વભવં કર્મ તેષાં તથા તથા ।
પ્રેરયત્યનિશં માયા પરબ્રહ્મસ્વરૂપિણી ॥ ૬૮॥

ન વૈષમ્યં ન નૈર્ઘૃણ્યં ભગવત્યાં કદાચન ।
કેવલં જીવમોક્ષાર્થં યતતે ભુવનેશ્વરી ॥ ૬૯॥

યદિ સા નૈવ સૃજ્યેત જગદેતચ્ચરાચરમ્ ।
તદા માયાં વિના ભૂતં જડં સ્યાદેવ નિત્યશઃ ॥ ૭૦॥

તસ્માત્કારુણ્યમાશ્રિત્ય જગજ્જીવાદિકં ચ યત્ ।
કરોતિ સતતં દેવી પ્રેરયત્યનિશં ચ તત્ ॥ ૭૧॥

તસ્માદ્ બ્રહ્માદિમોહેઽસ્મિન્કર્તવ્યઃ સંશયો ન હિ ।
માયાન્તઃપાતિનઃ સર્વે માયાધીનાઃ સુરાસુરાઃ ॥ ૭૨॥

સ્વતન્ત્રા સૈવ દેવેશી સ્વેચ્છાચારવિહારિણી ।
તસ્માત્સર્વાત્મના રાજન્ સેવનીયા મહેશ્વરી ॥ ૭૩॥

નાતઃ પરતરં કિઞ્ચિદધિકં ભુવનત્રયે ।
એતદ્ધિ જન્મસાફલ્યં પરાશક્તેઃ પદસ્મૃતિઃ ॥ ૭૪॥

માભૂત્તત્ર કુલે જન્મ યત્ર દેવી ન દૈવતમ્ ।
અહં દેવી ન ચાન્યોઽસ્મિ બ્રહ્મૈવાહં ન શોકભાક્ ॥ ૭૫॥

ઇત્યભેદેન તાં નિત્યાં ચિન્તયેજ્જગદમ્બિકામ્ ।
જ્ઞાત્વા ગુરુમુખાદેનાં વેદાન્તશ્રવણાદિભિઃ ॥ ૭૬॥

નિત્યમેકાગ્રમનસા ભાવયેદાત્મરૂપિણીમ્ ।
મુક્તો ભવતિ તેનાશુ નાન્યથા કર્મકોટિભિઃ ॥ ૭૭॥

શ્વેતાશ્વતરાદયઃ સર્વે ઋષયો નિર્મલાશયાઃ ।
આત્મરૂપાં હૃદા જ્ઞાત્વા વિમુક્તા ભવબન્ધનાત્ ॥ ૭૮॥

બ્રહ્મવિષ્ણ્વાદયસ્તદ્વદ્ ગૌરીલક્ષ્મ્યાદયસ્તથા ।
તામેવ સમુપાસન્તે સચ્ચિદાનન્દરૂપિણીમ્ ॥ ૭૯॥

ઇતિ તે કથિતં રાજન્ યદ્યત્પૃષ્ટં ત્વયાનઘ ।
પ્રપઞ્ચતાપત્રસ્તેન કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૮૦॥

એતત્તે કથિતં રાજન્મયાખ્યાનમનુત્તમમ્ ।
સર્વપાપહરં પુણ્યં પુરાણં પરમાદ્ભુતમ્ ॥ ૮૧॥

ય ઇદં શ ૃણુયાન્નિત્યં પુરાણં વેદસમ્મિતમ્ ।
સર્વપાપવિનિર્મુક્તો દેવીલોકે મહીયતે ॥ ૮૨॥

સૂત ઉવાચ ।
એતન્મયા શ્રુતં વ્યાસાત્કથ્યમાનં સવિસ્તરમ્ ।
પુરાણં પઞ્ચમં નૂનં શ્રીમદ્ભાગવતાભિધમ્ ॥ ૮૩॥

ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણેઽષ્ટાદશસાહસ્ર્યાં સંહિતાયાં
ચતુર્થસ્કન્ધે પરાશક્તેઃ સર્વજ્ઞત્વકથનં નામ પઞ્ચવિંશોઽધ્યાયઃ ॥ ૪.૨૫॥

॥ ઇતિ શ્રીમદ્દેવીભાગવતે મહાપુરાણે ચતુર્થસ્કન્ધઃ સમાપ્તઃ ॥

Encoded and proofread by Vishwas Bhide

*4 Shrimaddevibhagavatamahapurane Chaturthah Skandhah*

pdf was typeset on March 31, 2024

Please send corrections to *sanskrit@cheerful.com*